नं. ५०

सिद्धान्त सुधानिधिः

१०६ पत्र

व्याकरण

अनुदात्तङित आत्मनेपदं भूवादय इत्यतो नुवृत्तस्य धातोरित्यस्य पंचम्यंतत्वेन विपरिणामः सादृश्यमात्रेण परिणामव्यवहारो वस्तु
तो योगस्य शास्त्रांतरस्यैव सन्निधानादिति कैयटः आत्मनेपदे नैव धातुलकारयोराक्षेपः इकोझलित्यत्र सना धातोरिवेति कौस्तुभः
ङितो धातोर्विशेषणत्वे तदंतविधिः द्वंद्वांते श्रूयमाणस्येत्यस्य द्वाभ्यां संबंधः अनुदात्तांशे तदंतविधेः फलाभावात् उपदेश इत्यनुवृत्तं त
था च अनुदात्तेत्काद् उपदेशे योङितदंताच्च धातोर्लस्य स्थाने आत्मनेपदमेव स्यात् । एधते । स्पर्द्धते । बोभूयते ऋतीयते । शोङ् । स्त्र्युपप
देशिवद्भावात् ङितत्वं विधीयते इत्यादौ त्वव्यपदेशिवद्भावेन चरितार्थेन ङकारेण व्यंजकं ङितः तत्र व्यपदेशिवद्भावेन ङितत्वे उपदेशे किं चुकु
टिषति । णाङ् । कुटादिभ्य इति अतिदेशात् सनो ङित्वे कुङ्ङ्भ्यां माभूत् । अरुरुवत् । अमुतत् एतेन विनुतः सुनुत इत्यादि व्याख्यातं सार्व
धातुकमपिदिति ङित्वस्यातिदेशिकत्वात् । तत्र उपदेश धातुशब्दयोरनुवृत्तिर्वृथा किं कर्तव्यमेको नियमो वलीयानिति अस्य व्यर्थः स्यसनोरित्यत्र ज्ञापकविस्प
मारणत्वात् । प्रथममेवात्मनेपदनियमस्य प्रवृत्तेरिति चेत् अत्राहुः उपजनिष्यमाणो नापि ङित् अङ्ग्य संज्ञानिमित्तस्यापि परस्मैपदस्य बाधः स्या
त् । विकारणागमवधानेपि नियमप्रवृत्तिरित्यस्यापि ज्ञापनसंभवान्नियमस्य वलवत्तायाः पाक्षिकत्वाच्च हरदत्तस्तु ङित इत्येवं व्याचख्यौ धात्व

सि॰ सु॰ नुदात्तौ प्रयोजनाभावात्॰ नियमस्य बलवत्त्वादेव वङ्ङादावदोषात्॰ न च भाविना ङितावाधः परस्मैपदस्य परत्वात्॰ अत एव प्रसादकृतोक्तं
चङ्॰ ङोऽस्तु परस्मैपदस्य बत्वानन्तरप्रवृत्तित्वेन ङित्वेऽपि तङ् नेति केचित्तु पङ्गीपङ्ङोर्ङकारस्य गुणवृद्धिनिषेधेन चरितार्थत्वमाशंक्य पङ्ः प्रा
गनुदात्तमकारं प्रश्लिष्य अनुदात्तत्वादेव तङ् न च यङः तादनुदात्तेतश्च हलादेरिति प्रसंगः प्रत्येकमप्रत्येतिज्ञापकान्तरमभावात्॰ ईवङ्ः प्रागि
कारमीकारं वा ऽनुदात्तं प्रश्लिष्य आद्ये अतेदित्वाभावान्नुम्॰ द्वितीये एकाचइत्यनुवृत्तेः श्वीदितो निष्ठायामिति नेण्निषेध इति कल्पयांचक्रुः
न च यङ् लुक्यातिव्याप्तिः प्रत्ययलक्षणेन ङित्त्वात्॰ अत्र मान्तः वोभूतु तेतिक्ते इति तिजे यङ् लुगन्तादात्मनेपदविधानं ज्ञापकं यङ्लुगन्तात्प्रत्य
यलक्षणेनात्मनेपदं नेति॰ अत एव चर्करीतं चेत्यदादौ पठितस्य चकारात्परस्मैपदमिति व्याख्यानं ज्ञापकसिद्धार्थस्फुटीकरणार्थं इत्याहुः॰ य
ङ्ङि॰ त्वस्य प्रत्ययाप्रत्ययसाधारणात् पाप्रत्ययलक्षणेन न तत्र प्रकृत्यात्मनेपदप्रवृत्त्यभावः अत एव गोहितमित्यादाववादयोन॰ शोभनाद्दृष
दोषत्रेतत्सुदृषत्॰ इत्यत्र सोमसुमसी इति स्वरोऽतसंतस्येव दीर्घश्च न भवतीति सिद्धान्तः अथ पास्य क्ङितीत्यत्रात्मनेपदं स्यात् स्पर्द्धेरनुदात्तेत्त्वात्॰ द्वि ९०
त्वे गोहिर्वचनं प्राप्नोतीति सिद्धान्तात्मकत्वे पररत्वाभावात्॰ मैवं श्लिपाशपानुबंधेनेति निषेधात्॰ अनुबन्धनिर्देशो हि द्वयोर्विशिष्यसामा

मतश्च आद्यः शीङः सार्वधातुके गुण इत्यादौ । द्वितीयो ऽनुदात्त इत्यादौ । आङो यमहन इत्यादौ उपसर्गो ऽनुबंधस्यैव निर्देशो न प्रकृत्यनुबंधस्येति प
ङ्लुकि भवत्येव ङकारनिषेधस्य प्रकृतिग्रहणे यङ्लुगंतस्य ग्रहणमित्येतदपवादत्वात् अत एव वेविज्ञः मरीमृज इत्यादौ क्ङिति चेति निषेधप्रवृत्तिः
अनुदात्तेत्त्वलक्षणं चात्मनेपदमनित्यं वदितुं ङितः करण इति विचक्षणाः प्रथयन्ति स्फायतेर्वेतोदात्तेत्त्वं पाठः गुणो धेन अनुदात्तेतश्च हलादेरिति यु
चोवकाशत्वात् अनुदात्तेत्त्वनिर्णयात् अत एव स्फायित्रि नेमीक संधिप्रबंधदविगलत्संमदस्वेदपूर इति मुरारिः स्फायतेर्गणे पाठः स्फायतिकल
भेभ्यः परिभवमिति तु आधृषाद्वेति विकल्पितणिचः सहेरूपं इदं च प्रकरणं नियमार्थं लस्यतिवादयः लटः स्थानेत्याजनयौ लिटः कानच्वा क्व
सुश्च लटः सट्टेत्यात्मनेपदपरस्मैपदानां विहितत्वात् स्यादेतत् विकरणानामनवकाशो लादेशमित्रेष्वानशादयः नियमस्य आशीर्लि
ल्लिटौ तदादेशानामार्धधातुकत्वात् तत्र विकरणानवकाशात् लङ्कुङ्लुङ्मध्ये आद्ययोर्विकरणलोपे नांतो ऽत्र मध्यपातित्वेन व्यवधानाविरहा
त् स्यद्यत इत्यादावुभयप्रसंगे परत्वान्नित्यत्वाच्च विकरणानां पूर्वमुत्पत्तौ तैर्व्यवधानान्नियमो न प्रवर्तेत तस्मादेकवाक्यतया विधिरेवास्तु
तथा हि आत्मनेपदपरस्मैपदाभ्यां लिंगाभ्यां इदं प्रकरणं लादेशविधावुपतिष्ठते तत्र महावाक्येन विहितेषु लादेशेषु सार्वधातुकमात्रित

सि·सु·धा

पाश्चादिकरणादिति न दोषः नन्वेवमपि स्यादीनां लावस्थायामेव विधानात्तेषां वधानादोषतादवस्थ्यमिति चेत्· न· लमात्रापेक्षत्वादंतरंगाल्लादे
शाः लकारविशेषापेक्षया बहिरंगाः स्यादय इति लादेशानां पूर्वमेव प्रवृत्तेः· लादेशानंतरमेव· स्यादीनां प्रवृत्तिरन्यथा तासेः परस्य लसार्वधा
तुकस्यानुदात्तविधिना विकरणस्वरः सार्वधातुकस्वरं न बाधते· इत्येतज्ज्ञापनानुपपत्तेरिति तत्तीयेतस्य माणत्वाच्च येन नाप्राप्तिन्यायेन शबादी
न्बाधित्वा शबादिविधावनुवर्तनाद्वा: ननु संज्ञया विधानं· विहितानां च संज्ञेत्यन्योन्याश्रयः एकवाक्यतापक्षे पूर्वं लादेशविध्यभावेन विहितानु
वादेनादेनात्मनेपदपरस्मैपदसंज्ञयोर्विध्ययोगादिति चेत्· मैवं परस्मैपदानुक्रमेण परित्यागेन तत्रेतरेतराश्रयाभावात्· नचैवमनुदात्तङिभ्यो
पितत्वप्रसंगः तेषामात्मनेपदसंबंधावगमेन परस्मैपदसंबंधस्य बाधनात्· नचानुपराभ्यां कृञ इत्यात्मनेपदनिषेधार्थं तदनुक्रमणस्या
वश्यकत्वं स्वरितञित्वं नंतरं कर्त्रे ये नुपराभ्यां कृञो नेति सूत्रणीयत्वात् आत्मनेपदेषु भाविसंज्ञाविज्ञानात्· अत्र भाष्यं पुषादिद्युताद्यॢदि — एम०
तः परस्मैपदेषु· आत्मनेपदेष्वन्यतरस्यामित्यादिज्ञापयति विकरणेभ्यो नियमो बलीयानिति· कृतेनियमानामसंकरेणास्थितानामेव निमि
त्तत्वोपपत्तेः अतो न दोषः अथ नियमानामपि संभवमात्रेण निमित्तत्वं स्यादिति चेन्न हि अनुपसर्गाद्विभाषेति ज्ञापकं नन्वेतदपि लिङ्लि

ड्यर्थं स्यात् । चक्रमे चक्रामः क्रम्यात् क्रंसीष्टेति चेत् । अत्र वै यदाद्वयः वृम्यष्ट स्यमनेोरिति स्ये विकल्पविधानं ज्ञापकं अन्यथा पूर्वं विकरणोऽस्य
त्यपेक्षते तेन व्यवहितत्वान्नियमाप्रवृत्तौ परस्मैपदं सिद्धमेवेति किं विकल्पविधिना तस्मान्नियम एव युक्तः भाविसंज्ञाविधाने गौरवात् ।
स्यादेतत् । अनुदात्तङित आत्मनेपदं भवतीति प्रत्ययनियमोऽयं उतानुदात्तङितः आत्मनेपदमेव भावकर्मणोरात्मनेपदमेवेति प्रकृत्यर्थ
नियमः न च पूर्वैरनियमाद्भावकर्मणोरित्यस्य विध्यर्थत्वमेवेति वाच्यं समस्तमात्मनेपदप्रकरणमेकं वाक्यमित्याशयात् नाद्यः अनुदात्त
ङितोऽपि परस्मैपदापत्तेः उक्तनियमेन अनुदात्तङितः अन्येभ्य आत्मनेपदस्य निवृत्तावपि अनुदात्तङितः परस्मैपदस्य दुर्वारत्वात् । तदर्थं शेषात्क
र्त्तरीति नियमारंभे च गौरवं किंच वाक्यभेदे इति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङितः सुनिपतत्वात्पक्षे लकारमात्रश्रवणं स्यात् न द्वि
तीयः अनुदात्तङितः घस्लृजादीनामनुत्पत्तिप्रसंगात् । भावकर्मणोरात्मनेपदमेवेत्यर्थनियमेऽप्येवं अत्रिसमर्थतः शेषात्परस्मैपदमेवेति नि
यमादाद्यपक्षे नातिप्रसंगः न चैतेनत्स्वारंभादेव गौरवं प्रामाणिकत्वात् । न च तत्र कर्त्तरीत्युक्तेः कर्त्तरि परस्मैपदमेवास्तु भावकर्मणोस्तु
जागर्यते अघस्यतेत्यादौ परस्मैपदं स्यादिति वाच्यं तत्रात्मनेपदमेवेति नियमात् । किं चैत्याद्यपि न लादेशेषु कृते सु नियमप्रवृत्तेः आत्म

नेपरस्यविकल्पेनविधानात् शेषवचनेनैवपरस्मैपदसिद्धेः अथंकीदृशस्तत्रनियमः कर्त्तरिपरस्मैपदंशेषादेवेतिवा शेषात्कर्त्तर्येवे
तिवाः नाद्यः अशेषात्कर्त्तरिनियमाचनावपि भावकर्मणोः शेषादशेषाच्चतस्यदुर्वारत्वात् नान्त्यः शेषाद्भावकर्मणोस्तथात्वेनावपि अशेषा
द्भावकर्मकर्त्तृषु तस्यदुर्वारत्वात् मेवं योगविभागेननियमद्वयाश्रयणात् शेषादेवपरस्मैपदं कर्त्तर्येवेतिच एवंसत्यर्थनियमोप्यदोषः त
ङादीनामनवकाशत्वात् परस्मैपदमेवेतिनियमेन तत्राप्यवकाशायोगात् तयोरेवेतिभावकर्मणोस्तव्यदादिविधेरप्यनवकाशत्वात् वि
णोप्यनवकाशत्वात् वस्तुतोभावकर्मणोःसार्वधातुकार्थत्वात् नैवमपियजनस्यादितिवाच्यं अकर्त्तरीतिविहितस्यापादानादिषुसा
वकाशत्वेपिभावकर्मणोर्विहितस्यानवकाशत्वात् नाप्यत्रात्मनेपदस्यानियतत्वाद्दत्तोत्पादप्रसंगः शेषात्परस्मैपदमेवेतिनियमात् न
चैतेनकर्त्तर्यात्मनेपदस्यावृत्तावपि शेषाद्भावकर्मणोःपरस्मैपदंदुर्वारमितिवाच्यं तत्रात्मनेपदमेवेतिनियमात् तस्मान्नियमद्वयमा
विस्थितं अत्रेदमवधेयं प्रकृतस्यार्थनियम एवयुक्तः तथाहि शेषात्कर्त्तरीत्यपूर्णाय परस्मैपदमित्येवसूत्रणीयं यत्रपरस्मैपदमात्म एम०
नेपदमपिप्राप्तं तत्रपरस्मैपदमेवस्यात् अतएवनियमपक्षेतुशेषादितिकर्त्तरीतिचवाच्यं योगश्चविभजनीयइतिगौरवं तिवादिवा

केनेन सह शाक्यभेदः परिसंख्याप्रयुक्तदोषत्रयं च नियमद्वयेपि समानं तदसहनेन तु लस्यातिवाहस्य इत्यनेन न सहे कर्तृवाच्यत्वादिदं प्रकरणं विधायकं
मेव। शेषात्कर्त्तरीति च कर्त्तव्यमेव। अत्रान्योन्याश्रयपरिहाराय भाविसंज्ञा विज्ञेया एवं च विकरणेषु न दोषः लादेशो नतरं सार्वधातुकमाश्रि।
त्य विकरणप्रवृत्तेः न च स्यादिषु दोषः लमात्रापेक्षत्वात् तेषां तिबादिषु कृतेषु लकारविशेषापेक्षत्वात् बहिरङ्गत्वात् स्यादीनां प्रवृत्तेरिति।
कौस्तुभकृतः॥ ॥भावकर्मणोः॥ विहितस्य लस्यात्मनेपदं स्यात् सुप्यते क्रियते एकवाक्यतया विधिर्भिन्नवाक्यतया नियमो वेति पूर्व
वत् सोपि द्विधा प्रत्ययनियमोर्थनियमश्चेति नेतौ तेको भवतोत्ता भो लट् इत्यत्र घञो सिद्धिः सञ्जातीयस्य परस्मैपदस्येव व्यावृत्तेः
ननु भिद्यते कुसूलः स्वयमेवेत्यत्र कर्मकर्तरि परस्मैपदं प्राप्नोति। कर्मवत्कर्मणा तुल्यक्रिय इति शास्त्रस्य व्यपदेशस्य वातिदेशक तथा च तेन नेते न शास्त्र
णात्मनेपदं कर्तव्यं कर्मणात्मनेपदमित्यस्यावकाशः भुज्यते कर्म कर्तरि परस्मैपदमित्यस्यावकाशः कर्ता कर्मकर्तृ उभयप्रसंगे परत्वात्पर
स्मैपदमिति मैवं प्राधान्यात्कार्यातिदेश एवायं सर्वविशेषाणां कार्यार्थत्वात्। पक्षान्तरे तु शेषात्कर्तरीति सूत्रे कर्तरि कर्मव्यतिहार इत्यस्मात्क
र्तरीत्यनुवर्त्य कर्त्तैव यः कर्त्ता तत्र परस्मैपदं व्यपदेशान्तरस्याविषये इति यावत्। तत्र तु स्वाश्रयं कर्तृत्वमातिदेशिकं तु कर्मत्वमिति न परस्मैपदं

सि·सु·धा ५

॥ ॥कर्त्तरिकर्मव्यतिहारे॥ विनिमयविषयभूतायां क्रियायां वर्त्तमानाद्धातोः कर्त्तर्यात्मनेपदं स्यात्‌। व्यतिलुनीते अन्यक्रियाणां सापेक्षैकस्व
भावत्वात्कथं व्यतिहार इति चेत्‌ अत्राहुः। योग्यतावशाद्यं क्रियासाध्यान्वयस्य इदं साधनमिति निर्णीतसाध्यसाधनभावयोर्व्यत्यासः क्रिया
व्यतिहारः तथा च तस्य योग्यं लवनं करोतीत्यर्थः। परस्परकरणमपि क्वचित्क्रियाव्यतिहारः यथा संप्रहरन्ते राजान इति अत्रैकैव क्रिया सं
चारिणीव लक्ष्यते इति कर्तृग्रहणमन्यत्रार्थम्‌॥ ॥नगतिहिंसार्थेभ्यः॥ पूर्वेणात्मनेपदं न स्यात्‌ व्यतिगच्छन्ति व्यतिघ्नन्ति हसादीनामुप
संख्याने व्यतिहसंति आदिपदमेकार्थ्यं तेन शब्दार्थानामग्रहणाद्व्यतिजल्पंति इत्यत्र प्रतिषेधः संप्रहरन्ते राजानः अर्थग्रहणासामर्थ्या
च्छब्दान्तरनिरपेक्षा स्वये गतिहिंसयोर्वर्तन्ते तेषामेव निषेधः हरतिस्तूपसर्गयोगाद्धिंसार्थवृत्तिरतोऽयं न लभ्यत इत्याहुः ततः संप्रहरिष्यतोऽद
प्लाकर्णाधनेजयादिस्वत्रे कर्मव्यतिहारो न विवक्षित इति कैयटः वहेरनिषेधः प्रापणार्थत्वात्‌ आद्ये पेणगतिप्रतीतेः संविवहन्ते गर्गाः॥ ॥ १७०
इतरेतरान्योन्योपपदाच्च॥ आत्मनेपदं न स्यात्‌ परस्परोपपदाच्चेति वक्तव्यं इतरेतरस्य व्यतिलुनन्ति लौकिकव्यवहारे शब्दतात्पर्यावसानादरादि
तरेतरादिशब्दा उपसर्गाश्च कर्मव्यतिहारस्योतनाय प्रयुज्यन्ते तद्वदात्मनेपदमपि स्यादिति निषेधारंभः संपद्विनिमयेनोभौदयत्युर्भवनद्वयं

इत्यत्र क्रियाविनिमयस्याविवक्षा ॥ ॥ नेर्विशः ॥ निपूर्वाद्विश आत्मनेपदं स्यात् निविशते नेः किं प्रविशति अथ कथं अभ्यविशत न्यविशत
इति न चास्याडागमव्यवधायकमिति वा समाधेयं अंगभक्तस्याटो विकरणांतप्रत्ययवत्वेपि धातुमत्यनवयवत्वात् अत्राहुः लावस्थायामेवा-
ऽडागमः लुङ्लङि इत्यत्र द्विलकारको निर्देश इति भाष्ये व्याख्यानात् लकारविशेषापेक्षोमडागमं बाधित्वा लमात्रापेक्षत्वादंतरंगेषु ति-
बादिषु कृतेषु नियमस्य प्रवृत्तेश्च विकरणेभ्यो नियमे बलीयानिति सिद्धांतात् अथ तेः ज्ञापकेन विकरणव्यवधानेपि नियमप्रवृत्तिरिति
ज्ञाप्यते तथाप्यदोषः अंतरंगत्वात्तिबादिषु सत्सु शबंतरप्राप्त्याऽनित्ययोरड्विकरणयोर्मध्ये परत्वादट्प्रवृत्तेः न च विकरणः शब्दांतरात्प्राप्तोन
तु शब्दांतरस्येति वाचनिकं किंतु न्यायः तथा च शबंतरस्य प्राप्नुवतः स्वशब्दांतरात्प्राप्नुवतोप्यनित्यत्वं पश्चात्क्रिसंबंधितया पूर्वं प्राप्नोतीत्यक्रिसं-
बंधितया पुनरप्राप्तेरनित्यत्वात् अत एव उपसर्गनियमे ऽड्व्यवायेउपसंख्यानमिति वार्त्तिकं शदेः शित इति सूत्रे भगवता प्रत्याख्यातमिति
दिगिति केचित् केचित्तु विकरणेभ्यः पूर्वमेव परत्वादडागमे तस्य धातुभक्तत्वेन व्यवधायकत्वे विकरणेभ्यो नियमस्य बलवत्त्वेपि अडागमा-
द्बलवत्त्वाभावेनाऽडागमात्पूर्वं नेर्विश इति बहिरंगस्य नियमस्य प्रयोगाच्च न च विकरणात्पूर्वं नियमो भवतीत्यत्रैव तात्पर्यं न त्वडागमादपि पू-

सि॰सुधा
5

र्दं तथा चेत्परत्वादड़ागमे कृते तस्य धातुभक्तत्वेनाव्यवधायकत्वान्नियमप्रवृत्तिरित्यभिप्राय इति भावः नियमस्य विकरणादपि लीयस्त्वे
पि नित्यस्य विकरणस्याडागमात्परस्मात् दुर्बलत्वस्यानुक्तत्वेनाडागमात् पूर्वप्रवृत्तेः शनिवारणात् अडागमाभावस्थले तत्र(?)भाव्यायाः
सार्थक्यात् विकरणाव्यवधाने पीत्यादिकमप्ययुक्तं विकरणस्य नित्यत्वे मानाभावात् अन्तरङ्गानुवृत्तस्य नित्यत्वमिति भाष्य
कृताव्यवहारात् शब्दान्तरस्याप्नुवन्निधिरनित्य इति वचनमूलन्यायस्याप्रसिद्धेः भाष्यकृताऽप्रयोनित्यत्वोक्तावपि विकरणानाम
नित्यतायां अनुक्तत्वात् कृताकृतप्रसङ्गित्वमात्रेणान्यायान्नित्यत्वमाश्रित्य भवो विकोऽनित्यत्वादिधेः छंदोविषयत्वात्तान् लिटः किद्
वत्तानर्थक्यमिति तीधि भवतिम्यांचेति सूत्रे शत्रावद्वाणेन भगवता तत्सूत्रावयवभवतिग्रहणं ज्ञापितस्यान्यस्याप्नुवन्निधिरनित्य इति वच
नमाश्रित्यान्यायमद्धिकरणयोर्नित्यत्वमाश्रित्यैव परत्वाद् दः पूर्वप्रवृत्तिमभ्युपेत्यागमे शत्रस्य बध्यतेत्वामाश्रित्य तत्र वार्तिकस्य मताख्या
नतोक्त: एतेन वृत्तिसीरदेवग्रंथाव्याख्याता वित्याहुः॥ ॥परिव्यवेभ्यः क्रियः॥ परेः क्रीणाते रात्मनेपदं स्यात् क्रियः इत्यत्र चेत्रकृ एम॰
तिवदनुकरणमिति धातुत्वादियङ् अकर्तृभिप्रायार्थोयमारंभः परिक्रीणीते विक्रीणीते अवक्रीणीते परस्परस्याहचर्यात्पर्य

दय उपसर्गा गृह्यन्ते नेह वेक्रीणासीति एकदेशविकृतस्यानन्यत्वादाप्तिः न च विभक्तिविशिष्टस्य विरित्यस्यायं विकारो ननु विशब्दस्ये
ति केवले नवस्यमाणत्वान्नैष दोष इति वाच्यं विभक्तेर्लोपात् प्रकृतिभागस्यैव विकारात् यद्विगाविनो विशब्दस्य संभवे तु साहचर्यादुपसर्गग्र
हणमिति कैयटे न वस्य मारणत्वाद्वेत्याहुः वस्मिन्नः परत्वान्नित्यत्वाच्च पूर्वं गुणे कृते पश्चात्सुलोपः अनादीन अ एङः अग्रणीवेत्यर्थान्तरे तु
दा च विसरः स्यावेसर इति विकार इति विशब्दस्य वे इति न विकार इति बोध्यं ॥ ॥विपराभ्यां जेः॥ विजयते पराजयते जयामि भूत्यर्थयो
र्द्वयोरपीह ग्रहणं वहवेवयः पर्हिणोपत्र तत्र बहुविजयति वनं इत्यत्र तु न भवति जहत्स्वार्थायां वृत्तावनर्थकत्वात् अजहत्स्वार्थायाम
पि तद्धर्मस्योपसर्जनत्वात् संबोधने तु प्रयुक्तं न च वीजयतेरेकदेशस्य पूर्वग्रहणं नवभ्रातादिगणे पठितौ जिरस्तीति वाच्यं पूर्वस्य कार्ये कर्त्र
सहवाँ नवद्वागात पराजयति सेना उत्क्रमेत्यर्थः प्रकृतिवदित्यतिदेशस्यानित्यत्वात् जेरित्यत्र देयः भावः ॥ ॥आङो दोनास्यविहरणे
आङः पूर्वोक्तस्वविकारस्त्रिमित्रार्थवर्तेर्दाञ आत्मनेपदं स्यात् आस्यवत्तिनाभावादन्येषां तु स्पर्शामग्रहणमिति कैयटः विद्यामादत्ते
आस्यग्रहणं विहरणविशेषोपलक्षणार्थं मुखं व्याददाति विपादिकां व्याददाति नदी कूलं व्याददाति परांगकर्मकान्नेति निषेधो नेष्यते

सि.सुधा.

6

सांगकर्मकाद्येति वार्त्तिकात्· स्वमंगमिह स्वांगं न तु द्रवं मूर्त्तिमदिति पारिभाषिकं व्याददते पिपीलिकाः पतंगस्य मुखं आङ्· निङ्· तोयग्रहणाद्ये
हमिति ही मा ददाति· एतावदमाकारइत्याहुः· अकर्त्रभिप्रायार्थो यमारंभः कर्त्रभिप्राये तु आस्यकर्मकादपि भवत्येव व्याददते विहगपतिर्मुखं स्वकीयं
मुखं व्याददाति पस्विपितीत्यस्य शुद्धामुखं व्याददते इति प्रत्ययेनार्थ इति वाच्यस्य निमिश्राः॥ ॥क्रीडोनुसंपरिभ्यश्च क्रीडविहारे वेकाणादाः अनुक्री
डते इत्यादि· उपसर्गेणा समासाहचर्यात् अनोः कर्मप्रवचनीयान्न माणवकमनुक्रीडति· तेन सहेत्यर्थः तृतीयार्थ इत्यनुः कर्मप्रवचनीयः स
मोऽकूजने मया स्य संक्रीडति चक्रियेके इति श्रीहर्षः क्रीडन्ते नागराजइति तु प्रमादः आगमेः क्षमायां आगमयस्व तावत्· सहस्वकंचित्कालं
मा त्वरिष्ठा इत्यर्थः यावदागमयतेथ नरेन्द्रानिति श्रीहर्षः शिक्षेर्जिज्ञासायां विद्यासु शिक्षते इह किं· सन्नेमा गृह्यतइति विध्यर्थमिदं· किंया
विषयस्य शक्तिः प्रयुञ्जते भोक्तुं शक्नोतीत्यादिदर्शनात् इह जिज्ञासा विषयः शक्तिर्गृह्यते विद्या जिज्ञासितुं यतत इत्यर्थः न कृतत्त्वयोगापत्तिः आ
त्मनेपदेनैव जिज्ञासा प्रतीतेरिति केचित्· अन्ये तु शिक्षेर्विद्योपादानइत्यस्य नियमार्थं ग्रहणमित्याहुः· न चाद्ये ज्ञानविशिष्टशक्तेरिच्छाविषयत्व
या ज्ञानविषयकेच्छार्थकजिज्ञासायामित्यसंगतमिति वाच्यं ज्ञानस्यापि विशेषणतया विषयत्वानपायात्· इच्छा तन्त्वाभ्यां शक्तिर्धात्वर्थः एम०

इच्छायाज्ञानविषयकत्वं तावात्मनेपदेनद्योत्यत इति॰ किरतेर्हर्षजीविकाकुलायकरणेषु उपसंख्यानं किरतिर्विक्षेपार्थः हर्षइदंस्कविषयत्वेनोपात्ताः
एतेष्वर्थेषु अपाच्चतुःपादिति सुडो विधानात्॰ अपस्किरते वृषो हृष्टः कुक्कुटो भक्ष्यार्थी श्वाश्रयार्थी वा हर्षादिषु किं अपकिरति कुसुमं य
यथात्मनेपदविधौ चतुःपाच्छकुनिकर्तृकत्वे निमित्ततयानोपात्तं तथा विसृष्टासहस्रमानविषयोपायंतदू तेनगजोपकिरतीत्येव भवतीत्याहुः
हरतेर्गतताच्छील्ये गतप्रकारः पैतृकमश्वा अनुहरन्ते मातृकं गावः पित्रादेरागतं प्रकारं सततं शीलयन्तीत्यर्थः मातुरनुहरतीति किमर्थं सूत्र
गतं भाष्ये साहश्यमात्रं विवक्षितमिति कैयटः आङि नुप्रच्छ्योरुपसंख्यानं आनुते उत्कंठापूर्वकं शब्दं करोतीत्यर्थः णुक्रतौ अदादिः आपृच्छ
ते गुरुं आशिषि नाथः नियमार्थमेतत्॰ नचानुदात्तेत्वं वैयर्थ्यं नाथन इति युजर्थत्वात्॰ सर्पिषो नाथते॰ सर्पिर्मे भूयादित्याशास्त इत्यर्थः॰ आशि
षि नाथ इति कर्मणि षष्ठी दीनं त्वामनुनाथते कुचयुगं पत्राहतं मा कृथा इत्यत्र नाथतिस्तनेति पाठ्यमिति काव्यप्रकाशः नाथसे किमु पतिं न भू
भृतामित्यत्र नाथस इतीत्याहुः शप उपालम्भने शप आक्रोशे स्वरितेत् अकर्तृगफलार्थ आरम्भः देवदत्ताय शपते त्वपादौ स्पृशामीति तन्मपा
लभतमित्येवं शपथं करोतीत्यर्थः श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इति संप्रदानसंज्ञायस्मै आख्यायते सज्ञीप्स्यमान इत्येके॰ यस्मा आख्यायते स इ

सि·सुधा०

त्यन्ये· सख्यः शपामि यदि किंचिदपि स्मरामि इत्यत्र तु स्वाभिप्रायाविःकरणमात्रविवक्षा॥ ॥समवप्रविभ्यः स्थः॥ संतिष्ठते इत्यादि· आङः प्र
तिज्ञायामुपसंख्यानं· अस्ति सकारमातिष्ठते· आगमौ गुणवृद्धी आतिष्ठते· अस्यार्थः· आपिशलिः सम्मुवीत तत्र सकारमात्रं पठति· अस्तिरा
सीदित्याद्यर्थं च अडाटावागमौ विधत्ते॥ ॥प्रकाशनस्थेयाख्ययोश्च॥ गोपी कृष्णायतिष्ठते स्वाभिप्रायं प्रकाशयति· स्थेयो विवादपदनिर्णेता·
वा हुल्लकादधिकरणे अचो यत्· तस्मै प्रतिष्ठते स्वमुखे स्वएवेति श्रीहर्षः· तत्त्वनिर्णयार्थमाश्रयेत्यर्थः॥ ॥उदोऽनूर्ध्वकर्मणि॥ ऊर्ध्वसंयोगफलक
त्वाभाववत्क्रियावाचकादुत्पूर्वात्तिष्ठतेस्तङ् प्राग्वत्· उद्ईहायामिति वार्त्तिकं कर्मपदप्रयोजनकथनार्थं कायपरिस्पंदात्मिका या चेष्टा यामिति या
वत्· अन्यथा अनूर्ध्वइत्येवावक्ष्यत् धातोः क्रियावाचित्वनियमात् तदाभात्· उत्तिष्ठमानस्तु परः· अनूर्ध्व इति किम्· जवेन पीठादुदतिष्ठदच्युतः·
ईहायां किं उत्तिष्ठति सेना जायते इत्यर्थः॥ ॥उपान्मंत्रकरणे॥ मंत्रकरणकार्थवृत्तेरुपपूर्वकात्तिष्ठतेः प्राग्वत्· ऐंद्र्या गार्हपत्यमुपतिष्ठते
मंत्रेति किं· भर्तारमुपतिष्ठति यौवनेन· उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यं· अमंत्रकरणार्थमेतत्· आदित्यमुपतिष्ठते ब
हूनामप्यचित्तानामेको भवति चित्तवान् पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते मैवं मंस्थाः सचित्तोयमेषोपि हि यथा वयं कपेस्तदपि कार्ये १८

यदर्कमुपतिष्ठतिइतिभाष्यं देवपूजांमत्वापूर्वमात्मनेपदं परत्रतुचापलमेतत्प्रपञ्जनमितितदभावइतिकैयटः स्कंतपंस्कंतिभिरर्थ्यामिरूप
तस्थेसरस्वती देवतात्वारोपात्·रथिकानुपतिष्ठते उपभिप्ययतीत्यर्थः ·अश्वारोहानुपतिष्ठते अनेपश्लिष्टस्यापिमैत्रीसंबंधः ·अयंपन्थाः·
स्त्रुघ्नमुपतिष्ठते·प्राप्नोतीत्यर्थः वालिप्सायामितिवक्तव्यं भिक्षुकोब्राह्मणकुलमुपतिष्ठते उपतिष्ठतिवा लिप्सयोपगच्छतीत्यर्थः ॥
अकर्मकाच्च: भोजनकालेउपतिष्ठते सन्निहितोभवतीत्यर्थः॥ ॥उद्विभ्यांतपः अकर्मकादित्येव·उत्तपते लिंवांविवपजेपा[illegible]रितिमुरारिः
दीप्यतइत्यर्थः स्वांगकर्मकाच्च उत्तपते वितपतेपाणिं नेह·देवदत्तोयज्ञदत्तस्यपाणिं वितपतिसंतापयतीत्यर्थः सुवर्णमुत्तपति संता
पयतिविलापयतिवा·उद्विभ्यांकिं निष्टपति· निसत्तपता विविपत्वे नतृद्विभ्यांतपआत्मनेपदमेवेतियकेचिराणिवइत्यर्थमिदंवच
नंस्यात्·तथाचनिष्टपतेइत्युदाहार्यं· दीप्यतइत्यर्थः·कर्मकोहितपि· अंतर्भावितण्यर्थतयातापनेवर्त्तमानश्चसकर्मकः·पुनःप्रयोगेकें
आपाराविवक्षायांकर्तुः कर्मवद्भावेणात्मनेपदसिद्धेः मेवं अर्थभेदेकर्मवन्दावंविनापिसकर्मकाणांमकर्मकत्वदर्शनात्·नदीवहतिभारं
वहतिइत्यादिप्रयोगात् तस्माद्विध्यर्थमेवसूत्रं॥ ॥आङोयमहनः आङ्·पूर्वकाभ्यामकर्मकाभ्यांस्वांगकर्मकाभ्यांचयमिहनिभ्यामा

८

सि·सु·धा मात्मनेपदं स्यात्· आपृच्छते आहूतेऽग्रे पृच्छते पाणिनिं आह्वते शिरः शनैर्नमो हारा दाह्वधमारघ्नमिति भट्टिप्रयोगो व्याख्यातः
परांगकर्मकाभ्यां अस्त्यादात्मनेपदस्य सुखुत्वात्· अकर्मकोपीति किं· आपृच्छति रज्जुं कूपात्· आरंहति वधं लपादेन· स्वांग इति किं परस्य शिरस्त्री
8 हृति· गांडी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः इति भारविप्रयोगः कथमादिकरितिकेचित्· नचैवं अंगेति पदं छित्वा
घ्नेः कर्मनापेति हन्तेर्भावे क्विपि चतुर्थ्येकवचनं शंक्यं अंजेवी भावे विवायेति स्वीकारात्· शिवस्य समीपमेत्य मदेसंप्रदायेन संवद्ध
आस्फालितवानिति केचित्· यद्वा उन्मज्जन्मकरध्वजमरापगायावेगेनपतितमुखमेत्पवाराननयाः गांडीगपश्चित्तेत्यध्याहारः· अंजघ्ने
तिकर्मणिलकारः· तेनेत्यध्याहारः· यद्वा गांडीवमात्मन इच्छन् गांडीवी· क्यजंतात्क्विपः· कनकशिलेति आचारक्विबंतात्कर्तरिक्विपि तत्नीपा
योः कर्मधारयः· नितरांभापत्रे तिवद्धोविशेषणं उन्मज्जन्मकर इति कर्मधारयात् त्वातिसतिसप्तमी लकारः कर्मण्येव:॥ ॥ समो गम्यृच्छि
भ्यां· संपूर्वाभ्यामकर्मकाभ्यामाभ्यांमात्मनेपदं स्यात्· संगच्छते समृच्छते· अकर्मकाभ्यां किं खग संगच्छति यदि नाधिपं तद्वैक्यं समवाप्स्यते नितरां एम०
स्वार्थे इत्र एकं समपद्यते सप्तर्षीणां विविदिवदर्शनात्तीनामुपसंख्यानं परस्मैपरिभ्यांसाहचर्याद्विदेर्ज्ञानार्थस्य ग्रहणं लाभार्थस्य

स्वरतिरेव्यात्सन्नाविचारणार्थयोस्तात्मनेपदित्वात् संविदेः संविदाते संविद्रते संपृच्छन्ते संस्वरन्ते अर्तिश्रुदृशिभ्यश्चेति वक्तव्यं अर्तीति
ण्वादिग्रहणोत्पादेर्ग्रहणं मासमृत मासमृषातां मासमृषतेति भाष्यात् समारत समारेतां समारंतेति हृतेश्च सर्त्तिशास्त्तीत्यङ्विधौ
तुल्येप्यविकरणेन शास्तिना साहचर्याज्जौहोत्यादिकस्यैव ग्रहणं परस्मैपदिष्वित्यस्योत्तरार्थमनुवृत्तावपियोगविभागसामर्थ्याद्द्विधा
नसंबंधः तेनभाष्यमुपपन्नं संशृणुते संपश्यते रक्षांसीतिपुराविसंशृणुमहे इतिमुरारिप्रयोगस्त्वचिंत्यः अकर्मकादित्यनुवृत्तेः केचित्तुरक्षांसि
संतीतिकथयद्य इत्यध्याहारः हितान्नयः संशृणुते स किंप्रभुरितिवद्विवक्षितकर्मकत्वान्नदोष इत्याहुः वस्तुतो रक्षांसि संती तिवाक्यार्थस्य कर्मत्वे
पिद्वितीयांतपदसमभिव्याहारविरहान्नदोषः उपसर्गादस्यत्यूह्योर्वेति वक्तव्यं अकर्मकादित्यतः परं नसंबध्यत इति केचिदादयः निरस्यति
निरस्यते समूहति समूहते उपसर्गात्किं अस्यति ऊहते अत्रकर्मकमपूहतिपठितो जनेनहतितुप्रमाद ओहतीतिसोपसर्गपाठोवा ॥ ॥
निसमुपविभ्यो ह्वः निह्वयत इत्यादि अकर्त्रभिप्रायार्थ आरंभः नचव्याकारात्तस्यानुकरणान्निह्वास्यत इत्येवोदाहरणं विह्वयतिग्रहणोपलक्ष
तिग्रहणाभावादितिवाच्यं एवं॰ त एवानुक्रियमाणोलक्षणावशात्तन्निःपन्नावपिश्रात्वस्याविवक्षितत्वात् ॥ ॥स्पर्द्धायामाङः आङ्पूर्वाह्व

सि० सु०

9

यतेः स्पर्द्धायामागवत् । मल्लो मल्लमाह्वयते स्पर्द्धमानः सन्नाह्वयति । स्पर्द्धायां किं पुत्रमाह्वयति स्पर्द्धायामेतन्मात्वर्थत्वेपि आङ्पूर्वस्य शब्दनार्थत्वा
त्स्पर्द्धाया विषये विधिरयं ॥ ॥गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ समस्तस्वर्थेषु अकर्त्रभिप्रायार्थ आरंभः । गंध
नं सूचनं हिंसा साहश्यात् । उत्कुरुते सूचयतीत्यर्थः । अवक्षेपणं भर्त्सनं श्येनो वर्तिकामुदाकुरुते हरिमुपकुरुते सेवत इत्यर्थः । परदारान्प्रकु
रुते सहसा तेषु प्रवर्त्तत इत्यर्थः । एधोदकस्योपस्कुरुते एधशब्दोऽकारान्तोपि । एधानुदकं ताशनवत् इति दर्शनात् सात त्वव्याख्याने दकशब्द उ
दकार्थो ग्राह्यः । जीवनीयं दकं चेति हलायुधोक्तेः । तस्य गुणान्तराधानं करोतीत्यर्थः । प्रकथनं प्रकर्षेण उक्तिः । गाथाः प्रकुरुते । उपयोगः प्रति
बद्धविनियोगः शतं प्रकुरुते एषु किं कटं करोति ॥ ॥अधेः प्रसहने ॥ कृञ इत्यनुवर्त्तते प्रसहनमभिभवः क्षमा वा । पराभर्षणेऽभिभवे
चेति पाठात् । छंदसीत्यस्य व्यापिकत्वात् । तमधिकुरुते । भवादृशाश्चेदधिकुर्वते परानिति भारविः । क्षमंत इत्यर्थः ॥ ॥वेः शब्दकर्मणः ॥ शब्द
स्य कर्मकारकत्वे विपूर्वात्कृञ आत्मनेपदं स्वरान्विकुरुते उच्चारयतीत्यर्थः । नेह विचित्रं विकरोति कामः ॥ ॥अकर्मकाच्च ॥ वेः कृञ इत्यागे
त । प्रहेण्णानि विकुर्वते विकृतानि भवंतीत्यर्थः ॥ ॥संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ एषु वोध्येषु न

एम०

पतेरात्मनेपदं उत्संजनज्ञानविगणनव्ययान नयतेर्वाच्याः गन्ते तु अयोगे र्पाघयाथास्त्रे नयते सोपपत्तिकान्शास्त्रसिद्धांतान्शिष्ये
भ्यः प्रापयतीत्यर्थः शिष्याणामिच्छार्थसिद्ध्या संमानननिः पत्तिः अयोगोपाधित्वं तु तज्जन्यशाब्दबोधाविषयत्वे सति प्रयोगनियामकत्वं उत्संज
नमुत्क्षेपणं दंडमुन्नयते माणवकमुपनयते विधिनात्मसमीपं प्रापयतीत्यर्थः तत्फलं माणवकसंस्कारः तस्याचार्यगामित्वाभावादात्मने
पदविधानं अध्यापनार्थत्वे तु उपनयनस्येदं व्यर्थं स्यादिति मीमांसकाः उपनीय ददद्वेदमाचार्यः स उदाहृत इति स्मृतावेवाचार्यपदप्रवृत्तिनिमित्तं वि
निगुरेनं गुरवो गुरुरभियं इत्यत्राचार्यकरणमविवक्षितं वस्तुतस्तु आचार्यकरणं उपशब्दसमभिव्याहृतेन नयतेरेव प्रयोगोपाधिः प्रयोगोपाधेः
स्वरूपसत एव नियामकत्वात् तद्विकाले अनुपयोगात् तत्वं नयते निश्चिनोतीत्यर्थः कर्मकरानुपनयते भृतिदानेनात्मसमीपं प्रापयतीत्य
र्थः विगणनं ऋणादेर्निर्यातनं करं विनयते राजांशं ददातीत्यर्थः शतं विनयते धर्माद्यर्थं विनियुंक्ते इत्यर्थः नेह घटं नयति ॥ ॥कर्तृस्थे
चाशरीरे कर्मणि ॥ नयतेः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्ने एव स्यात् शरीरपदमत्र तदवयवपरं चैत्रत्वादिजातीनां
शरीरवृत्तितया तन्नाशात्माप्यत्वस्यैव जीवस्य कर्तृतया शरीरस्य शरीरत्वासंभवात् यद्यपि शरीरादिविच्छेलौकिकैरनिष्ठेपि वक्तारः

सि०मु०

शरीरतादात्म्यापत्तेः कर्तृत्वानुपयोगः कृतिसमवायित्वरूपस्य तस्यात्ममात्रवृत्तित्वात् शरीरस्य तत्ववच्छेदकतयैव तदाश्रयत्वात् तथाप्यत्रो भ
यसाधारणमेव वा अयं तं विवहितं चैत्रः कर्तेति व्यवहारात् क्रोधं विनयते स्वकीयं क्रोधं निरस्यतीत्यर्थः क्रोधापगकलस्य वित्तप्रसादादेः क
र्तृगतत्वेपि वशीयां करोतीत्यर्थे ग्रास्यर्थे वात्र कृत्ज्ञोहृत्तिरित्यन्ये संपदस्तव गिरामपि हरापन्ननाम विनयं विनयंते इति श्रीहर्षः विनयंतीत्येव पाठ
इति नारायणाः एण्प्रगतो वित्तस्यातं भाविनरापद्यस्य प्रयोगामिति व्याख्यातमस्माभिः॥ ॥वृत्तिसर्गतायनेषु क्रमः॥ वृत्तिरप्रतिबंधः अव्य
स्य क्रमते बुद्धिः सर्गउत्साहः येनेंद्रलोकावजयाय सृष्ट इति दर्शनात् अध्ययनाय क्रमते तायनं स्फीततानाक्रमंते स्मिन् शास्त्राणि स्फीतानि
निभवंतीत्यर्थः उपपराभ्यां सोपसर्गो नियमार्थमिदं वृत्त्यादिषु पराइत्युपसर्ग पूर्वकादेव क्रमेरात्मनेपदं उपक्रमते नियमान्नेह संक्राम
ति वृत्त्यादिष्वेव नेह अपक्रामति पराक्रामति॥ ॥आङ उद्गमने ज्योतिरुद्गमनइति वक्तव्यं आक्रमते आदित्यः उदयतइत्यर्थः उद्गमनार्थः क्रमि ११०
रकर्मकः नेह आक्रामति धूमो हर्म्यतलात् हर्म्यतलमिति भाष्ये तद् उद्गमनपूर्विकायां व्याप्तौ क्रमिर्वोध्यः नेभः समाक्रामति चंद्रमाः कौमारि
स्यत्र व्याप्तिरेवार्थो नत्वद्गमनमिति कैयटः॥ ॥वेःपादविहरणे॥ साधु क्रमते वाजी क्रमेः पादविक्षेपवृत्तित्वेपि धातूनामनेकार्थत्वाद

प्रो

र्थांतरे आत्मनेपदं वा ग्रहणापार्थो निर्देशः नेह विश्राममत्यजिन संधिः स्फुटतीत्यर्थः ओष्ठाभ्यां समर्थाभ्यां समर्थत्वं समानार्थत्वं एकंधादिः स
मशाहृ एव वा तत्रार्थं ७ प्रक्रमते उपक्रमते आरभत इत्यर्थः आरंभे किं प्रक्रामति उपक्रामति इह गमनमात्र मनेऽर्थौ उपपराभ्यामित्यस्यापि न प२
प्रवृत्तिः वृत्साद्देरत्राविवक्षितत्वात् ॥ ॥अनुपसर्गाद्वा क्रामति क्रामते अप्राप्तविभाषेयं उपपराभ्यामित्यस्य नियमार्थतया वृत्तिसर्गा।
त्यादेरनुपसर्गविषयकत्वात् ॥ ॥अपह्नवे ज्ञः शतमपजानीते अपलपतीत्यर्थः अकर्मकाच्च सर्पिषो जानीते सर्पिषा उपायेन प्रवर्त्तत इ
त्यर्थः जानातेरत्र ज्ञानपूर्वकप्रवृत्तिपरत्वात् ज्ञोविदर्थस्येति करणे षष्ठी सकर्मकत्वादिति तु नोक्तं स्वरेण पुत्रं जानातीत्यत्रातिव्याप्तेः ॥ ॥ धी४
संप्रतिभ्यामनाध्याने शतं संजानीते अवेक्षत इत्यर्थः अनाध्याने किं मातुः संजानाति अधीगर्थेति षष्ठी न चैतच्छेषादनुवृत्तेरकर्म।
काच्चेति पूर्वेणात्मनेपदापत्तिः अनाध्यान इति विभज्य पूर्वशेषतयापि तस्य व्याख्यानात् ॥ ॥भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्र
णेषु वदः उपसंभाषोपमंत्रणे वाच्ये अत्येउपाधयः शास्त्रे वदते भासमानो ब्रवीतीत्यर्थः शिष्यैः स्तूयमानो हि भासते तेजो भंगे तु
न शक्नुयाद्धर्तुमिति भासनं हेतुभूतं सद्विशेषणमित्याहुः कर्मकरानुपवदते उपसांत्वयतीत्यर्थः शास्त्रे वदते उक्तिविषयकज्ञानवानित्य

सि॰सु॰ध

र्थः क्षेत्रे वदते तद्विषयकोत्साहं स्फुरयतीत्यर्थः आविः करणानुपस्य वदत्यर्थस्य यत्नः कर्मेति केचित् विशिष्ट एव वदत्यर्थ इत्यन्ये क्षेत्रे विवदन्ते वि
मत्या हेतुभूतया नानाविधं भाषन्त इत्यर्थः एतेषु किं यत्किंचिद्वदति॥ ॥व्यक्तवाचां समुच्चारणे॥ व्यक्ता वाचि वर्णा येषां ते मनुष्यादयः व्यधिकरण
बहुव्रीह्याश्रयणात् समुच्चारणं सम्भूयोच्चारणं संप्रवदन्ते ब्राह्मणाः नेह वरतनु संप्रवदन्ति कुक्कुटाः मुक्ते सारिकादीनां न सर्ववर्णविषयकं यत्क
वाक्यं अपि तु स्वस्वअपलवशेन कतिपयवर्णविषयमिति तत्रात्मनेपदं नेति कैयटः॥ ॥अनोरकर्मकात्॥ अनुवदते कठः कलापस्य अनु
सादृश्ये तृतीयार्थयोगे शेषे षष्ठी अकर्मकात् किं पूर्वमपि यद्गीरं नः स्तम्बेरमो धप्रयुक्तो मनुवदति मुकुन्दस्तं मंजुवाक्यं जरस्थः व्यक्तवाचामि
त्येव अनुवदति वीणा॥ ॥विभाषा विप्रलापे॥ विप्रलापो विरोधोक्तिः विप्रवदन्ते विप्रवदन्ति वा वैद्याः युगपत्परस्परविरुद्धं वदन्तीत्यर्थः
विप्रलापे किं संप्रवदन्ते ब्राह्मणाः व्यक्तवाचां किं विप्रवदति शकुनयः समुच्चारणे किं क्रमेण विप्रवदन्ति॥ ॥अवाद्ग्रः॥ अवगिरते अवात्
किं गिरति॰ ग्रणाने त्विह पूर्वस्य प्रयोगो नास्तीति भाष्यं॥ ॥समः प्रतिज्ञाने॥ नित्यं शब्दं संगिरते मीमांसकः शब्दो नित्य इति प्रतिजानीत इत्यर्थः एम०
नेह संगिरति ग्रासं॥ ॥उदश्चरः सकर्मकात्॥ धर्ममुच्चरते उल्लङ्घ्य गच्छतीत्यर्थः देहि मे रमणीयमंबरमणो धाम स्वं तेन चरति मुरारिः सकर्मका

किंदितेस्तदायः स्वनउक्ष्वचारः उत्पन्न इत्यर्थः ॥ ॥समस्तृतीयायुक्तात् ॥ पभ्यांनपः संचरमाणएव; तृतीयेतिकिं उभौलोकौ संचरसि इमं
चामुं च देवलदाणश्चसाचेच्चतुर्थ्यर्थे संपूर्वाद्दाणस्तृतीयायुक्तादात्मनेपदं स्यात् तृतीयाचेच्चतुर्थ्यर्थे दास्यासंयच्छते कामुकः सन्नृतस्यैददातीत्य
र्थः तृतीयापाने नैव चतुर्थ्यर्थे विधीयते वेच्छदस्य वकारार्थत्वादिति संप्रदायः अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीयेतिवार्तिकं तदंशेस्य प्रकरणार्थं
भाष्येलिदं सूत्रमपि प्रत्याख्यातं तदुक्तं सहयुक्तेऽप्रधाने तृतीयास्याद्व्यतिहारे तङो विधिः योदास्या दत्ते भुंक्ते स्व पंचतस्येददाति तत्रापप्रयोगाइष्टः तत्र
सहयोगे तृतीया कर्मव्यतिहारे चात्मनेपदमिति सिद्धं दास्यै विश्राणयन्तया सहोपभुंक्ते इति कैयटः ॥ ॥उपाद्यमः स्वकरणे ॥ अस्वस्य सतो
याःस्वीयत्वसंपादनं तत्रेदं विप्रस्य पक्षस्य समर्थानां प्रथमाद्वेति किम् स्वान्नेहलतः भार्यामुपयच्छते नेह स्वं शाटकमुपयच्छति · पाणिग्रह
णएवेदमिति वृत्तिः तद्भाष्यानुक्तत्वादुपेक्ष्यं उपायंस्त महास्त्राणीत्यादिविरोधाच्च ॥ ॥ज्ञाश्रुस्मृदृशां सनः ॥ सोपसर्गाणामत्रार्थे आ
त्मनेपदं पूर्ववदुक्तं तद्भिन्नार्थमारंभः स्मरतेस्तु अप्राप्तावेव धर्मं जिज्ञासते शुश्रूषते सुस्मूर्षते दिदृक्षते ॥ ॥नानोर्ज्ञः ॥ पुत्रमनु
जिज्ञासति पूर्वप्राप्तेरयं निषेधः अनंतरस्येति न्यायात् · तेन सकर्मकस्येति निषेधः अकर्मकात्तु पूर्ववत्सन इति भवत्येव · अकर्मका

सि॰सु॰धा॰ 12

स्वेत्यनेनाकेवलादिविधानात्. तेन गोषधस्यानुजिज्ञासते गोषधेन प्रवर्तितुमिच्छतीत्यर्थः॥ ॥प्रत्याङ्भ्यां श्रुवः॥ आभ्यामेतत्पदं न स्यात्. प्रति
शुश्रूषति आशुश्रूषति. परस्परस्मादुपर्युपयते गग्रहणान्नेह देवदत्तं प्रतिशुश्रूषते लक्षणेत्थंभूतेति प्रतिः॥ कर्मप्रवचनीया॥ ॥
शदेः शितः॥ शितः प्रकृतिभूतात् शदेरात्मनेपदं स्यात्. शीयते. शितः किं शत्स्यति. अशत्स्यत्. शेषादिति परस्मैपदं. उपसर्गपूर्वनियमे ऽप्यवीवउप
संख्यानं. न्यविशत. व्यक्रीणीत. यद्यपि विकरणेभ्यो नियमो बलीयानित्युक्तं तत्र च विकरणोत्पत्तेः प्रागेव नियमः. ततो नित्यत्वादिविकरणः ततो
ऽडागम इति चार्त्तिकं गतार्थं तथापि तदनाश्रित्यायमारंभः. न च धात्वव्यवधानादटो न व्यवधायकत्वं विकरणस्यांगत्वात् समुदायादेव यस्मा
त् धातुग्रहणेनानुपादानात्. न च परत्वादट् कृताकृतप्रसंगित्वेन विकरणान्नित्यत्वात्. अडभ्यां शब्दांतरस्य प्राप्नुवन्विधिरनित्य इत्यनित्यत्वात्. न च
कृते ऽटि अन्यस्मात् आत्मनेपदविकरणोत्पत्तिः शब्दांतरप्राप्नुवतो ऽनित्यत्वान्नेत्यर्थः. न च लादेशात्पूर्वं परत्वादडागमः लादेशस्य कृताकृतप्रसंगित्वे
न नित्यत्वात् कृते यदि धातुग्रहणेन तदुद्ग्रहणादव्यवधायकत्वात्. अडागमस्तु नित्यः लादेशोत्तरं विकरणोत्पत्तिर्नित्यत्वात् स्वरूपं तस्मादिति चेन्नात्. विक एम०
रणोत्तरं न शब्दांतरप्राप्तत्वात् यद्यपि लादेशे कृते तस्यानिमित्तत्वान्न लङादिसंप्रदेशात् टोनिमित्तसद्भावे विकरणोत्तरं नित्यत्वाट्टूगाद्यते तथा

पियस्य लक्षणं तेन निमित्तं विहन्यते नेन तदनित्यं अयोर्नित्ययोः परत्वादट् प्राप्नोति न च तथापि तस्य धातुत्वव्यवच्छेदावधायकत्वं नास्तीत्या
त्मनेपदं सिद्धमिति वाच्यं लादेशोत्तरं नियमात् सर्वे नित्यत्वाद्विकरणोत्पत्त्या आगमस्य विकरणं तेन त्वात् धातुत्वव्यवधायकत्वात्त्रापि परे श्र
व्यवहिता विरुद्धा द्वयोर्न मव्यवहितात्मनेपदं न स्यादिति वार्त्तिकाभिप्राय भाष्यकारस्तु लमात्रापेक्षतया लादेशात्परं गः अडागमस्तु तद्धि
शेषापेक्षत्वाद्बहिरङ्गः अथ लादेशेन समं न संप्रधारणा किंतु नियमेन सहैव लादेशोत्तरं हि विकरणः अडागमो नियमश्चेति त्रयं प्राप्नोति
तत्र यदि सर्वतो नियमो बलवान् स्यात्तदा प्रवृत्तिकं विनेवेष्टसिद्धिः स्यात् न च विकरणाभ्यां नियमो बलीयानिति निर्वाहः हन्तोपि विकरणो न व्यवधाय
क इति ज्ञापनेनापितः ज्ञापनस्यान्यथासिद्धिः नचैवं नित्य एव नियमः निवेक्षते निविशते इत्यादौ केवलविकरणस्य व्यवधायकत्वे स्थले नियमप्र
वृत्तावपि कृते विकरणे आगमस्य तेन व्यवधायकत्वात्तदप्रवृत्तेः न हि विकरणात्पूर्वं कर्त्तुं शक्यः अंगात्पूर्वं विकरणाप्तौ वा यत्वादन्यथा
तरन्तः तरन्तीति न स्यात् शपं विना गुणाभावात् तेषां दीर्घत्वात् तेनैव पूर्वमित्येवैव स्यात् अडाद्यपायमपास्य दांगपूर्वमप्याधितवं अन
यायुपाध्ये दित्यत्र आटः पूर्वमुपगतौ तद्विशिष्टस्यैव व्यक्तिभावापत्तेः वर्णमात्राप्रवृत्त्यादिच्छिमा [illegible] रे च पूर्वप्रवृत्तेः नैयमाणां दां [illegible]

सि·कु·४० वर्त्तीयः समानाश्रयत्वात्तः एकादेशस्य वादिवद्भावाद् छिभावेऽप्याच्छ्वदिति स्यान्नत्वाच्छ्वदितिः न च शङ्क्यं तदस्याकृते आडिति कृत्वा पुनर्भविष्य

 ति पुनर्छिभावः पुनराडित्यनवस्थाप्रसंगात् तस्मादार्तिकमावप्यकमितिचेत् न तत्र तत्रत्यन्तर्धनित्यमिदं विकरणाश्च नित्य इति त

स्यैव प्रवृत्तेः तरतीत्यादौ गुणस्यापि नित्यत्वात् स एव परत्वात् उपाच्छ्वदित्यत्रापि उक्तरीत्या पुनराट् न च पुनर्छिभावापत्तिः इष्टत्वात् अनवस्था

सम्भवात् इदं चाभ्युपगम्योक्तं वस्तुतः परत्वाद्द्विर्भावः पश्चादेकादेशः तस्मादेकादेशे कृते पुरस्तादडागमः न चाडागमो नित्यः शब्दान्तरस्य

प्राप्ताविव शब्दान्तरात् प्राप्नुवन्नपि अनित्यत्वेस्य प्रकृत्यात् कृताकृतप्रसंगित्वस्य साधारणत्वात् अंगत्वजात्याश्रयत्वाद्वाडागमस्य पश्चात्तर

प्राप्तिविरहात् यद्वा नेरिति षष्ठी वनतु पंचमी व्यवहितस्याप्यर्थद्वारेणाविशेषणत्वासम्बन्धोपपत्ते यद्वा निशब्दात्परमात्मनेपदं तेविशतइति

पदं साधु भवतीति नेर्विशइत्यस्यार्थः सत्यप्यडागमेनेः पदमनन्तरमेवेति दोषाभावइत्याहुः ॥ ॥म्रियतेर्लुङ्लिङोश्च॥ शितो लुङ्लि

ङोश्च प्रकृतिभूतो यो म्रियतिस्तत एवात्मनेपदं नान्यस्मात् शित्करणं तिवं शिदुत्सेनेः प्रागेव योगपतयाच्याहं लुङ्लिङोः क्ङित्त्वस्यापोमेवो एम०

त्पत्ताविति भेदः म्रियते म्रियेत म्रियतां अम्रियत अमृत मृषीष्ट नियमः किं ममार मर्त्तासि मरिष्यति अमरिष्यत् मर्तोडि त्वंतु स्वरा

र्थं माभूदित्येतत्सूत्रं ङि॰ उपदेशात्परं लसार्वधातुकमिति निघातो यथा स्यात्॰ अस्ति॰ लोपस्यासिद्धत्वं ङित्वसामर्थ्यात्॰ नच निघातः ह्रि
चेति प्रतिषेधात्॥ ॥पूर्ववत्सनः॥ सुब्धाद्यात्मनेपदे यन्निमित्तं तत्सन्नन्तादप्यात्मनेपदं भवतीत्यर्थः एतावतैव निमित्तातिदेशोयमिति ध्य
वहारः पूर्वेण तुल्यमिति तृतीयान्ताद्वतिः पंचम्यन्तात्तद्विधानाभावात्॰ पूर्वस्मादिवेति ठगभ्योर्थः आस्तरोनन्तत्वं वैरूप्यादधीतइति वत्॰ तत्र।
आत्मनेपदं तदादानकाध्ययनपरं आसिसिषते शिशयिषते निविविक्षते बुभुक्षते इत्यादि नेह शिशासति मुमूर्षति॰ नत्वेषा शदिम्रि
यतिव्याप्तिः शीङ्प्रकृतिः अतो नात्मनेपदनिमित्तं सन्निकृष्टे तु सन्नन्तमेव शीङ्प्रकृतिः शिशयिषते इत्यादौ तु प्रकृतौ ङित्वान्नयापान्निमित्तातिदेश इति
धेषमं न चैवमनुविकीर्षतीत्यत्रातिप्रसंगः गंधनादेरर्थस्य ञित्वस्य वात्मनेपदनिमित्तस्यातिदेशापत्तेरिति वाच्यं अनुपराभ्यां कृञ इति य
पर्यालोचनया अनुपूर्वकत्वाभावविशिष्टस्यैव तस्यात्मनेपदनिमित्तत्वात्॰ यद्वा प्राकृततो येभ्य आत्मनेपदं तेभ्यः सन्नन्तेभ्योपि भवतीति
कार्यस्यैवातिदेशः सर्वातिदेशानां कार्यार्थत्वात्कार्यातिदेशस्य प्राधान्यात्॰ नच शदिम्रियोरतिप्रसंगः शदेः शितः म्रियतेर्लुङ्लिङोश्चेति स
त्रद्वयेपि सनो नेत्यनुवर्त्य वाक्यभेदेन व्याख्यानात्॰ जुगुप्सते इत्यादौ तु नित्यसन्नन्तत्वेन याप्राकृतान आत्मनेपदादर्शनादेव इतिदेशस्य न प्र

सि॰ सु॰ ४ वृत्तिः तथाप्यनुबंधासंङ्गादेवतत्रानुदात्तङित इत्यात्मनेपदमिति वक्ष्यते। अदयं वेः चरितार्थमिति न्यायात्। न च जुगुप्सयतीत्यादाव

14 नित्वात् सन्नर्यंतविशेषणेन चरितार्थत्वे तदतिरिक्तविशेषणे सत्ताभावात्। न च गोपयतीत्यादावतिव्याप्तिः सर्वेव विशेषणी

योनतु णिङः त्यत्रवीजाभावादिति वाच्यं यत्रार्थे निर्दिष्टो सत्रियते तदर्थकानामेवानुदात्तेत्वात्। अर्थांतरे त्वननुबंधकाश्च ए

दावेव गृपादय इति सि[illegible]तात्॥ ॥आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य॥ आम्प्रकृतिधातोरिवानुप्रयुज्यमानात्कृञोऽप्यात्म

नेपदं। आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। एकत्राभिप्रायार्थत्वं ईहांचक्रे न च ईहांचकारेत्यत्र प्रसंगः पूर्ववदित्यनुवृत्तेः। पू

र्ववदेवात्मनेपदं न तु तद्विपरीतमिति नियमार्थतया विवाक्यभेदेन व्याख्यानात्। कृञः किं अनुप्रयोगसामर्थ्यान्नात्र कृञ्

प्रत्याहारः। अतएवानुप्रयोगविधौ कृञ्ग्रहणं प्रत्याहारग्रहणं वक्ष्यते॥ ॥प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ युजिर्योगे इत्ययं स्वरितेत्तात्रधादेरकर्त्रभि

प्रायार्थो विधिः युजेः समाधावित्ति दिवादेरनुदात्तेत्त्वात्। यज्ञपात्रविषयतायास्तत्रासंभवाच्च स्वाद्यंतोपसृष्टादिति वक्तव्यं प्रोपाभ्यामित्यप राम॰

हाय यस्योपसर्गस्यादावंते वाऽजन्तिततस्यार्थोदिति पठनीयमित्यर्थः। तेनेह न। उद्युंक्ते नियुंक्ते अपयुंक्ते किं इंद्रं

विपात्राणि प्रयुनक्ति॥ ॥समः क्ष्णुवः॥ समो गम्यृच्छिभ्यामित्यतो विच्छिद्य पाठः सकर्मकादपि विधानार्थः संक्ष्णुते शस्त्रं वक्ष्णुः पीठे घर्षणात्तत्र शाकिरणकठिने संक्ष्णुवानः प्रपत्कानिति मुरारिः॥ ॥भुजोऽनवने॥ भुज पालनाभ्यवहारयोः अनवन इति पर्युदासाद्रक्षणार्थे आत्मनेपदविधानं तेन भुज कौटिल्य इत्यस्य न ग्रहणं संयोगवद्विप्रयोगस्यापि विशेषनिर्णयहेतुत्वात् अत एव सशंखचक्रो हरिरित्यत्रेवाऽशंखचक्रो हरिरित्यत्रापि हरिपदं नारायणपरं तदुक्तं संयोगो विप्रयोगश्चेत्युपक्रम्य विशेषस्मृतिहेतवः इति तच्चायमत्र सविस्तरं व्याख्यातं ओदनं भुङ्क्ते अनवने किम् महीं भुनक्ति बुभुजे पृथिवीपाल इत्यादौ उपभोग आत्मसात्करणं वाऽर्थः नेह विभुजति पाणिं तेनाऽनवनकौटिल्ययोरिति वार्त्तिकं स्पष्टार्थम्॥ ॥णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने॥ ण्यन्तादात्मनेपदं स्यादनाध्याने अणौ यत्कर्म णौ चेदिति द्वितीयं वाक्यं षष्ठी देनतछाक्षेपः यत्तदोर्नित्याभिसंबंधात् धर्मोत्तरस्य चानिर्देशात् कर्मत्वमेव सन्निधानात्तु तिनिर्दिश्यते अणौ यत्कर्म णौ चेत्तत्कर्मेति प्रितनिर्देशेन च कर्मान्तरव्यावृत्तिराक्षिप्यते· न त्वेणौ कर्मणो ण्यौ कर्मत्व सद्भावः प्रतिपाद्यते सकर्मेति वाक्यान्तरेणात्मस्य कर्त्तृत्वप्रतिपादनात् एकक्रियापेक्षया पूर्वपदे कस्य कर्मकर्त्तृत्वोभयविरोधात्· यथैषं वाक्यशे

सि०ध० यपरिकल्पनादणौ यकर्मणो वेत्र देवकर्मत्वेपवकाराध्याहाराकर्मान्तरनिवृत्तिलाभः ततः सकर्तृत्तिन्नीपंवाक्यं अणौकर्मणोणौ
15 कर्तृत्वप्रतिपादनपरं एवमेकवाक्यत्वे महावाक्यं लक्ष्यस्य संस्कारकमहावाक्यं संपद्यते न चैवं दर्शयन्ते भक्त्याग्राजेति भाष्योदाह
रणाविरोधः अणौ कर्मणो राज्ञोन्यस्य भक्त्यानिति कर्मणः सद्भावादिति वाच्यं अणंपतावस्थायां पंकर्तृकर्मणोनतिरिक्तस्यैव कर्मणो ग्राव
र्तनात् यथाआरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानिति इहत्वणंपतावस्थायां कर्तृरणां भक्त्यानामेवणौ कर्मत्वमिति भव
त्येवात्मनेपदं अतएवस्मरयत्येनं वनगुल्मः स्वयमेवेविप्रमुदाहरणां संगच्छते इति कैयटानुसारपर्यः ननु यदित्यनेन न कर्मवेपातनतुके
न्तोणाति कथं कर्तृकर्मातिरिक्तकर्मव्यवच्छेदलाभः इतिवाच्यं कर्त्रेरिकर्मव्यतिहारइत्यतः कर्त्तरीत्यनुवर्तने प्रथमान्तत्वेन विपरिणामप्यपद्ये
यश्चेतिनपुंसकमनपुंसकेनेत्येकशेषमेकवद्भावं च कृत्वा व्याख्यानात् एवं च करेणुरारोहयते निषादिनमिति माघप्रयोगोप्युपपद्य
ते अत्रेदमवधेयं अणंपतेवत्कर्मतदन्यकर्त्रभावेतत्रकर्तृत्वेवकर्मकर्तृत्वादेवात्मनेपदं सिद्धं तथाहि लुनातिकेदारं देवदत्तो लूयते केदा एम०
रः स्वयमेवेति यथाकेदारः कर्मकर्त्ता तथा लावयते केदारः स्वयमेवेतिणंपतेपि लुनातिहिं द्विधाभवनोपसर्जने द्विधाभावनेवर्त्तते

फलावच्छिन्नव्यापारत्वाच्छित्वस्य सकर्मकत्वाभावप्रसङ्गात् । लुनाति केदारं देवदत्तः छिदाभवं तं द्विधाभावयतीत्यर्थः सौकर्यातिश
यविवक्षायां तु देवदत्तव्यापारस्याविवक्षायां द्विधाभवनमात्रं तदर्थः धातूनामनेकार्थत्वात् । वस्तुतोऽर्थभेदेन धातुभेदः स्वारूप्यात्तु त
त्त्वाध्यवसायः तत्र द्विधाभवने कर्तुः केदारस्य कर्मवत्कर्मणा तुल्यक्रिय इति कर्मकार्याणामतिदेशात् । लूयते केदारः स्वयमेवेति प्रयोगः
स्वयमिति वचनं कर्त्रन्तरव्युदासार्थं आत्मनेत्यर्थे तु तदपेक्षया कर्मत्वमस्त्येवेति कर्मणि लकारेणैव सिद्धं स्यात् । यद्वा तेनात्मनः करणत्वे
मात्रं प्रतिपाद्यं प्रकृते तु द्विधाभवनमात्रवृत्तेर्लुनातेर्यदा देवदत्तादिप्रयोजकव्यापारे णिजुत्पद्यते तदा लुनाति केदारं देवदत्तः लावयति के
दारं देवदत्त इत्यनयोरुक्तोऽर्थः पुनः सौकर्यातिशयविवक्षायां अविवक्षिते देवदत्तव्यापारे द्विधाभवनमात्रं लावयतेरर्थः तत्र लूयते केदा
रः स्वयमेवेत्यनेन समानो लावयते केदारः स्वयमेवेत्यस्यार्थः न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो निवृत्तिः उपायनिवृत्तावप्यु
पेयानिवृत्तेः सिद्धशब्दव्युत्पत्तये प्रकृतिप्रत्ययविभागस्य अर्थोपादानस्य ग्राम्योऽप्यस्वीकारात् । अत एव शिखीनयं इत्यादौ विशेषणाध्यस्त
मात्रपरत्वेऽपि मत्वर्थीयस्य न निवृत्तिः तदुक्तं निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते इति । सोऽयं निवृत्तप्रेषणपक्षः भवति निवृत्तप्रे

सि॰ध॰ षणापत्ते कर्तृत्वाच्चतुष्टयं नामसु प्रथमत्वौ पेप्सितौ पतुर्थे चतत्त्वार्थे इति विवेकः। अथाध्यारोपितप्रेषणापत्तेः लुनाति केदारं देवदत्तः। लुनं

16 तं देवदत्तं सौकर्यातिशयात्केदारः स्वयमेवेति केदारव्यापारे सिद्धे लावयति केदारो देवदत्तेनेति देवदत्तनिष्ठो यो लवनानुकूलो व्यापारस्त

दनुकूलव्यापारवानित्यर्थः सच व्यापारो लवने सौकर्यप्रयोजकः शालिपाकादिः पुनः प्रयोज्यप्रयोजकभावाविवक्षायां प्रकृत्या णिचाबो

पात्तेयोः प्रेषणायोऽपि गपत्याणे लावयते केदारः स्वयमेवेति स्तोभवंति केदारो ऽध्यारोपितप्रेषे अत्र निवृत्तप्रेषणासमककर्तृत्वात्तुल्यस्वा

र्थः एवं स्थिते निवृत्तप्रेषणाक्रियायां कर्मवत्कर्मणा तुल्यक्रिय इत्यात्मनेपदं सिद्धं लावयति केदारं देवदत्त इति लावयतेर्यादृशी कर्मविवक्षायां केदार

स्य द्विधा भवनवक्षणा क्रिया तादृश्येव तस्मिन् धातौ कर्त्रवस्थायामिति तोरणाविति सूत्रमनारभ्यं नचाध्यारोपितप्रेषणापत्तेस्त्रा

रोहयतीत्यत्र हस्तिनः कर्मत्वाभावात्तस्मात्र धातौ कर्मत्वं नास्तीति पंचत्योदनं देवदत्तोराध्यात्मोदनः स्वयमेवेति वत्कर्मवद्भावो न

स्यादिति वाच्यं अध्यारोपितप्रेषणापत्तेः परित्याषेप्रिक्षत्यविरहात् निवृत्तप्रेषणाक्रियायैव सर्वेष्टसिद्धेः नच प्रकृतिराणिंवत्स्यर्थे एम०

मिदं अणौ यत्कर्मणौ चेत्स कर्त्तानोनेदाराणौरात्मनेपदमेव नान्यदिति नियमार्थत्वादिति वाच्यं पक्षिणोः प्रविष्टेधेदेतु मसोक्तिरुह

न्नामुपसंख्यानं इति वार्त्तिकस्यावश्यकतया तत एव तत्सिद्धेः। ननु उदस्यपुच्छं उत्पुच्छे स्वयमेवेत्य हेतुमत्सौ यक्किणोः प्रतिषेधार्थं सूत्रं न तु पु
च्छशब्दस्य व्यवाचकेतयात्र ण्यन्तावस्थायां कर्मणा एवाभावात् अकूलं सूत्रेणापि तदुर्वारं उत्पुच्छयते स्वपुच्छं कर्मिकायाम् उदसनक्रि
यायां वर्त्तते तस्मात् स्वार्थे णिङ्। यदा त्वस्य माणपुच्छं संस्कारवशात् कर्मिभ्रमणक्रियायां भूतावस्थातं तत्रेण विवृतेन दा उत्पु।
पुच्छते नाम्नेन पदमेव णिङ्। तथा यथा स्यादिति नियमः इति चेत् न हेतुमत्यपेव वार्त्तिकस्य भारद्वाजीये पठ्यमानत्वात्। अन्य
था गणपतिगणांगोपालकः। गणपतिगणः स्वयमेवेत्यत्र यक्किणोः प्रतिषेधार्थं वैवचनांतरमारम्भं स्यात्। गणस्य णा वेवक
र्मत्वात्मं कृत नियमेन तत्र यक्किणोर्दुर्वारत्वात्। नन्वत्र कर्मवद्भावस्यैव दौर्लभ्यं तथा हि कर्मस्थभावकानां कर्मस्थक्रियाणां चक
र्मवद्भावः क्रियाभावयोश्च परिस्पन्दाद्विरहान्यतरविशिष्टसाधनेसाध्यत्वाद्युद्भव हारः। गणनं च संख्यानिमित्तः परिच्छेदो ज्ञान
विशेषात्मकः कर्तरि वर्त्तते न तु कर्मणीति चेत् न भागशोऽवस्थापनेऽपि गणयतिर्वर्त्तते भागशो वतिष्ठमानं गणं गोपालकोऽव
स्थापयति तत्रानुकूलत्वाऽणस्यैव कर्तृत्वविवक्षायां कर्मस्थभावकत्वात् कर्मवद्भावप्रसक्तेः। अत्र विवरणाकाराः पुच्छशब्दस्यातोक

सि॰धा॰ कर्मत्वेप्येतत्सूत्रस्य न तत्र प्रवृत्तिरिति भाष्यकैयटयोः स्थावं ऽभ्युपगम्यवादमात्रं वस्तुगत्या पृच्छशब्दस्य तत्कर्मकक्रियायामवृत्तेरनुभ
17 वविरोधात्। अत एव गणोरिति सामान्यग्रहणे विप्रच्छिभ्यां ङिद्विशिष्टेनग्रहणं। अणौकर्मणो संभवादिति हरदत्तेनाप्युक्तमित्याहुः।
अथाणौकर्मणो णौकर्मत्वे आत्मनेपदं यथा स्यात्। णौ तु कर्मणो णौ कर्तृत्वे मा भूदित्येतदर्थमिदं सूत्रमिति चेत् न। अत्राप्यात्म
नेपदस्येष्टत्वात्। निमित्तास्मिन्नः केवलानां रादीनां प्रयोगाभावादणौ कर्मणोऽसंभवास्मेरिति हेतुमण्णिचोऽग्रहणं। अणाविति
प्रतिषेधो पितस्यैव सत्वासत्वान्नाप्यः। इत्यहेतुमण्णौ गणस्य कर्मत्वं हेतुमण्णौ कर्तृत्वमिति प्रकृतसूत्रेणाप्यात्मनेपदस्य दुर्वारत्वा
त्। नन्वनिर्दिष्टविषयस्य प्रतिषेधस्य विधानमशक्यत्वात् अनाध्यानइति प्रतिषेधार्थं सर्वं सूत्रमारभ्यते स्मरति वनगुल्मं कोकिलः।
स्मरयत्येनं वनगुल्मः। स्वयमेवेत्यत्रात्मनेपदं मा भूदिति चेत् न कर्तृस्थभावकत्वाद्वेकर्मवद्भावस्य सत्त्वाभावात् इति प्राचोक्तसिद्धान्तः। राम॰
कर्मस्थभावकेषु कर्मवद्भावेन सिद्धावपि कर्तृस्थभावकेष्वात्मनेपदविधानार्थं सूत्रं तथाहि दुहिर्गतिविशेषवचनइति
प क्रियापरं श्छंदसि इत्यत्र वक्ष्यतीति भाष्यकृता तन्नवेमण्गाभावक्रयस्यफलस्यात्रापि कर्मस्थत्वमस्त्येवेति वाच्यं तस्यफलत्वाभावात् तदुक्तं

वाक्यपदीये· विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता· अतः क्रियाकृतविशेषदर्शनेन श
ब्दार्थानुसारेण वा क्रियायाः स्थानं व्यवतिष्ठते अतः पच्यादिधातूनां क्रिया कर्मस्था विक्लित्त्यादिमत्तया तत्र तण्डुलादेरुपलम्भा
त्· क्रियानिवृत्तावपि यत्र तत्फलतो विशेषः कर्मण्युपलभ्यते तत्रैव क्रियायाः कर्मस्थत्वात्· जानातीत्यादौ तु न तथेति स्पष्टमेव· आरो
हतीत्यत्राप्युपरिगमनानुकूलव्यापारस्य धात्वर्थत्वेन तु हस्त्यादिस्थभावानुकूलः उपरिगच्छेयमित्येवं व्यपदेशो न तु हस्तिनो न भावो
भवतीति अत एव भूमिदेशात्वां न मयत्यारोहतीति न प्रयोगः तस्मादारोहतीति न प्रयोगः तस्मादारोहत्यादीनां कर्मस्थभावकत्वा
भावात्तेनात्मनेपदं मनेन विधीयते तथाहि आरोहन्ति हस्तिनं हस्तिपकाः ऽभावयन्तीत्यर्थः ततो हस्तिपकव्यापारपरित्यागे आरोहन्
ति हस्ती न्यग्भवतीत्यर्थः तदुक्तं हरिणा· निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितं निर्वर्त्यमानं कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते इति निवृत्तप्रेषणं का
र्त्रव्यापारजन्यफलाश्रयत्वेनाविवक्षितं स्वनिष्ठविशिष्टक्रियावयवेच्छेदकतया क्रियावयवे फलात्मके स्थितं तथा तत्त्वेन विवक्षितं तादृशस
मभिव्याहारे फलस्यैव क्रियात्वात्तदाश्रयस्य कर्तृत्वं विशिष्टपरत्वे तु व्यापारस्यैव क्रियात्वात्फलाश्रयस्य कर्मत्वमेवेत्यर्थः ततो निष्ठ

सि·धा०
18

हत्वप्रेषणमस्मिंश्च आरोहयंति हस्तिनं हस्तिपकाः आरोहन्तीत्यर्थः पुनरण्यर्थत्यागे आरोहयते हस्ती स्वयमेवेत्यर्थः तदुक्तं स्वगमावनं स्वग-
मभवनं रूढौ शुद्धे प्रतीयते स्वगमावनं स्वगमभवनं ण्यन्ते विप्रतिपद्यते अवस्थां पञ्चमीमाहुर्ण्यन्ते तत्कर्मकर्तरि निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णि-
तुच्यते यद्यपि प्रथमकक्षायां फलावच्छिन्नव्यापारप्रतीत्या स्वगमभवनमपि प्रतीयत एव तथापि विशेष्यत्वं स्वगमावनस्यैवेत्यर्थः ततः शु-
द्ध एव व्यापारांशपरित्यागे स्वगमभवनमेव प्रतीयत इति द्वितीयकक्षा ततो ण्यन्ते प्रथमकक्षावदेव स्वगमावनं बुध्यत इति तृतीयकक्षा· अयं
तु विशेषः शुद्धे उभयमपि तु हेत्वर्थः ण्यन्ते तु हेतौ स्वगमभवनं णिचश्च व्यापारोऽर्थ इति· ततो णिजर्थव्यापाराविवक्षायां द्वितीयकक्षावदेव चतुर्थ-
कक्षा अत्र शुद्धे ण्यन्ते च स्वगमावनं शब्दात्प्रतीयते स्वगमभवनं तु लक्षणयेति विवेकः प्राकृतेऽर्थे इत्यस्य शकलस्य उभयसाधारणो प्रकृतिसं-
बन्धिनीत्यर्थ इति केचित् निवृत्तप्रेषणादित्यपोऽप्यव्यापारमात्राभिधायिनः प्राकृते प्रकृतिवाच्ये इति तु विवरणकारः तेषामयं भावः फ-
लावच्छिन्नव्यापारे धातुशक्तिस्वीकारे फलमात्रबोधो लक्षणयैव विशिष्टवाचकानां विशेषणमात्रपरत्वे लक्षणाया एव स्वीका- रम०
रात्· फले व्यापारे च खण्डशक्तिस्वीकारे तु तात्पर्यविरहात् व्यापारानवबोधे फलप्रतीतिः शक्त्यैवेति· यदि त्वेकोच्चारणान्तर्भावेन वर्खंडशक्ते

र्वा यत्तया प्रत्येकरूपेण बोधने लक्षणेति व अत एव दुष्प्रापं तान्हि पदार्थं इत्युक्तस्य पदानान्तरमात्रप्रकारको बोधो लक्षणयैवेति सिद्धान्तः इति न व्युत्प-
त्तिरी श्रीपते न दध्नाम्नवनेबोधो लक्षणायैवेति बोध्यं स्यादेतत् केवलाचतुष्टयस्यैवाभोक्तृत्वात्पंचप्रीत्यर्थं एवं कथमिति चेत् अत्राहुः उ-
कोरीत्या कक्षाचतुष्टयबोधे ततः प्रकृतसूत्रेणात्मनेपदं भवति पाणत इति व्युत्पत्तिक्रमापेक्षया पंचमत्वं प्रयोगार्हं तेन कक्षाचतुष्टयमेवेति
केचित् कौस्तुभकृतस्तु विशिष्टवाचकयोरुद्धृत्य पंचमत्वं वाक्यार्थशोभावाचकभेदाद्देधा गणापित्यागतो पकर्तायामक्षाचतुष्टयं पंचते तु र्थ
कक्षापातुं पंचमस्पष्टमेवेति विवक्षितमित्याहुः एवं विषयत्वाययस्पर्शजनविषयत्वायान्नार्थो दृशिः पश्यंति भवं भक्ताः चाक्षुषविषयं कु-
र्वतीत्यर्थः भक्ता याः परस्परदृष्ट्यागे पश्यन्ति भवः चाक्षुषविषयो भवतीत्यर्थः अयं तु विशेषः लुङ्नोपादेर्वृद्धिज्ञमेव णिद्वितीयकक्षा-
यां कर्मस्थभावक्रियकोकर्मवदाचरवृत्तिः न तत्रात्मनेपदमिति तथा च वृत्तिः हृदि कर्तृस्थक्रियः दृशिः कर्तृस्थभाव इति तद्प्रयोगे व्या-
ख्यात ततः परं पतंत्रे रमतीति रीति दर्शयति भवं भक्ताः प्रथमकक्षावदर्थः पुनर्न्यां पश्यं स्यादिवात्नायो दर्शयते भवः द्वितीयका-
क्षावदर्थः प्रकृतसूत्रेणात्मनेपदमिति दिक् अत्र केचित्ताः एवं वरीयं तां कैयटादीनां प्रकृतसूत्रे भाष्यवार्त्तिकयोरर्थविरोधः

सि०व्या० आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्राणिचाणिशंकायां मनुष्यानिति कर्मान्तरसम्भावान्नेति हि प्रथमेऽग्रघट्टके कर्मक
19 र्तृत्वासिद्धमिति शंकापायाक्रियते। निष्टत्वर्थमिति द्वितीये कर्तृस्थभावकार्थमिति तृतीये स्थितं तत्राद्यो विरुद्धः मनुष्याणामणौ कर्तृ
त्वात्. मनुष्यस्थलयोरणौ कर्तृकर्मणोरेवेह कर्मत्वात् तदतिरिक्तकर्माभावादात्मनेपदस्य दुर्वारत्वात्. द्वितीयोपि विरुद्धः त्वदुक्त
रीत्या कर्मवद्भावस्यैवाभावात्. कर्मवदकर्मकाणामिति हि वार्तिकं अत एव नन्तृतीयोपि तथावोद्देश्यविस्मृतेरेवापत्तेरिति महा
नयं महतामपि प्रमादः किंच कर्मान्तरनिवृत्तिपरवाक्यस्यानिःफलत्वमेव स्यात् उदाहरणादौर्लभ्यात्. न ह्यणौ ये कर्तृकर्मणी त
द्भिन्नं कर्मणो संभवति यदनेन व्यावर्त्येतेति. तत्र केचिदाहुः प्रथमप्रघट्टके तावन्मनुष्यानिति कर्मणः सत्वान्नाणिचाणिरित्यस्य ह
रदत्तादिभिरुक्तावपि कैयटेनानुक्तत्वात् स्थलरूपस्य कर्मणः सत्वान्नाणिचाणिरित्येवं तदभिप्रायत्. न द्वितीयः वार्तिककाराभिम
तनियमार्थत्वं दूषयित्वा सूत्रस्य विध्यर्थत्वव्यवस्थापनपभाष्यानुसारिणः कैयटस्य द्वितीयप्रघट्टकवार्तिकविरोधस्याऽकिंचित्करत्वा एम०
त्. कर्तृस्थभावकियेषु सूत्रस्य विध्यर्थता ग्राह्या यापि सीकाराद्व न तृतीयः तृतीयप्रघट्टकभाष्यानुसारेणैव कैयटेन तथार्थस्यव

वर्णितत्वात्· एवं वदतः सूत्रस्यैवेदं रूपविस्मरणात्· तदयं निष्कर्षः कर्तृस्थक्रियार्थत्वात् आरंभ इत्येव हि भाष्यकाराभिप्रायो न तु यादृशस्थ लोके
र्मकर्तृस्थक्रियस्य धातुत्वे तत्रैव तत्प्रवृत्तिरिति तत्पदं तमपि मानाभावात्· कैयटव्याख्याने तु दर्शयते भक्त्या तत्र जेतुरुदाहरणस्यान्यत्र
आरम्भकत्वात्· न च कर्मकर्तृत्वास्सिद्धमिति शंकितव्यात् कर्मकर्मभेदोदाहरणमिति वाच्यं तस्यालौकिकत्वे केदार इत्येतन्मात्रविषयकत्वात्·
अन्यथा स्मरयत्येनं वनगुल्मः स्वयमेवेति प्रत्युदाहरणमसंगतं स्यात्· यत्तु तत्र कैयटादिभिरुक्तं कर्मेदं न विवक्षितं अत्र ह्येनमिति
कर्मणः सत्त्वात्· कर्मवत्कर्मणा तुल्यक्रिय इति वचनात् कर्मवद्भावस्य प्राप्तिर्नास्ति न त्वेतत्सूत्रेणात्मनेपदस्य कर्मान्तरसद्भावात्· तस्मात्स्म
रयति वनगुल्मः स्वयमेवेति मद्दर्शनीयं स्मरत्याध्याने घटादिः अकर्मकस्मृतौ विषयो भवतीत्यर्थः यद्वा व्याख्यानं गम्भीरपानं घोष
इत्यत्र गम्भीरत्वं दीपदार्थे योगे भेदयोगो भ्रान्तं तदन्तीरलेखणायामपि प्राथमिकबोधमादाय गम्भीरपदस्यार्थक्यवच्छिन्नत्य धारोपितत्वे श्रवणप
देद्वितीयकर्त्रा या कर्मत्वमन्विते ततोऽशिरार्थस्यैव कर्मतोपिपादितः गोविः कर्मपदस्य च प्राथमिकबोधमादाय कथं किसार्थकत्व स्व
ज्ञाप्यसंबंधो लक्षणोपगमात् ज्ञाप्यस्य चेह विशिष्टाकार्थरूपत्वात्· एषैव वार्थवादे प्राशस्त्यलक्षणाया गतिः सर्वपसिद्धाते

सि० धा०

20

व्याख्योपायः स्वाधीने तु शाब्दप्रयोगे कर्मविनिर्मुक्तमेव प्रयोक्तुमुचितं तदभ्युपगम्यवादमात्रं वार्त्तिकमतानुसारेणोक्तत्वात्। सूत्रशेषे
वेदपदे नोक्तरीत्या कर्मविवक्षायाः स्वयमेव प्रतिपादितत्वात् एतेन कर्मकर्त्तरि मूलोदाहरणानि कर्मवद्भावस्य कर्तृस्थभावक्रियत्वेने
तिसिद्धान्तशरीरं भाष्यवृत्त्यादिनिष्कर्षैः स्थितमिति निरस्तं अकर्मकमात्रपरत्वे मानाभावस्योक्तत्वात्। कर्मवद्भावविषये कर्तृस्थभावादि
विवतथाविधे सकर्मकेपि प्रवृत्तौ वाधकाभावात् एतेन गम्भीरायां इत्यादिकमप्यपास्तं तत्र के गम्भीरपदस्य जनितान्वयबोधत्वया
प्रकृतवाक्ये चोत्पद्यमानाकर्मतान्वयबोधस्यानुपधानेन वैषम्यात् यत्त्वत्र्यारोपितमेकराष्पदद्वितीयकर्त्रीयां कर्मान्वय इति तदसत् वाक्या
न्तरेऽन्वितत्वेपि तद्वाक्येऽन्वितत्वं विनासार्थक्याभावात्। शिवस्तुत्यर्थिकत्वेनाप्युपपत्त्यानवैयर्थ्यमिति वैषम्यं वाक्यान्तरेषु सर्ववाक्यानां
मन्वितत्वाद्वाक्यविशेषेऽन्वितपदोपादानानुपपत्त्याऽतिप्रसंगकत्वाच्च अर्थवादस्थले तु वायुर्वै क्षेपिष्ठा देवतेत्यादौ अर्थस्यां वाधितत्वेन
शक्यार्थज्ञानजन्यप्रशस्तिविषयीभूतदेवविशिष्टत्वगुणको वायुः स्वदैवत्यकर्मजन्यफलं शीघ्रं प्रयच्छतीत्येवं रूपवाक्यार्थसंबंधादेव स्तुतिरू रम०
पप्राशस्त्यं लक्ष्यते यजमानः प्रस्तर इत्यादौ तु यथाश्रुतस्यवाधात् गौण्या यजमानकार्यकारित्वसजातीयकार्यकारी प्रस्तर इति शा

हेर्ज्ञातेन तु तरं स्वकार्यकर्तृत्वेन रूपवाक्यार्थं संवेधात्माशास्येत्त्वं दृश्यते नत्वनन्वितश्रूयमाणपदार्थकस्यैव वाक्यार्थस्य तादृशिति न
किंचिदेतन्न स्यादेतत्· एवं सत्यध्यारोपितप्रेषणापक्षे द्वितीयकक्षायामप्यात्मनेपदमेव भवतीति पर्यवसाने लोवपतिके
दारो देवदत्तेनेत्यत्र परस्मैपदं कैयटेनैवमभ्युपमानमसंगतं स्यादिति अत्राहुः लेपकप्रमादादेव तथापाठ इतिः पत्नुविवर
णकारैस्तूक्तं णौ वेद्रूहत्वां समानक्रियत्वं न वारणं तेन समानक्रियत्वेऽपि तस्येत्यात्मनेपदं न कृतामिति· नद्वस्माणाहरद
न्तेग्रंथश्च णौ गाघमात्रप्रयुक्तत्वादुपेक्ष्यमिति अधिकमग्रे वक्ष्यामः यत्तूक्तं कर्मान्तरनिवृत्तिपरवाक्यस्य भावेऽपि नास्तीतिः त
द्सत्ः आरोहन्ति हस्तिनं हस्तिपकाः आरोह्यमाणो हस्ती स्थलमारोहयति मनुष्यानित्यस्य वार्त्तिकभाष्यकाराभ्यामेव व्या
ख्यातत्वात् तदभावेऽपि नस्य साहसमात्रत्वात् अयं तु विशेषः वार्त्तिकेऽणोपथाकृतस्य चार्थमादाय णेरात्मनेपदविधाने अणं
तस्य कर्मणस्तत्रोपलब्धिरितरथा हि सर्वप्रसंग इति हि विवरणमारब्धं अणंतस्य यत्कर्म यदा णंते तत्रैव कर्म भवति तदात्मनेपदमि
ति तदर्थः भाष्यकृता तु द्वितीयपक्षस्त्विकेन [illegible] टोक्तरीत्या ऽर्थांतरधायध्येरमाश्रित्य सत्रान्तरेऽप्यतिशक्तिर्यामिवीरिमेति नन्वणौ यत्क

सि॰ कौ॰ कर्मणीतदन्यकर्मव्यवच्छेदे तात्पर्यस्य कैयटेनोक्तत्वात् अत्र च आरोहति स्थलं मनुष्या इत्यत्र गौणकर्तृकर्मत्वात्स्यादेवात्मनेपदमि
21 ति चेत् न आरोहन्ति हस्तिनं हस्तिपका इत्यत्राऽरोहणकर्मत्वं यां हस्तिहस्तिपकाभ्यां अन्यस्य स्थलमिति कर्मणः सत्त्वात् न चारोहन्
ति स्थलं मनुष्या इत्यप्राप्तावस्थामादायाऽतिप्रसंग एवेति वाच्यं तस्यामवस्थायां परकर्मस्थलेन्यंतस्योक्तप्राप्तावस्थायां कर्तृत्व
विरहात् नीयवाक्यार्थे नैव तद्धारणात् आरोहन्ति हस्तिनं हस्तिपका इत्यप्राप्तावस्थायां कर्मणो हस्तिनः कर्तृत्वे आरोहति स्थ
लं मनुष्या इत्यप्राप्तावस्थायामपेक्षकर्तृकर्मणीति तदतिरिक्तकर्माभावं वादायातिप्रसंगस्यापादयितुमशक्यत्वात् तथा च तस्यामप्राप्ताव
स्थायां कर्मणोऽप्राप्ते कर्तृत्वे तस्यामेवापेक्षकर्तृकर्मणीति तदतिरिक्तकर्मव्यवच्छेदे तात्पर्यमिति पर्यवसन्नं आरोहयमाणो हस्ती स्वयमेव भवत्येवा
त्मनेपदं अध्यारोपितप्रेषणापेक्षत्वे तु नीयकर्तृत्वांशे विशेषाभावादेव तदतिरिक्तकर्माभावस्य सत्त्वात् दर्शयते भवस्यात्रा जेत्यत्र तदीयद्वितीय
कक्षायां तपश्यन्ति भवं राजा नमित्यप्राप्तावस्थायां कर्तृत्वेनामेव भवस्यानां कर्मत्वात् कर्तृकर्मातिरिक्तत्वाभावेन प्रयुक्तविशिष्टाभावादिति न
को ऽपि दोषः एतेन समस्तं तद्दर्शयते गतस्मयः कृताधिपत्यामिव साधुबंधुताम् इति भारविप्रयोगो व्याख्यातः ॥४॥ अत एव वृहत्कोशान्यतरस्यामि राम॰

त्यत्राभिवादिदृशोरात्मनेपदे उपसंख्यानमिति वार्त्तिकव्याख्यायां पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् राजा दर्शयते भृत्यै राजा इत्यत्रारोरणा
वितिश्चात्मनेपदमिति भाष्यकृद्भिर्व्याख्यातं न च कर्मसंज्ञाविरहस्यमेव तन्त्राद्ध्यमिति वाच्यं संकोचे मानाभावात् एतेन द्वितीयवाक्यार्थः अ
त्रास्त्येव गतार्थः ण्यन्तादात्मनेपदं स्यात् यो णौ कर्म णौ चेत्स कर्त्ता तेनैव प्रत्यासत्त्या तदुच्यते येन णिचा ण्यन्तादात्मनेपदं विधित्सितं अ
ण्यन्ते तत्रैव कर्तृत्वे यत्कर्म तदेव चेत् अस्मिन्नेव ण्यन्ते कर्त्तेति । इह तु यत्र यमुपाधिः कृतमेव तत्रात्मनेपदं आरोहयमाणा इति स्थलमारोह
यतीत्यत्र तु णौ कर्मणः स्थलस्य णौ कर्तृत्वाभावादयमुपाधिरेव नास्तीति नात्मनेपदप्रसंग इति तदप्यसत् आरोहन्ति हस्तिनं ह
स्तिपका इत्यत्र शानच् अकृतण्यन्तगतस्यैव तिङ्प्रकृतिण्यन्तगतस्यापि णौ रभावसत्त्वात् तत्र कर्मणो हस्तिनः स्थलमारोहयति मनुष्यानिति ण्य
न्ते कर्तृत्वसम्भवादिति प्रसंगस्य दुर्वारत्वात् ननु मनुष्याः स्थलमारोहन्तीत्यण्यन्ते कर्मणः स्थलस्य तत्र कर्तृत्वं नास्तीति चेत्तर्हि किं यावता मणौ ।
कर्मत्वं तावन्मात्रेणौ कर्तृत्वमित्यभिमतं प्रत्यासत्तिवादिनः ऊह्यमिति चेन्न आरोहयमाणो हस्तीत्यत्रैवाध्यारोपितग्रहणात् तीपकत्वानामपि आ
त्मनेपदाभावप्रसंगात् मनुष्याः स्थलमारोहन्तीत्यण्यन्तावस्थायां कर्मणः स्थलस्य तीपकत्वानां कर्तृत्वाभावात् एतेन णित्वे नै

सि॰सु॰धा 22

कंचग्रहीत्वा पाणन्यो ऽत्रक्रत्यंतर्गतस्य णेरभावे कर्मणो हस्तिन एवेति ऽ प्रकृति मृतत्वं ण्यंतार्थे कर्तृत्वादुक्तस्थले गति प्रसंग शंकोपपत्ति नित्या
पिनिरस्तं तिङ्प्रकृत्यंतर्गतणिजभावस्यापि तत्र सत्वेनोक्तरीत्यैवाति प्रसंगो पपत्तेः णित्वेनैव विवक्षायां प्रयोजनाभावादिति केचित् स्यादे
तत् येन णिवाच्यं तादात्म्येनेष्टं विधित्सितं तत्रैव कर्तृकर्मणी तस्य णेरभावे यत्र तयोः कर्मत्वं कर्तृत्वं चैतादृशण्यंतादात्मनेपदमिति प्रकृतास्त
त्यर्थ इति चेत् न अधारोपित प्रेषणात्मकतीपकत्वायां निवर्तप्रेषणस्य च चतुर्थकक्षायाममयामे ः तत्रैव कर्मणः प्रसिद्धत्वात् अथ यथासंभ
वे ण्यंते कर्तुः णौ कर्मत्वं ण्यंते कर्मणो ऽणौ कर्तृत्वं चेति चेत्तत्रं उक्तस्थले ति प्रसंगतादवस्थ्यात् ण्यंते कर्मणां मनुष्याणामणौ कर्तृत्वस
त्वात् निवर्तप्रेषणात्मतीपकत्वायामप्यतिप्रसंगाच्च ण्यंते कर्मणो हस्तिन आरोहति हस्तीपति द्वितीयकत्वायां कर्तृत्वसंभवात् स्यादेत
त् येन णिवाच्यं तादात्म्येनेष्टं विधित्सितं तस्य णेरभावे धात्वर्थतावच्छेदकं पतनं लोतेरेवयस्मिन्नपि ण्यंते धात्वर्थतावच्छेदकं धात्वर्थो वा भव
ति तस्मादात्मनेपदं आरोहति हस्तिनं हस्तिपक इत्यत्र द्विधात्वर्थतावच्छेदकं त्वः भवने स्थले मारोहयति मनुष्यानिपत्रैतत्त्वः भवतानुकूल एम०
व्यापारे ऽनुकूलत्वे तदनुकूलव्यापारश्चाणि चार्थः तथा च स्वभवने स्थले स्पतेदनुकूलव्यापारे च मनुष्याणामतवा ये स्थले निरुक्तपत्याभवनेन

दनुकूलो योमनुष्यनिष्ठो व्यापारस्तदनुकूलव्यापारवान् रुस्तीति धीः तत्र वेन्त्यमवनं रापतन्थात्वर्थतावच्छेदकतावच्छेदकमेवमवति
नतु धात्वर्थतावच्छेदकं धात्वर्थो वा व्यापारद्वयस्यैव क्रमेणातथात्वोदिति नातिप्रसंगः वरमकर्तृत्वापामकर्मकतेपा धात्वर्थतावच्छेदकम
प्रसिद्धमिति धात्वर्थो वेत्युक्तौ नचैवं यतेराज्ञा भृत्यानित्येन संप्रदानस्य धात्वर्थतावच्छेदकत्वाभावादि विषयत्वापत्तेः परिसज्जेन विषयत्वापाद
नेदृशपश्यंति भृत्या राजानमित्यत्र दृशेरर्थः प्रत्यक्षान्तरारोपे तु विषयत्वापत्त्यनुकूलो योभृत्यनिष्ठो व्यापारश्चक्षुः संयोगादिस्तदनुकूलो यो व्या
पारश्चैत्रः संयोगानुकूलदेशावस्थानादिस्तदाश्रयो राजेत्यन्वयबोधः विषयत्वापत्तौ राज्ञि निष्ठत्वमर्थाद् लभ्यते तत्र च चक्षुः संयोगादिरेव रापत
धात्वर्थतावच्छेदको न तु विषयत्वापत्तिरिति विवाचं रापतेराश्रयत्वाभावदशायां धात्वच्छेदकफलाश्रयोपपत्तेरन्वयवृत्तित्वेनानवगम्यमानत्वेतिधात्वर्थ
प्रकारत्वमात्रस्य साधारणस्य धात्वर्थतावच्छेदकपदेन विवक्षितत्वात् अत्र च विषयत्वापत्ते राजात्ववृत्तित्वेनानवगम्यमानत्वे
सत्वात्रीति व्याप्तिः आरोहति हस्तिनं हस्तिपका इत्यत्र धात्वर्थतावच्छेदकत्वमभवनात्रपाद्वस्तिनो ऽन्यस्मिन्स्थले वृत्तित्वेनानवगम्यमवनस
स्थलमारोहयति मनुष्यानित्यत्र प्रतीयमानत्वान्नातिप्रसंग इति चेत्तन्न प्रणासत्त्वादित्पदं तादृशत्वेनेपद्यस्मातिपोगिकाभावश्चका

सि॰धा॰ मोपलक्षणं पदं तत्त्वं च कर्तृविशेषणं सामर्थ्यान्निर्देक्ष्यते इत्येतावन्मात्रे सिद्धे णपं तत्त्वाभावदशायां धात्वर्थतावच्छेदकफलाश्रयो
93 यत्र णपं तावस्था याः णिजर्थव्यापाराश्रयस्तत्र णपं तादात्मनेपदं स्यात् तस्येव सूत्रार्थो यथोक्तस्थले निष्प्रसक्त एव सिध्यति । ननु कर्तृ इत्य
त्रित्वेनाप्रतीयमानत्वपर्यन्तमिति तादृशणर्थत्वाभावयोक्तरीत्या द्वितीयपाक्यार्थाश्रयत्वाभावश्यकमिति तत्तत्स्वोक्तार्थः सिद्धान्त इति भगवद
भिप्रायात् । तस्माद्द्वितीयवाक्यार्थबलाधानार्थो विशात्विनः वाक्ये क्वोपिसलेप्येतमत्रत्यासत्त्येति साहसं ॥ ॥ तदुपं भाष्यमतनिष्कर्षः ४ अणं
तेसति यत्र यो किल फलव्यापारयोराश्रयो णपं तेन तत्र तदन्यकर्मविरहस्तत्कर्मणः कर्तृता धातोः स्यात्तत आत्मनेपदमनाध्यानार्थकादित्यसो
पंथा वार्तिकभाष्यकेयटमखवत्र्यथाशयग्रन्थिगतः वृत्तिकारमते त्वयमर्थः णपं तादात्मनेपदं स्यादनाध्याने अणौ यत्कर्म तस्यकर्मीतरनिव
त्तिरर्थः व्याख्यानं केयपेक्षरीत्येव एतावांस्तु विशेषः तत्र णौ च दृश्यं तेन कर्मान्तरनिवृत्तिलाभः अत्रैव अणौ यत्कर्मेत्येतावतैव सामर्थ्यात्से
रितिसन्निहितबोधः णपं तावस्था याम्रेव अणौ कर्मणो णौ कर्तृत्वविधानसिद्धिः णौ यत्कर्मेत्यनुवादसामर्थ्यादेवाणौ कर्मत्वसिद्धेस्तत्रैव तद्वि एम॰
धानस्याशिवत्वुपयोगात् । कर्मपदं चकर्ममात्रपरं न तु कर्तृकर्मोभयपरमिति णौ चेदिति ततीयं वाक्यं अणौ यदित्यनुवृत्त्या अणौ यत्रेतिपा

घं वक्तृणो वेगेन देव प्रतिपाद्यमित्यर्थः णौ वेद्ग्रहणं समानक्रियार्थमिति वृत्तिग्रंथस्वरसात् सकर्तृतिचतुर्थं आरोपकर्मणो वेत्स
कर्त्रेति तदर्थः अनाध्यानेत्यपि प्रसज्यप्रतिषेधस्से पंचमं वाक्यं आरोहमेव णाति किं आरोहंति हस्तिनं हस्तिपकाः आरोहयमाणो दर्शयते राजा
हस्ती स्व+ हंति हस्तिनं हस्तिपकाः आरोहयते हस्ती स्वयमेव सिंचेति हस्तिनं हस्तिपकाः सेचयते हस्ती स्वयमेव पश्यंति भृत्या राजानं स्वप+२
धारोहंतिः आणाविकि किं गणयति गणं गोपालकः गणयति गणः स्वयमेव गणासंख्याने नुराहादेवदतः अतो लोपस्य स्थानि
वत्वान्नेवृद्धिः गण्यमानो गणो यदा गणनक्रियायामनुलोमं प्रतिपद्यते तदा नस्यापारमात्र वृत्तेर्हेतुमण्णिचः पुनर्णिवृत्तेर्भेषण
दृशायां प्रत्युदाहरणं णावेवगणः कर्मत्वैः वच्यकर्त्रेति नात्मनेपदं नापि कर्मवद्भावेन कर्तृस्थक्रियत्वात् संख्यानिमित्तेर्वेलयाकवि
शेषांत्मकस्य गणनस्य कर्तृत्वविवक्षतेः कर्मग्रहणं किं लुनाति दात्रेण लावयति दात्रं स्वयमेव अण्यन्तावस्थायां दात्रस्य करणा
त्वात् णौ चेद्ग्रहणं समानक्रियार्थं आरोहंति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती भीतान् सेवयति सूत्रेण प्रयोज्यप्रयो
जकभावलक्षणोपि क्रियाभेदे माभूदिति समं स्मृत्याह क्रियामेव यंथा स्यादित्यर्थात् यद्यपि प्रयोज्यप्रयोजकभावलक्षणक्रिया

सि० धो० भेदेप्यनेनात्मनेपदं वाधितमेव तथापि श्रूयतमेश्वदर्शनार्थं स्नेवयतीति स्यात्तु भेदः प्रत्युदाहृतं भीताश्चा आरोहयते: कर्म
२५ नस्य च पैते: आरोहयमाणाइति णिवश्यत्वात्मनेपदं न शवा भीतान्यारोहयमाणा भीत्या मन्त्रे यंति. तेन हस्ती सिध्यते क
र्मणोऽविवक्षितत्वात्सेवयतेरकर्मकत्वे यत्साधनमनन्यकर्मार्थं तथा हि उद्देशमिति निर्देशान्न चैपर्यतांग्रेरूपुनः तद्धेतोर्णको
भेदेन कर्मान्तरनिवृत्तये तेनारोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र नात्मनेपदं मनु
ष्यरूपस्य कर्मान्तरस्य सत्त्वात्. यद्यपि भोजकर्मणो णात्मनेपदस्य प्रसिद्धत्वोक्तेर्न चैवानेन भवितव्यं तथाप्यणौ यत्कर्म तस्मिन्नेव कर्त्तरि
यथा स्यात्कर्त्रन्तरे मा भूदित्येवमर्थं कर्त्तेत्युक्तं तेनारोहन्ति हस्तिनं हस्तिपकाः तानारोहयति महामात्र इत्यत्र न इह हेतोरण्यर्थत्वाद्ध
स्तिपकानां कर्मसंज्ञा यद्येवं कर्मान्तरसम्भवादेवात्र न भविष्यति नैतदस्ति अस्ति ह्यत्राणौ कर्मणो हस्तिनो णावपि कर्मत्वेनान्व
यः न वासतिकर्तृत्वविधौ कर्मान्तरं णावत्तिर्धर्म्मपते यत्राश्रयो जके व्यापारे तात्पर्याद्धस्तिपकाः कर्मत्वेनाविवक्षितास्तदेदंश्रु एम०
दाहरणं अनेनाध्यानेन किं स्मरति वनगुल्मं कोकिलः स्मारयत्येनं कोकिलं वनगुल्मः वक्तो वनगुल्मस्येति षष्ठी तु कर्मत्वे पलक्षणा

र्थ्यां वेनयुत्पत्स्यरमणीयत्वप्रतिपादनायप्रयोजकत्वविवक्षायां णिच् एवमितिवृद्ध्यर्थत्वात्कोकिलस्यकर्मसंज्ञा एतदप्युप
लक्षणं कर्मान्तरसत्वादेवग्राह्यभावात् तस्मात्कर्माविवक्षायांप्रयुदाहरणं दृष्टव्यमितिहृदयन्तानुसारीत्यर्थः अधिकमग्रे
वक्ष्यामः ४॥ ॥कोकिलाभकारान्तिव्याघ्रवरवेण्डः णौरिपेकंवाक्यं अर्थः पूर्ववत् आणौयत्कर्मणौचेदितिद्वितीयं अणौयाक्रियास्व
वृत्तेसंयतेनोच्यतेतितदर्थः कर्तरिकर्मव्यतिहारे इत्यादिवत्कर्मशब्दस्यक्रियापरत्वाश्रयणात् सकर्मकेतितृतीयं अणावित्यादेरनुव
त्त्याणौ अकर्मकत्वर्थप्रतियत्कर्मकारकंसएवणौ संपन्नेकर्त्रेत्यर्थः शब्दाधिकाराश्रयणेनकर्मपदस्यात्रकारकविशेषपरत्वाव्याख्यानात्
भाष्यगतेकयोरपिद्वितीयवाक्यगतंकर्मपदंक्रियापरत्वेयेवव्याख्येयं द्वितीयवाक्यप्रयोजनंतु अध्यारोपितप्रेषणपक्षेद्वितीयकक्षा
यांमाभूत् तत्रप्रेषणाधिक्यान्नातिव्याप्तिः तृतीयवाक्यप्रयोजनंतुनिवृत्तप्रेषणपक्षेतृतीयकक्षायांमाभूत् तत्राणौकर्मणो णौ
कर्मत्वमेवनतुकर्तृत्वमितिनातिव्याप्तिः निवृत्तप्रेषणपक्षेचतुर्थकक्षायांप्रथमकक्षामादायतृतीयवाक्यार्थस्यद्वितीयकक्षा
मादायचद्वितीयवाक्यार्थस्यसमन्वयान्नाव्याप्तिरिति॥ ॥अत्रेदंवक्तव्यं अध्यारोपितप्रेषणाद्वितीयकक्षायामप्यात्मनेपदस्यभाव्य

सि० ध० कैरभ्युपगमेन तद्वारणमनुपपन्नं एवं तृतीयकक्षायामथ व्याप्तिः आरोहति हस्तिनं हस्तिपकः इत्यत्र तद्गमनावच्छिन्नव्या
25 पारस्य आरोहयते हस्तीत्यत्र तद्गमनमात्रस्य प्रतीत्या समानक्रियत्वाभावात् यत्तु क्रियाया आधिक्यमात्रं यदवच्छिद्यते न तन्न्यूनत्व
मपीति तत्र प्रकृतत्वपात्तायाः क्रियायाः सैव वेद्यसंपन्नेनोत्पन्नेत इत्यतो न्यूनाधिकव्यवच्छेदस्यैव प्रतीयमानत्वात् प्रकृतत्वपात्तक्रिया
त्वविशेष्यतावच्छेदकीकृत्य तदवच्छिन्नात्मनि स्वपंतवाच्यत्वव्यवच्छेदस्यैव तदवच्छिन्नेतरत्ववाच्यत्वस्यापि प्रतीतेः एवकारा
र्थान्योन्याभावप्रतियोगितावच्छेदकधर्मस्य व्यवच्छेद्यधर्मप्रकारकबोधविशेष्यतावच्छेदकत्वाभावादिति नियमात् अत एव पार्थ एव
धनुर्धर इत्यादौ पार्थान्यस्मिन् धनुर्धरत्वव्यवच्छेदः पार्थे धनुर्धरत्वं च प्रतीयते अन्यथा पार्थो धनुर्धरो न वेति संशयस्य तद्वाक्यार्थबो।
धाऽनिवृत्तिप्रसंग इति संप्रदायः स्यादेतत् आरोहति हस्तीत्यत्र निवृत्तप्रेषणादि द्वितीयकक्षायां तद्गमनमात्रस्य प्रकृतत्वपात्तक्रियात्वा
न्तरूपविशेष्यतावच्छेदके समानाधिकरणपमात्रे तदारोपितेन ग्राह्यत्वप्रतीतावपि चरमकक्षायामात्मनेपदं सुलभमेवेति अकविशेष्यतावच्छेद एम०
कावच्छिन्नपावच्छिन्नक्रियासामान्यस्याऽसंभवादेव विवक्षानुपपत्तेरिति चेन्न अध्यारोपितप्रेषणापक्षे द्वितीयकक्षायामप्यात्मनेपदस्य दुर्वारत्वा

इतिप्रयोगात्। परसमवेतक्रियाजन्यत्वमपि फले निवेश्यं भूमिं प्रयाति विहगो विजहाति महीरुहं ननु स्वात्मानमिति प्रयोगात्। संयोगवि
भागयोरुभयोर्धात्वर्थतावच्छेदकफलत्वेन तच्छालिनः स्वस्य कर्मत्वप्रसंगात्। न च मध्ये मार्दत्रं गच्छतीत्यादौ उभयकर्मजसंयोगस्य तादृशत्वा
त्तस्मिन् स्वकर्तृकक्रियाकर्मत्वव्यवहारापत्तिः परसमवेतपक्रियाजन्यफलशालित्वं यत्र तत्र क्रियाकर्मेति स्वीकारात्। इत्थं च द्वितीयोद्
क्रियान्वितं परसमवेतत्वमर्थः परत्वं च समुपास्य प्रकृत्यर्थापेक्षया प्रत्याय्यते कर्मत्वाख्येन नतु स्वार्थफलान्वय्यपेक्षयेति विशेषः तथा च भू
मिं प्रयातीत्यादौ भूमिभिन्नसमवेतो भूमिवृत्तिसंयोगजनको यः स्पन्दस्तदनुकूलकृतिमानिति धीः अतः स्वभिन्नसमवेतं स्ववृत्तिसंयोगजनकं
यन्मध्यं तत्र वृत्ति गमनं तदनुकूलकृतेः स्वस्मिन्नभावात् मध्ये स्वं गच्छतीत्यादिः प्रयोगः अत्र च द्वितीयार्थफले धात्वर्थस्य घटकत्वा
वच्छिन्नप्रतियोगितासंबंधेनान्वयात् आमादेः परत्वे च तेन पृथिवीं प्रयातीत्यादौ पृथिवीत्वावच्छिन्नप्रतियोगिताकभेदस्य विहगादावसत्त्वेपि
न क्षतिः नवा स्वात्मन्यप्युभयभेदसत्त्वात् स्वं प्रयातीत्यस्यापत्तिः इत्याहुः अन्ये तु पृथिव्यादिपदं तत्तत्पृथिव्यादिव्यक्तिलाक्षणिकं अतत्त्वावच्छे
दकावच्छिन्नप्रतियोगिताकत्वस्य तत्पदे रोधादित्याहुः केचित्तु क्रियान्वितं अन्योन्याभावप्रतियोगितावच्छेदकत्वं द्वितीयार्थो न परसमवेतत्वं त

ला२

सि०धा० तत्तद्व्यमूर्त्तिवृत्तिसंयोगजनकक्रियानिष्ठान्योन्याभावप्रतियोगितावच्छेदकं चयत्तत्रयात्रांतदनुकूलकृतिमान्तितिधीः स्वनिष्ठक्रियायाः स्व
निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वविरहान्नसंप्रयातीत्यापत्तिरित्याहुः एवंसतियेनमद्दत्रेनमद्दत्रांतरं नगतंतस्मिन्नपिमद्दत्रेग
च्छतीतिप्रयोगःस्यात् मद्दत्रांतरनिष्ठान्योन्याभावप्रतियोगितावच्छेदिकायास्तन्मद्दत्रक्रियायास्तन्मूर्त्तमूर्त्तिवृत्तिसंयोगजनकत्वात्
फलान्वयिमद्दत्रगतैर्वृत्तिप्रतियोगितयाभेदान्वयइत्युक्तौतुतस्याक्रियत्वादेः प्रकारत्वेनान्वयानंतंपसंसर्गत्वकल्पनापेक्षयानुपरसमवेतत्वमेवस
म्यक् अन्योन्याभावस्याव्याप्यवृत्तित्वपक्षेतेरित्यपरे अथपतेरर्थः संयोगावच्छिन्नस्पन्दार्थतयोक्तसंयोगशालिनोभूतलादेः कर्मत्वा
पत्तौवृक्षात्पर्णंभूतलेपततीतिप्रयोगापत्तिरितिचेन्नैतयाविवक्षायामिष्टत्वात् अतएवक्षितौस्थापित्रितातीतपतितेत्यादिप्रयोगेणापतित
योगेक्षितौपासमासविधिः संगच्छते अन्येत्वाहुः सकर्मककर्त्तरिकर्मकर्त्तव्यवस्थानव्यापारस्वरूपेकिंत्ववच्छेदकफलविशेषानोदयपक्षाव
विशेषेतयाहि धातुनाव्यापारावच्छेदकत्वेनफलेभिहितेप्रतियोग्याकांक्षायांसन्निहितोद्वितीयोतस्यैवार्थस्तत्त्वेनान्वीयतइतिग्रामंगच्छती एन०
त्यत्रग्रामप्रतियोगिकसंयोगजनकव्यापारोवाक्यार्थः पतिधात्वर्थावच्छेदकसंयोगेचैवंप्रतियोगित्वेनवृक्षोन्वेति अयोग्यत्वात् नभूतले।

ध्वंसपरस्वत्वानुकूलत्यागानुकूलकृतिमान्· गोघ्नतिमूल्यादानप्रयुक्तस्वस्वत्वानुकूलस्वीकारानुकूलकृतिमान्· गोवन्निरुक्तद्रव्यत्वे तंजनकस्वी
कारानुकूलकृतिमानितिधीः विक्रेतृदेशपतौ स्वत्वध्वंसजनकस्वत्वध्वंसस्य तु पफलत्वेन कर्मत्वमिति प्राञ्चः; अथास्तु दानस्य परस्वत्वजनकत्वे
तेन एव विक्रयादिव्यावृत्तौ मूल्यग्रहणोत्तिरर्थं यदि तु स्वीकारविशेषात्मकतया प्रतिग्रहस्यैव स्वत्वजनकत्वात् औपादानिकस्वत्वध्व
ले स्वीकारस्य तत्त्वे नु तापाः तत्रस्नातो न स्यात्तथा प्रतिग्रहस्यैव प्रयुक्ते इत्याध्याय न प्रतिग्रहैर्व्यासतो धनमर्जयेदिति स्मृतिविरोधश्च स्वस्व
त्वध्वंसमात्रजनकं दानं तु परस्वत्वप्रयोजकमित्युच्यते तथापि वैयर्थ्यं तादवस्थ्यम् तथाप्युपेक्षायामनिष्टत्वात् अपि स्वस्वत्वध्वंसद्वारा परस्वत्व
प्रयोजकत्वात्· किंच न स्वत्वपात्रोद्देशेन त्यक्तस्य प्रतिग्रहात् त्यागस्वामिकद्रव्यस्यानुद्देश्येन पुरुषेण प्रतिग्रहात् स्वत्वं स्यात्· अन्योद्देश्यकत्यागस्य तद्वि
रोधित्वे गौरवं न च संप्रदानस्यानुमतिप्रकाशनद्वारा दानहेतुत्वात् संप्रदानकर्तृत्वे दानाभास एवेति वाच्यं तीर्थसंकल्पिते द्रव्ये संप्रदानत्वं प्रदी
यते दानात्तत्फलमाप्नोति प्रतिग्राही न दोषभाक्· मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत् विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते॥
द्रव्यपात्रविप्रकर्षश्चेत्परोक्षं दानमुच्यते; तथापि दैवमेवं पात्रं द्रव्यमादित्यदैवतं परोक्षकल्पिते दाने पात्राभावे कथं भवेत् गोत्रजेभ्यस्तथा

इष्टायात्तदभावेस्वत्वं पुः इत्यादिनारदीयवद्विंशन्मतादिस्मृतिविरोधापत्तेः एवंस्वस्वत्वध्वंसजनकेत्यपिव्यर्थं अव्यावर्तकत्वात् अग्नित्रक्षेपो
होमइत्यप्युक्तं देवतोद्देश्यकस्वस्वत्वध्वंसजनकत्यागोयागः ४ स एव प्रक्षेपावच्छिन्नोहोमः इतिवाचस्पतिमिश्रोक्तेः यागएवविशिष्टदेश
प्रक्षेपोपहितोहोमएवविवेकोक्तेश्च अस्तियजमानर्त्विजांत्यागोयजमानस्वत्वध्वंसः अनुमतेदानस्त्यागविशेषात्स्वामित्वध्वंसध्वंसः वक्ति
तोदानत्वंयागत्वहोमत्वाद्योमानसप्रत्यक्षगम्याजातिविशेषा ४ नचश्राद्धस्यापित्रपेक्षयायागत्वंब्राह्मणापेक्षयावदानत्वमितिविवेकोक्तेस्त
त्रसांकर्यं श्राद्धस्यगोणत्वेनुभयरूपत्वात् वस्तुतः श्राद्धस्ययागत्वमेवपित्रादिस्वत्वाजनकत्वात् अतएवस्वत्वमपिसार्वत्रिकंब्राह्मणास्यभवेदपि
श्राद्धोक्तेः पिंडांस्तुगोजविप्रेभ्यइत्यादिनात्रापितत्प्रतिपत्त्युक्तेः विष्णुपत्नीत्वेत्यादौ द्वितीयार्थउद्देश्यत्वंतच्चतत्संप्रदानत्वस्मारोपज्ञानविषयत्वं देव
ताचैतन्यपक्षेतुदेवतायाःस्वत्वोपगमात्तेदानत्वमुपपन्नयागत्वंनहोमत्वमितिबोध्यंदेवद्रव्यादिकमपियागएव अतएवतस्यचिष्टले अ
साधारणस्वत्वनाशेपरसाधारणस्वत्वोत्पादात्तत्रदानलक्षणस्यनातिव्याप्तिः दानत्वजातेस्तत्रानंगीकारात् परमात्रस्वत्वानुकूलत्यागत्वेनविश एम॰
षणात्रेनत्येतिकेचित् सत्येवद्रव्ये स्वत्वेतत्रपरस्वत्वोत्पत्तिमात्रेणेवस्वत्वव्रतिकचपरस्वत्वोत्पत्तिः इच्छायाउत्पादकत्वादित्यन्ये अदृष्टविशेषजन

मणित्वापातात्। सामर्थ्यं च न परस्परान्वययोग्यार्थकत्वं भार्या राज्ञः पुरुषो देवदत्तस्येत्यादावतिव्याप्तेः। किं तु तदर्थान्वितार्थबोधकत्वे न तात्पर्य
विषयत्वं तत्र तु राज्ञो भार्यापदार्थेन सहैवान्वयबोधे तात्पर्यं न तु पुरुषेणेति न दोषः। एतच्च वाक्ये व्यपेक्षासामर्थ्यं च एकार्थीभावपक्षे समुदा
यस्यैव विशिष्टार्थशक्तिस्वीकारे णोक्तादृशसामर्थ्याभावात्। तत्रैव प्रत्युदाहरणमाहुः राजपुरुष इत्यादौ पदद्वयस्य स्वार्थपरत्वे वाक्यवद्वृत्तावपि
विशेषणान्वयः स्यात्। एवं पुत्रीयति कुम्भकार औपगव इत्यादावपि बोध्यं। न च स विशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति वचना
न्न तदापत्तिः वचनेन तन्निवारणे गौरवापत्तेः। उक्तरीत्या तु समुदायस्य विशिष्टार्थशक्ततया तदेकदेशे राजादिपदार्थे विशेषणान्वयानुपपत्तेः सिद्धे
उक्तवचनस्य न्यायसिद्धानुवादकत्वमात्रस्वीकारेण लाघवात्। श्वशुरपदजन्योपस्थितौ पितृविशेषणत्वेनोपस्थितायां भार्यायां कर्कशीलाया इत्या
दिविशेषणानन्वयात्। एवं धवश्च खदिरश्चेत्यादौ इव समासे पि न कास्प्रयोगापत्तिः। समासस्यैव तादृशविशिष्टार्थपरत्वे तु उक्तार्थतया तदना
पत्तेः। न च मयापि तादृशार्थे निरूढलक्षणास्वीकाराच्च तदापत्तिरिति वाच्यं शक्तेरेव तावता स्वीकर्तुमुचितत्वात्। समासे चित्रगुरित्यादौ यत्पदप्र
योगापत्तिश्च। प्राप्तोदको ग्राम इत्यादौ कर्तृप्रत्ययान्तप्राप्तपदे कर्तृप्रत्ययार्थतया प्राधान्यापत्तौ उदककर्तृकप्राप्तिकर्मीभूतो ग्राम इत्यर्थो

सि०धा संभवेद्वेति अत्रोच्यते राजपुरुष इत्यत्र राजपदस्य राजसंबंधिनि लक्षणायां राज्ञः पदार्थैकदेशतया तत्रापि विशेषणतान्वयस्यापाद
यितुमशक्यत्वात् वस्तुतो विशेषणतेनोपस्थितस्य तत्पदार्थान्वये निराकांक्षत्वेपि जे न तेन्वयतः पदोभवत्तीत्यादाविवेकादस्येत्यादिसमभि
व्याहारे तथात्वात् आकांक्षयान्वयसंभवात् साधुत्वेज्ञापनार्थस्य विशेषणानामिति वचनमावश्यकं अतोऽलुक्समासस्थलेपि न दोषः यत्तु नञा संबु
द्धः घटो नित्य इत्यादौ विनालक्षणां सुन्दरनित्ययोः पृथक्पदत्वेनान्वयमादाय साधुत्वावारणाय पदार्थैकदेशान्वये वाक्यस्यासाधुतापाः सामान्य
तस्यैव निर्णयः किंच वार्त्तिकान्ताद्दशप्रयोगस्य साधुत्ववारणेपि शाब्दबोधस्तादृशप्रयोगादुर्वार इति शक्तिस्वीकार इति तदसत् चैत्रस्य नप्तेत्यादेरपि
असाधुतापत्तेः बोधस्य शाब्दत्वापि संभवे न शक्तिस्वीकारेण तस्य दुर्वारत्वाच्च भेदभेदकसंबंधोपाधिभेदनियंत्रितं साधुत्वं तदभावेपि बोधो नेह
निवार्यत इत्यभ्युपगमात् न च घटो नित्य इत्यादौ विनापि लक्षणां घटत्वे नित्यत्वान्वये साधुत्वस्यादिति वाच्यं इष्टापत्तेः आकांक्षाविरहादेव तथान्वयबोधात्
विशेष्यतया पदार्थप्रकारकबोधे विशेष्यतया पदजन्योपस्थितेर्हेतुत्वात् केचित्तु स्वारसिकानुभवबलेनागत्या पदार्थानामवच्छेदकैकदेशान्वयं पार्थमवच्छेदकतया ८८०
पदजन्योपस्थितेरपि हेतुत्वकल्पनात् अत एव घटः कर्मत्वमित्यादौ नासाधुत्वव्यवहारः यत्तु शाब्दकौस्तुभे ऋद्धस्य राजमातंगा इति सूत्रे उक्तं अनेन प्रयोगा

///

कृतविशेषणात्वन्निरासः इत्यपरे मिश्रास्तु देवतोद्देश्यकद्रव्यत्यागरूपयागलक्षणं देवतायदानेतिव्याप्तं तथापि दाने देवतास्वत्वा
मुद्देश्यं न तु याग· अत एव इज्यायागदेवं गंधपुष्पादिसर्वदेशीयाः शिष्टाउपयुंजते ननु देवताये दत्तं गृहालेकरणादिरूपं स्याद्रुः
उद्धारकृतत्वात् नैतयुक्तं देवताचैतन्यपक्षेपितत्स्वामनुमत्यभावान्न संप्रदानत्वं तदभावेव कथं दानं तद्विनाचकथं स्वत्वं अन्यथापागे
पिस्वत्वोत्पत्त्यापत्तेः नचानुत्पन्नमेव स्वत्वं उद्देश्यत्वमात्रेणाव्यावर्त्तकं तदुद्देश्यत्वे मानाभावात्· नच ददातिप्रयोगो मानं श्राद्धेपि श्राद्धेपि
श्राद्धं दद्यादितिवत्प्रयोगात्· नच श्राद्धमपि दानं सकलसंप्रदायविरोधात्· देवस्वव्यवहारस्तूद्देश्यतामात्रेण· गृहालेकरणादीनामत्र
प्रयोगोहदिरूपं सुखेनामनैवेद्यमुद्दरेहरेः पादोदकं च निर्माल्यं मस्तके यस्य सोप्युत्सृष्टद्रव्यवत्प्रतिपत्तिवाक्याभावात्तान्न वेत्यपि दीपावलोकमे
नोपयुंज्यान्निवेदितमिति भगवद्वचनविरोधः तस्यासाधारणच्छागविषयतया रागप्राप्तभोजनविषयतयाव्यवस्थापनात्· अथवाः यस्मै निवे
दितं तस्मै नोपयुञ्ज्यान्निवेदयेत्· इत्यर्थः पित्र्यन्यदेवतोच्छिष्टं विसर्जवेयः प्रयच्छतीत्यादिनिंदाबलात् वस्तुतो दाने मंत्राभावत्वे देवतात्वमिति
न यागत्वमेवं च ददातिप्रयोगोपि पत्रेश्राद्धादौ मंत्रः स एव यागो नान्य इति· अत एव स्वीकारः सर्तिक्षे दाने कारणं नान्यदित्यक्ता· अतएवोत्सर्गे दद

सि० धा०

तिमुख्य एवेत्याहु४ इत्यास्तां विस्तरः इदं च सम्प्रविधमित्युक्तं वाक्यपदीये निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतं तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितं
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकमिति· आद्यानां त्रयाणां लक्षणमप्युक्तं सती वा विद्यमाना वा प्रकृतिः
परिणामिनी यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितं
यदसज्जायते सद्वा जन्मना यत्प्रकाशते तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितं प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत् किंचिद्गुणान्त
रोत्पत्त्या सुवर्णादिविकारवत् क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते अयमर्थः घटं करोतीत्य
त्र सत्या विद्यमानस्य प्रकृतेर्न परिणामित्वेन विवक्षितेति निर्वर्त्यं भस्म करोतीत्यत्रापि काष्ठादिरूपप्रकृतेर्विद्यमानाया अविवक्षायां तथैव त
त्प्रकृतेः परिणामित्वविवक्षायां तु विकार्यत्वमेवेति केचित्· अन्ये त्वाहुः घटं करोतीति निर्वर्त्यमेव घटादिकं चासदेवोत्पद्यत इति तार्किका
दयः सदिति तु सांख्यादयः तदुक्तं तत्रैव· उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबंधनः अविशिष्टः सतान्येन कर्त्ता भवति जन्मनः कारणं कार्य एम०
भावेन यद्वा व्यवतिष्ठते कार्यशब्दं तदा लब्ध्वा कार्यरूपेण जायते यथाहुः कुंडलीभावो व्याघ्राणां वा समग्रतो तथैव जन्मरूपत्वं सतामेकैव च

क्षेते आद्यश्लोकोऽसत्कार्यवादे घटादीनां कथं जन्मकर्तृत्वमिति शंकासमाधानार्थः बुद्धिकल्पितसत्तामादाय शब्दप्रयोगोपयुक्तं कर्तृत्वं तत्र कार्याव
वहितत्वाद्यकालवर्तित्वस्यानुपपन्नत्वात्· कारणत्वेन तु स्वसंबन्धिनी नी गीक्रियत एव· यत्रोक्तापेक्षा स्यात्· उत्पत्तौ वपि घटप्रागभावस्यैव निमित्तत्वात्· सत्का
र्यवादेपि वेदांताद्यभिमते येन रूपेणोत्पत्तिस्तद्रूपेण पूर्वमसत्त्वात्कारणरूपेण सत्वेप्युत्पत्त्यप्रयोजकत्वादिति तदेदं तर्ह्यव्याकृतमासीदिति वाक्यव्या
ख्यानावसरे कौस्तुभे विस्तरः· अत्र पक्षे तु सत्कार्यवादाभिप्रायं घटो नाशत्वमापन्नः कटकमेवमुकुटं जातमित्यादि प्रतीत्या पूर्वावस्थाया उत्तराव
स्थायाश्चात्मानुभवात्· पूर्वोत्तरावस्थयोरभेदः· भिन्नकालीनयोरप्यनुभवसाम्यात्प्रतियोगित्वानुयोगित्वव्यवहारात्मस्याविसंभवात्· इदमेव वेदांतिभिः
संस्कारशब्देनाभिधीयते परं तु मिथ्यात्वात्सांख्यापेक्षया विशेषः प्रकृतमनुसरामः· विकार्यं द्विधा प्रकृतिभूतस्यात्मनेश्छेदं संभूतं ग्रासं का
ष्ठं भस्म करोतीति गुणांतरोत्पत्त्या सुवर्णं कुंडलं करोतीति· भस्मदशायां न काष्ठत्वप्रत्ययः कुंडलदशायां तु सुवर्णत्वप्रत्ययोस्त्येवेति विशेषः· अत्र काष्ठसुवर्णा
योः परिणामित्वविवक्षा विवक्षयोश्च भस्मकुंडलयोर्निर्वर्त्यत्वैव काष्ठसुवर्णयोस्तु विकार्यत्वमेवेति बोध्यं न च क्रियाजन्यफलानाश्रयस्य काष्ठस्य
कथं कर्मत्वमिति वाच्यं प्रकृतिविकृत्योर्निरूढ्याभेदविवक्षया तथात्वात्· काष्ठानि विकुर्वन्भस्म करोतीत्यर्थात्· तंडुलान्विक्लेदयन्नोदनं निर्वर्त्त

सि०धा० यतीति वत्तः ॥ अपादित्तं चेदृद्धर्थः पचिरित्युपक्रम्य भाष्यकारैरिति ग्रंथकृता तत्प्रायं रूपं पश्यतीति · आवरणाभंगस्य विषयत्वस्य वा क्रियाकृतविशे
षस्य प्रतिपत्तृगम्यत्वेपि तदतिरिक्तागम्यत्वं औदासीन्येन ग्रामं गच्छंस्तृणं स्पृशतीति · अनीप्सितं विषं भुंक्ते संज्ञांतरैरनाख्यातं त्वकथितं गां दोग्धि प
यः · अनपूर्वकं संज्ञांतरप्रसंगो विहितः कर्मसंज्ञाकं क्रूरमभिक्रुध्यतीत्यादि · नैयायिकास्तु संयोगादिक्रियाफलशालित्वं प्राप्यं ग्रामादि · फलत्वं च सत्ता
कमेवावस्थांतरमापाद्यते तद्विकार्यं यथा प्रागुदाहृतं तत्राद्यिकाष्ठपदं तदवयवपरं तस्य सत एवभस्मादिभवनरूपावस्थांतरप्राप्तेः न च क्रि
याफलकर्मनाशकं फलं जनयतीति तद्विकार्यं काष्ठं लुनातीत्यत्र काष्ठं इति वाच्यं तत्र लक्षणया काष्ठावयवस्य कर्मत्वं पाक्रियायास्तन्नाशकत्वाभावात् · न
हि काष्ठपदस्य तदवयवः लुनातेरारंभकसंयोगविरोधिविभागहेतुक्रियानुकूलव्यापारोर्थ इति काष्ठावयववृत्तितादृशविभागहेतुक्रियानुकूल
व्यापारानुकूले हेतिमान्निति शाब्दात्तं काष्ठावयवस्य प्राप्यकर्मत्वेव अवस्थांतरप्राप्त्यभावात् · तंदुलं पचतीत्यत्र तु तंदुलपदं तदवयवलक्षकं पचधात्वर्थो रू
पादिपरावृत्त्यवच्छिन्नतेजःसंयोगः तेन क्रियाजन्यफलशालितासत्तोवस्थांतरप्राप्तेर्भयविधं कर्मत्वं घटं करोतीत्यादि निर्दिष्टं अत्र फलजनकफलो एम ६
वच्छिन्नव्यापारबोधकत्वप्रयोगोणां कर्मत्वं क्रियानिमित्तत्वाभावात्कर्मसंज्ञकाः फलमपि · किंतु साध्यत्वादपेक्षितविषयता प्रयोगेणाकृत्स्नमभिव्याप्त्या द्वितीया

नादृशे भवनमभावप्रतियोगीति शाब्दबोधे ध्वंसोन्योन्याभावबोधोपपत्तेस्तदात्मत्वेन भवनस्य चोभयवृत्तित्वादुभयोः कर्तृत्वोपपत्तिरिति वाच्यं द्वयोरपि
तिङुपात्तस्यैकस्याकर्तृत्वापत्त्या घटो न पटो भवतीति प्रयोगानापत्तेः एतेन घटो न पट इत्यत्र घटपदं घटप्रतियोगिकान्योन्याभावबोधकं नञ्पदं
तात्पर्यग्राहकं अतश्चोभयोरपि अन्वयो घटः अघटः पट इतिवत्याधिकाभेदसंबंधमादाय विशेष्यविशेषणभावेनैवाध्याहृतक्रियायामेवान्वयइ
त्यपास्तं घटो न भवतीत्यादौ कथमपि कर्तृत्वानुपपत्तेश्चेति तदसत् अन्योन्याभावप्रतियोगिनः कर्तृत्वविरहात् साधुत्वप्रयोजकप्रथमायाः
प्रथमातिक्रमे कारणाभाव एव प्रयोजक इत्यस्य स्वयमप्यंगीकारात् यद्यपि प्रथमात्वधर्मावच्छिन्नलिंगानन्वयिपदोपस्थाप्यार्थाश्रयत्वं यस्य त
स्य तत्कर्तृत्वं पच्यते चैत्रेणापनेति चैत्र इत्यादौ चैत्रादेर्धात्वर्थावच्छिन्नकृत्याश्रयत्वात् कर्मलकारेणाभिहितेह्नक्तेः घटो भवतीत्यादौ नाख्या
तेनाश्रयत्वस्य नश्यतीत्यादौ च प्रतियोगित्वस्य लक्षणात् अवच्छिन्नत्वं च स्वरूपविशेषो न तु जनकत्वादि कर्तृलकारेणाभिहिते ह्नक्तेः घटो
भवतीत्यादौ नाख्यातेनाश्रयत्वस्य नश्यतीत्यादौ च प्रतियोगित्वस्य लक्षणात्ते न प्रतियोगित्वादेर्नाशाद्यजनकत्वेपि न क्षतिः चैत्रः पाचकः
पक्तेत्यादौ कृत्प्रत्ययेन पाकानुकूलकृतेर्लिंगानन्वयिपदाप्युक्तत्वात् चैत्रस्य पाक इत्यादि घञन्तेन घञाद्यर्थस्य लिंगान्वयेपिधानेन लक्ष्यस्य

सि॰धा॰ पाकावच्छिन्नव्यापारस्य लिंगानन्वयान्नाव्याप्तिः यद्वा घञादिना कृतेर्लक्षण्या शक्त्या वा पाकस्योक्तिः कृतौ च चैत्रस्याद्याख्यातार्थत्वे शेषषष्ठी
त्वात्पाककर्तृत्वाभावेपि न क्षतिरित्याहितैष्यसत् कृदुक्त कृते लिंगानन्वयित्वे प्रमाणाभावात् चैत्रः पक्तामित्रापचनीत्यादिदर्शनात् नचतत्
द्धिंगमात्रप्रयुक्तस्यैव न तु कृतिवृत्ति हस्तादिपद एव कृतेः स्त्रीत्वादिप्रत्ययकादितिवाच्यं तथापि कृतेष्ट्य कृघञर्थत्वे कृतेनालिंगान्वयइ
तिदर्थवत्वात् पाकानुकूलकृतिसाध्यः पाकस्तस्य च सिद्धभावापन्नभावो घञाद्यर्थ इति सिद्धांतविरुद्धत्वात् शेषषष्ठ्यश्च चैत्रपाक
इत्यादौ कृदुत्तरपदप्रकृतिस्वरेण यवन्तैवदुष्टत्वात् इति द्वितीयप्रपंचविषयामष्टपदविघटनपदाविरुद्धाध्याहृतमभवत्पादेः प्रतियोगिता
श्रयत्वेभयलक्षकत्वं घटपटसंबंधिनीयथाक्रमं अन्योन्याभावीयेविद्यमानत्वसंबंधिनी प्रतियोगिताश्रयत्वे इतिधीः अत्र योगिव
त्ति संख्यावचनमेवाख्यातेभवति न तु प्रतियोगिवृत्तिसंख्यावचनमपीति नियमोप्यनुभवानुसारात्कल्प्यः यद्वा घटो न भवति पटो न भव
त इति क्रियाध्याहारः नञ्पदं द्योतकं एकघटवृत्तिभवनाश्रयत्वं पटद्वयवृत्तिभवनाश्रयत्वे प्रतियोगिकान्योन्याभाववदिति बो एम॰
धः द्वयोरव्याख्यानयोः पश्यन्ति गोधावतीतिवत्स्वप्रतियोगिकान्योन्याभाववत्त्वे संसर्गेणान्वयः घटपटयोर्भेदानुभवश्चमानस्य इति तद्दप्य

क्रिग्रहेसौवर्संग्रहात्· नार्थपरत्वेमानाभाव: अहमपीदमचोद्यंचोद्येइतितेह्राजस्तत्रैभाष्यनिर्देशात्· एषिपर्यायतयैवचुदेर्द्विकर्मकत्वसंभवात्· अ
नतएवशिलोञ्छपोपिपृक्षितिपालमुच्चै: प्रीत्यातमेवार्थमभाषतेवेतिकालिदासादिप्रयोगासंगच्छंते अतएवकोपाजेरपिद्रुह्यर्थत्वादेवसंग्रह:इ
तिचेत्· अत्राहु:· अनुनयार्थोत्रयाचि: अविनीतंविनयाय्यानुनयतीतिप्रत्युदाहरणात् नचयाचेरेवतर्हिग्रहणमस्त्विति वाच्यं अर्थभेदाच्छब्दभे
दइतिप्रार्थनार्थस्यप्राचोरिहानुपादानात्· पक्षांतरेतुसर्वत्रार्थाभिहितग्रहणमिति· उदाहरणानि· गांदोग्धिपय: पौरवंगांयाचते अविनीतं
विनयंयाचते अन्येवेतुराछिगोव्रजं माणवकंपंथानंपृच्छति पौरवंगांभिक्षते वृक्षमवचिनोतिफलानि पुत्रंब्रूते धर्मं अनुशास्तिवा अजां
नयतिग्रामं वहतिभारंग्रामं हरतिवा गमयति देवदत्तंग्रामं इत्यादि शतंजयतिदेवदत्तं कर्षतिशाखांग्रामं क्षीरधिंसुधांमथ्नाति मुष्णा
तिशतंदेवदत्तं गर्गान्शतंदंडयति· तंडुलानोदनंपचति तारयतिकपीन्समुद्रं ग्राहयतिबटुंवेदं त्याजयतिकोपंदेवदत्तं दीपयतिशास्त्रार्थंशिष्या
न्· नचाजांगृहीत्वाग्रामंनयतीत्यर्थादप्रयुज्यमानग्रहणक्रियापेक्षमेवकर्मत्वमितिवाच्यं अनानीयतेग्राममित्यत्रानुपपत्तेरकर्मकप्रस
ङ्गेनग्रहणकर्मणोजायाअनभिधानप्रसङ्गात् अजाकर्मेतिवेद्ध्यात्लादीनामविधिर्भवेदितिभाष्योक्ते: इहयाचेर्द्विकर्मकत्वबहूनामनभि

सि० धा० मतं अकस्थलेवुभयथेत्वा देवनतस्संभवात् अत एव अजिग्रहत्तं जनकोधनु स्तक्षितिमहियोगं अनेन भगवतात्रिपुरदाहः कृतः इतियोधितवान्
अयाचितारंनहि देव देवमद्रिः सुतांयाचितुंशशाकेतिकालिदासप्रयोगं उक्ताप्यत्वेनवोधयितुंतमादौकुलविद्यानामर्थमर्थं विदांवरः पश्चात्पा
र्थिवकन्यानोपरिणमय्याद्रपतितेतितत्प्रयोगंचञ्जगराट् हृंनेनेतिविपरिणामेनव्याचख्युः अत एवाचपतञ्जलंस्याद्रितवान्नलेनसहेतिश्रीह
र्षःपचेस्तु द्विकर्मकत्वं दुहि पंच्याविदुल्लेस्वकर्मकपारितिकर्मवत्कर्मणोतिसूत्रगतवार्त्तिकव्याख्यायांकैयटेनस्फुटीकृतंमाधवस्याप्यत्रैवानुमतिः
नन्वेकर्मसंज्ञासूत्रेध्यर्थः पविशिरितिभाष्यविनुक्तंतत्र हि विक्लित्तिरूपफलव्यधिकरणफलव्यापारपरत्वं पचप्यर्थः तथाचविक्लित्तिशालितया तन्डुलानां
उत्पत्तिमत्तयाचौदनस्यकर्मत्वं तेनतन्डुलनिष्ठविक्लित्तेरोदननिष्ठोत्पत्तेश्चानुकूलोदेवदत्तनिष्ठोव्यापारइत्यर्थः तन्डुलान्पचतीत्यत्र तु विक्लेदय
तीत्यर्थः धातुत्वेनपच्युपात्तायांभावनायांपचितत्रपेणप्रत्युपात्तायां विक्लित्तेः कर्मत्वप्राप्तेः ओदनंपचतीत्यत्रविक्लित्यानिर्वर्त्तयतीत्य
र्थः करणत्वेनतन्डुलोपात्तइतिनिरूपितं द्विकर्मकत्वेतुअगमपास्सवैयर्थ्यं स्यात् मैवं मतभेदाभिप्रायत्वात् एतेनाकथितशब्दोपधप्रधाना ९०
योगइत्येततदपाणिनीयं कारकप्रकरणे अपादानादिविशेषैरविवक्षितमकथितमितिव्याख्यानात् अकथितं चेत्यत्र अधिकरणेपिकर्मसंज्ञास्यात् नचतयोरनवकाशत्वं पचाद्यवकाशत्वात् न

चात्रापि एतत्प्रसंगो दुःखादिपरिणामादिति स्वतन्त्रं थोपि वाच्यातः यत्तु यादेर्द्विकर्मकत्वे ज्ञापा प्रतिग्राहिते गंधमाल्यामिति निरसिष्येत ज्ञा
पयां गंधमाल्यं प्रतिग्राहितं येति वक्तव्ये हेतुत्वे भत्वात् विकृतः शेषस्य भाष्ये वक्ष्यमाणत्वात् न च गंधमाल्ये प्रतिग्राहिते पामिति विग्र
हः धेनुरूपप्रयोज्यकर्मणः एवकर्तृत्वेनाभिधानात् एपते कर्त्रथ्य कर्मणः इति वक्ष्यमाणत्वात् अत एव मन्पाल्ये विगतस्पृहा अपि धनं वि
प्राः प्रतिग्राहिता इति प्रयोगः प्रतिग्राहिते गंधमाल्ये जपेति विग्रहे तु नानुपपत्तिः अंतरयइत्यादि वते न क्यापादानाद्यविवक्षायामे
वाधिकर्मकत्वं तद्विवक्षायां तु तत्र कविग्रहो न भविष्यतीति वाच्यं हरतेश्चेति चकारः समुच्चितानां जयत्यादीनामकथितत्वं सूत्रविषयत्वेपि
तथैव चेति समुच्चितानां अणो कर्तुर्णौ कर्मत्वानुपगमात् गत्यर्थैः सार्ह्यवयति अत एव तान्यादेपः पृथगेव संगृहीताः अस्मा कर्तृत्वा
विवक्षायां प्रयोजकस्य हेतुत्वाभावेपि बोधुर्लभत्वाच्च नयदीपिग्रहणं वैयर्थ्यं अकर्मकत्वादिति वृद्धीति सूत्रे रोचवसिद्धेरिति वाच्यं एपेतास्मिन्वित
त्सार्थक्यादिति तच्चिंत्यं भरतस्तत्र गंधर्वान् युधि निर्जित केवलं आनीयं ग्राहयामास समतां जयद्रथं प्रतिग्राहित शब्दस्य बोधितार्थत्व मंगीकृ
त्य स्वेच्छया अन्तरकर्मणि प्रत्ययोत्पत्त्या ज्ञापयतो बोधिते गंधमाल्ये पामिति विग्रहे तदुपपत्तेः पक्षा प्रति ग्राहित शब्दे भावे क्तः ज्ञापाया इति षष्ठी

सि.धा० समासः अर्शआदित्वादच् ज्ञापनिष्ठो यः धेनुकर्तृकस्वीकरणप्रयोजको व्यापारस्तद्विशिष्टं गवं भमात्मेयस्येति वहुव्रीहिः । वैशिष्ट्यं चेदं येनो
भेवत्विती च्छाविषयत्वं एतेन स्वकीयं हंसमोदयन्हिलेशिशुमशनार्थिनो त्रिदचंदेतिनैषधं व्याख्यातं शिशुनि हं उत्कंठयन्नार्थनं नहि ज
पीभूतत्रिदचंदोयस्या इति तदर्थात् । एतेन अप्रधानकर्मणः तेनाभिधानात् काकपक्षधरमेत्यपाचितरंतिवत् शिशुना उत्रिदचंदं प्रार्थि
नं त द्विषपीभूतउत्रिदचंदोयस्या इति तदर्थात् । एतेन अप्रधानकर्मणः तेनाभिधानात् काकपक्षधरमेत्यपाचितरंतिवत् शिशुना उत्रि
दचंदं शब्दार्थितेऽस्यत्र वहुव्रीहिर्दोर्लभ्यात्त्वं ध्वंत्यमितिनिरस्तं इदमित्यावधेयं विभागानुकूलक्रियानुकूलव्यापारो दुहेः संयोगानुकूलक्रियां
नुकूलव्यापारश्च नयतेरर्थः विभागे गां इत्यस्य क्रियायां पयः इत्यस्यान्वयः गोवृत्तिविभागानुकूला या पयोनिष्ठा क्रिया तदनुकूलव्यापार
स्य स्वननिः पीडनादेः ग्रामवृत्तिसंयोगानुकूला या अजानिष्ठा क्रिया तदनुकूलव्यापारस्य च बोधः साक्षाद्धात्वर्थतावच्छेदकयोः क्रिया
शालिनोरजापयसोः कर्मत्वं धात्वर्थतावच्छेदकतावच्छेदकविभागसंयोगरूपफलान्वितयोर्गोग्रामयोः स्वसमभिव्याहृतेन कर्मसंज्ञावि राम०
धानं अत एव च द्यर्थः पचिरिति भाष्यग्रन्थाचिकित्तिरूपफलान्वयित्वेन तंडुलानां उत्पत्तिरूपफलान्वयित्वेन चौदनस्येति द्विकर्मकत्वमुपपादितं

अत एव पचेरपि विकारेण संग्रहस्तत्संमतः एतेन पचेर्द्विकर्मकत्वे तन्भाष्यविरोधशंका निरस्ता यदा तु विभागावधित्वं गोर्विवक्षाते तदा गोः पयो
दोग्धीत्यपादानत्वं गवावधिकविभागानुकूलव्यापारो वृत्तिक्रियेत्यादिबोधात् यदा संबंधित्वविवक्षा यां तु षष्ठ्येव गोः संबंधि पयः पयस्त्वन्निष्ठविभागा
नुकूलक्रियानुकूलव्यापारस्य बोधात् सच विभागो गवावधिक एव तात्पर्यवशात्प्रतीयते इदमप्यवधेयं लकृत्यक्तखलर्था द्विकर्मकेभ्यो
मुख्यगौणयोर्वा कर्मणीति वीक्षायामाह भाष्यकारः प्रधाने कर्मण्याख्येये लादीनाहुर्द्विकर्मणां॥ अप्रधाने दुहादीनां ण्यन्ते कर्तुः
श्च कर्मणः॥ द्विकर्मपदेनात्र नीवह्योर्हरतेश्चैवेति त्रयश्च कारसमुच्चितः कृषिश्च गृह्यते दुहादिपदेन कारिकोपात्ताश्चकारसमुच्चितानां
मध्ये अहेतुमत्स्यंताजिदंशादयश्च गृह्यन्ते ण्यन्तपदेन तु गत्यादिसूत्रोपात्ताश्चशब्दसमुच्चितास्तादृशाश्च तत्र प्रयोज्यकर्त्ता यो कर्म तस्या
भिधाने लादय इत्यर्थः तत्रापि बुद्धिभक्षणार्थशब्दकर्मकेषु गुणकर्मणीति मतान्तरं यन्भाष्ये कथितेऽभिहिते त्वविधिस्त्वमतिर्गुणकर्म
णि लादिविधिः सपरे ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरतेति अत्राद्यचरणः प्रधानकर्मणि लादिभिरभिहिते गुणकर्म
णि षष्ठीत्येकीयमतदूषणपरः तद्भिन्नागुणं कथिते लादयश्चेत्स्युः षष्ठीं कुर्यात्तदा गुणे कारकं चेद्विजानीयां यां यां मन्येत सा भवेत् दुह्यते गोः

सि० धा० पयः पाच्यते पौरवात् कम्बल इति पूर्वोक्तौ राहरणं कारकत्वविवक्षायां तु पयास्वं विभक्तयः दुह्यते गोः पयः पाच्यते पौरवात् कम्बल इति तथा चकथिते ति
प्रधानकर्मपरं तस्मिन्नभिहिते तत्वस्याः द्वितीयायास्तस्याभिव्यापाः षष्ठ्यादिविधिरिति तत्वस्यान्यस्याचार्यदेशीयस्य मतिर्नत्वाचार्यस्य अप्रधानक
र्मणि द्वितीयादर्शनादित्यर्थः न्याय्यं पक्षमाह गुणकर्मणीति सपरे दुहस्तत्र परशब्दो गत्यादिसूत्रपरः तत्सहिते दुहादौ गुणकर्मणि लादयः
दोहादिस्ववृत्तेः पयआद्यर्थत्वात् गवादीनाम् अप्राधान्यं तत्रप्रत्ययोत्पत्तिस्कि दुग्धाद्यर्थिनः प्रथमं गवादावेव प्रवृत्तेः तदुक्तं गुणकर्मणि लादि
विधिः पूर्वं गुणकर्मणा भवतियोगात् मुख्यकर्मणे स्तु पश्चाद्व्यपदेशः आकृ तस्माच्छ्रुतस्य दुहेर्भवति गवा पूर्वमेव संबन्धः गोर्दुहिना पयसस्का
प्राकृतस्माद्व्यापारस्मिन्निति गौर्दुह्यते पयः दोग्धव्या दुग्धा दोहा वेत्यादि एवं तेनु प्रयोजकव्यापारस्य ग्राहं प्राधान्यं णेपर्थत्वात् तस्य विशेष्य
तापन्नत्वात् प्रयोज्यव्यापारस्यार्थं प्रयोजकव्यापारस्य तदर्थत्वात् अतस्तत्कर्मणोरपि तथात्वं अत एव पत्रापि प्रयोज्यस्यैव प्रत्ययः बो
ध्यते माणवकं धर्मः माणवको धर्ममिति वा बुध्यर्थभक्षपोक्तमेकाः पूर्वाचार्यसंकेतात् चेष्टितप्रक्रियोगात्यर्थाः एवं गुणेन प्रयोज्ये कर्मणि एम०
लादयः देवदत्तो ग्रामं गम्यते गमयितव्यः गमितः सुगम इत्यादि अनेन रूपमतेराचार्यस्य तद्द्वितीयत्वमीपचन्नामोपपत्तिस्म तेत्यागमाविच्छेदो

क्तिः स्वरूपल्पितत्वनिरासार्थाः नच बुद्धिप्रत्ययसमानार्थशब्दकर्मकेषु गुणकर्मण्येकल्लादिप्रसंगः एवं नेकर्मण्यद्वे त्वस्य परत्वात्स्परइत्यनेनबाधादितिवा
च्यं अपरस्त्वाह तिङ्गायेणमन्तं तरश्चात्रियस्यानेत्रापि विकल्पसिद्धेः नदर्पसंग्रहः मुख्येहनीव दह पांतु गुणोदुग्धार्थशब्दकर्मकसवत्र्यशना
र्थकानां एवंतां तरस्य किल कर्मणानुपयोगे सप्रयंदधतिलुकरवलर्थेकृत्याः॥ ॥अथकृयोगेकर्मणि षष्ठी द्विकर्मकेभ्यः कृत्रकर्मणोस्या
दितिचेत् अत्रभाष्यं उभयथा गोणिकापुत्रे इति नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा अत्रैकेनशब्देयोर्मिन्त्रिकस्यपोगुणप्रधानयोः कर्मणोरभिधा
नानुपपत्त्या प्रधानकर्मणोभिधानेन्यायं षष्ठीतृप्रयोगे गुणप्रधानाभ्यां द्वितीयावद्विधीयत इति अविरोधाद्भाभ्यां यामा प्रधाने नित्याभाष्यमा
मारणपाद्गुणकर्मणि वैकल्पिकी कालमार्गाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणां देशश्चाकर्मकाणामिति केचित् गंतव्योध्वाः ध्वगंतव्यः निपातनाद्विशे
षणस्यापि परनिपातः नच गंतव्यपदवैयर्थ्यं जंतव्यतया लोकेप्रसिद्धस्य निपातपरिमाणस्य क्रोशयोजनादेर्ग्रहणार्थत्वात् मासमास्ते गोदोह
मास्ते गोदोहनयपर्यातं कालमभिव्याप्यतिष्ठतीत्यर्थः क्रोशमास्ते कुरूंस्वपिति नचकालाध्वनोरिति द्वितीयासिद्धेः कर्मसंज्ञावैयर्थ्यं गोदोह
नयपर्यंतं कालमभिव्याप्यतिष्ठतीत्यर्थः क्रोशमास्ते कुरूंस्वपिति नचकालाध्वनोरिति द्वितीयासिद्धेः कर्मसंज्ञावैयर्थ्यं गोदोहादेः कालो

सि०धा० पाचितेपि कालत्वेनाप्रसिद्धत्वात्· कालाध्वनोरकलादिविषयार्थत्वात्· आस्यते मासः· आसितव्यः· आसितः· मासो वा एवं शय्यते क्रोश
इत्यादि· देशपदं ग्रामसमुदायविशेषात्मककुरुपंचालादिपरं भाषोदाहरणसामर्थ्यात्· तेनाधिशीङ्स्थासामित्यादेर्नैवैयर्थ्यमिति
कण्ठः· यदि तु सकर्मकधातुत्वं तदर्थविशिष्टः आसनादौ आस्यादपोवर्त्ते तेन तदा पूर्वेणैव सिद्धं मासमासनेन व्याप्नोतीत्यर्थात्· पक्ष
स्यति· प्राकृतमेवेदं कर्म यथा कटं करोतीति द्वितीये विस्तरः॥ ॥गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ
गतिबुद्धिभक्षणार्थानां शब्दकर्मकाणामकर्मकाणां च धातूनामणौ कर्त्ता णौ कर्म स्यात्· यद्यपि प्रयोजकव्यापारेण प्रयोज्यव्यापारस्ये
प्सिततमत्वात् तेनैव युक्तकर्मसंज्ञासिद्धेरन्यथापि नियमार्थमिदं णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेव नान्येषामिति·
तेन कर्मत्वं याप्याप्रापणइत्यत्र गतेरेव प्रापणपदार्थत्वात्· बुध्यर्थेति ज्ञानसामान्यवाचिनामेव ग्रहणं न तु विशेषार्थानां स्मृत्यादीनां
अदृशोरुपसंख्यानस्य वक्ष्यमाणत्वात् बोधयति माणवकं धर्मं भोजयति आशयति वा माणवकमोदनं आदिखाद्योः प्रतिषेधः आ एम०
दयति खादयति वान्नं बटुना भक्षेरहिंसार्थस्य प्रतिषेधः न चक्षुरादिरणपतत्वादेरणौ कर्त्तृत्वस्याप्रसिद्धेरस्मिन्निति विधानादृष्टावित्य

त्रापि सन्निधानात्तस्यैव प्रतिषेधात् हेतुप्रश्निजं तत्त्वविरहदशायामित्यर्थात्तत्रापि प्रसक्तेः भक्षयत्यन्नं वटुना अहिंसेति किं भक्षयति बलीवर्दा
न् सस्यं भक्षयति बलीवर्दान्सस्यं क्षेत्रस्थानां यवानां चेतनत्वाभ्युपगमात् एवं भक्षणेऽत्र स्वामिनो वा हिंसाहिंसायोगे भक्षणे भक्षयतेर्वर्जितं स्वीका
रात् शब्दः कर्मकारकं येषां ते शब्दकर्मकाः न तु कर्मपदं क्रियापरं अत एव सा न शब्दार्थेति पाठादेव तादृशार्थलोभात् कर्मशब्दस्यार्थस्य गु
पादानसामर्थ्यात् अध्यापयति पाठयति वा पुत्रं देवदत्तः दृशेश्चोपसंख्यानं दर्शयति हरिं भक्तान् चाक्षुषपरत्वाद्बुद्ध्यर्थत्वेन गतिबुद्धावपि
तत्र ज्ञानसामान्यवाचिनामेव ग्रहणं न तु विशेषवाचिनामिति ज्ञापनार्थमुपसंख्यानं आवयति श्लोकं देवदत्तमिति तु शब्दक्रियाणा
मित्यर्थे प्रणोनेरप्युपसंख्यानात् अन्यथा तु शब्दकर्मकत्वात्सिद्धं आह्वापयति क्रन्दयति वा देवदत्तेनेत्यत्र प्रतिषेधो वाच्यः पक्षद्वये
पि शब्दायतेः प्रतिषेधो वाच्यः अकर्मकत्वादपि प्रसक्तिसत्त्वात् शब्दसकर्मणो धात्वर्थे तत्त्वभावात् शब्दापयति देवदत्तेन अकर्मकपदे
विद्यमानकालाद्यन्यकर्मकपरं तेन मासमासयति चैत्रमित्यादि सिद्धं देवदत्तेन पाचयतीत्यादेवने कर्मत्वं ॥ ॥ हृक्रोरन्यतरस्यां ॥
हारयति कारयति वा कटं भृत्यं भृत्येन वा न वेति विभाषेति सूत्रे तु भवत्र विभाषोपयमिति वार्त्तिकं तथा हि अभ्यवहारयति व्यापारं वक

सि० धा० मोदनं माणवकेन वा इत्यत्र भक्षस्य स्वसमानार्थत्वात् आत्मने विकुर्वते सैन्धवाः विकारयति सैन्धवान् सूतैर्वैतत्यत्र तत्प्राप्ते इदमारभ्यते अभिवादिदृशो
रात्मनेपदे चेति वक्तव्यं अभिवादयते णौ आत्मनेपदे दृशो णिजन्तस्यार्थत्वात् उपसंख्यानादप्राप्ते विभाषेयं अभिवदति गुरुं देवदत्तः अभिवादयते गुरुं देव
दत्तं देवदत्तेन वा दर्शयते राजानं भृत्यान् भृत्यैर्वा परस्मैपदे तु कर्मैव कर्मसंज्ञाविकल्पपक्षे तौ रणाविति आत्मनेपदं तत्फले तु णिचश्चेति॥
स्वतन्त्रः कर्ता॥ क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तृसंज्ञः स्यात् स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वं तदुक्तं हरिणा धातुनोक्तक्रियेनित्यं कारके
कर्तृतेष्यते धात्वर्थफलाश्रये कर्मण्यतिव्याप्तिवारणाय व्यापारेति पाचयति चैत्रो मैत्रेण तत्रादौ पाकस्य णिजर्थस्य च धात्वर्थव्यापारत्वा
त्प्रयोरुभयोः कर्तृत्वे चैत्रवत् इति कर्तृत्वस्यैव तु पात्रेण तत्रैव संख्यान्वय इति तु विशेषः चैत्रो मैत्रं गमयति इत्यत्र प्रयोज्यस्य कर्तृत्वेपि नतृतीया
कर्मसंज्ञावरोधात् स्थाली पचति इत्यादौ स्थालीनिष्ठव्यापारस्यैव धात्वर्थत्वात्कर्तृत्वं तेन चैत्रेण पचति इत्यादौ धात्वर्थव्यापाराभावा
दपि चैत्रादौ नातिव्याप्तिः तद्व्यापारस्य अभावप्रतियोगित्वेपि धात्वर्थत्वानपायात् चैत्रवृत्तित्वेन भासमानत्वस्य लक्षणे निवेशाभावात् घटो घट एम०
पटो नेत्यादावन्योन्याभावप्रतियोगिनि घटादौ धात्वर्थाश्रयत्वाभावाद्व्याप्तिर्न च तत्रेत्यत्राह तेन भवति पदस्योभयतो दात्म्यभवने लक्षकतया

कर्त्तोति॰ यद्यप्यविहितलक्षणः समासः सह सुपेत्यनेन विधीयत इति भाष्ये वक्ष्यते॰ तथाप्यसंयुक्तपाठेन समाससंज्ञायाः सर्वार्थत्वं न्यायव्युत्पादनाय
त्वेन वकाशव्युत्पादनमिति कैयटः ॥ ॥ सह सुपा सहेति योगो विभज्यते सुबामन्त्रिते पराङ्गवत्स्वरे इत्यतः सुपि इत्यनुवृत्तिः सुबन्तं समर्थेन सह समस्यते
यो जातत एव पर्यभूषत्॰ यः शंबरमन्वविंदत्॰ अनुव्यचलत्॰ अनुप्राविशत्॰ सुप्सुपेति तु न विधानेन कतिपयतिङ॰ न मात्रविषयत्वादस्य नातिप्रसंगः
योगविभागस्येष्टसिद्ध्यर्थत्वात्रेह॰ संप्रपच्छ्युः यत्वाद्वंद्वापमार्गं सुविविति संख्याविवक्षिताः तेन पूर्वं भ्यः समासः पश्चाल्लोपः समासेऽशाकल्प्रतिषेधा
घरणादेशः समासान्तोदात्तत्वं तु न भवति तिङ्ङतिङ इति निघातेन बाधितत्वादिति केचित्॰ अन्ये तु तथा सत्यनो गतिर्गतावितिनिघातः विशाखद्
दात्तः उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति स्वरितः एवं चानुप्राविशदिति भाष्योदाहरणावैयर्थ्यं अतः सतिशिष्टत्वात्समासान्तोदात्तत्वमे
वनुवसुत्वेति प्रसंगः तिङ॰ कर्त्तव्यो कान्वादिस्वाह॰ अपरे तु वचनग्रहणसामर्थ्यादुक्तेष्वप्येकत्वादिमप्रथमाभवत्येव॰ न चप्रवेणापत्तिः हलुप्
दिलोपसंभवात्॰ अत एवैकपद्यादमनुप्राविशदेवदत्तेत्यत्रामण्कान्तस्मामंत्रितमितिनिघातप्रतिषेधः समाससंज्ञायाः प्रयोजनमिति तिङ॰ तेनि
घातवादिनिरस्ताः॥ अत्रदीक्षिताः स्वमतस्वरूपमात्रं लिखन्तोऽकैयटहृदयं नाम्नां किं परत्वान्निघात उत सतिशिष्टत्वात्समासान्तोदात्तत्वमि

सि॰धा॰ तिनावधारितं॰ किंच॰ गतिकारकोपपदादिति उत्तरपदप्रकृतिस्वरत्वं भवति न वेत्यपि विचारयितुमर्हं तत्र कृदुत्तरपदस्य वार्त्तिककृता प्रत्याख्यानात्॰ किंच
अनुव्यचलदित्यादौ पर्यायतथा सति यो जातं तस्मादौ तु पदद्वयात्मिस्यमिति निघातप्रतिषेधात्समासान्तोदात्तत्वं दुर्वारं किंच व्रतिशिष्टत्वात्समासान्तोदात्तत्व
मिति पक्षे अत्यायाहि शश्वद्गो वयं ते ऽयमपाः॰ उदात्तपाठो न संगच्छते अपि च निरिणामि इत्यत्र निशब्दे वितन्वत इत्यत्र विशब्दे च निघातः समासान्तो।
दात्तत्वं तु निरिणातीत्यत्र नास्ति॰ न न्वतनुते इत्यत्र तन्वतीति वैषम्यं दुरुपपादं तस्मादिदमत्र तत्त्वं वार्त्तिकमते तावदयमेव पक्षः कृदुत्तरपदप्रत्याख्यानात्॰ उदात्तव
ताङ्गतिमता चेति॰ समासो वक्तव्य इति तं तु सुबधिकारे नि॰ समासविधानेन गतिसमासस्य तत्पुरुषात्पृथग्भावात् वितन्वत इत्यत्र बुकादिवदिदं तोदात्तत्वं
कल्प्यं अत्यायाहीत्यत्र तु तिङ्॰ तिङ॰ इति निघाते आ॰ समासः उत्तरपदस्यो[illegible]तन्वतयागतिस्वराभावादव्ययपूर्वपदे वेद्यमिति दिक् भाष्यमते तु सह सुपे
त्यत्र योगविभागेनोक्तसमासविधानात्तत्पुरुषसंज्ञाविरहादतिस्वरस्याव्ययपूर्वपदप्रकृतिस्वरस्य + पदप्रकृतिस्वरेणाद्युदात्तः न ततो निशब्देन समा
से कृते कृदुत्तरपदप्रत्याख्यानादुत्तरपदप्रकृतिस्वरेणोपपत्तिः निरिणातीत्यत्र तु पञ्चत्वयोगे निघातनिषेधात् सर्वं वेद्यं सिद्धं भाष्यमते तु सहसुपेत्यत्र राम॰
योगविभागेनोक्तौ वा भाष्ये समासान्तोदात्तेन वितन्वत इति सिद्धं अन्ये विदन्ति निरिणातीत्यादौ उत्तरपदप्रकृतिस्वरत्वं तु वाद्गलकात्समाधेयमित्या

कुः इदं तु हेतुकृत्यं कृदुत्तरपदप्रकृतिस्वरत्वं नेष्यते हि येन प्राप्य विधीयते इति ॥ कृतस्य तत्र कृता सह समासो भवति । तत्रान्तरेण कृदुत्तरपदं कृत एव भवि-
ष्यतीति भाष्यकारोऽप्याह ॥ समासे गतिकारकोपपदादिति स्वरो न प्रवर्त्तत इति गम्यते ॥ समासस्य तत्पुरुषतः सत्वेन उक्तः स्वभावविशिष्टतये-
व तद्भावस्यावाच्यत्वात् । अत एव प्रपञ्चितमेतत् । मिपश्च कृदुत्तरपदस्याव्ययमित्युदाहृतम् । अन्यथा प्रपञ्चनीत्यस्यैव तत्वे कोपनप्रसंगात् । अपि च । उदा-
त्तत्वं गतिमता वनिति । समासो वक्तव्य इति वार्त्तिकव्याख्यायां परस्परिपंती त्युदात्तवत उदाहरणं निपातैर्यद्यदिहन्तेति निघातप्रतिषेधार्थं तीत्यस्य
प्रत्ययस्वरेण घुरातृत्वात्परिशब्दस्य पंक्तीत्यनेन समासः । अनुव्यचलदिति । पूर्वपदस्यातिङः तिङः इति निघातः । तत उदात्तत्वाभावादिति मतेति पृथग्गु-
क्तं तत्रोपसर्गाणां पदानां समासे कृते समासान्तोदात्तत्वं भवति । तत्पुरुषे तुल्यार्थत्वतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इति पूर्वपदप्रकृतिस्वरत्वं तु
न भवति । गतिर्गताविति नोऽनुदात्तत्वात् । तत्रैवोदात्तस्वरितग्रहणानुवर्त्तनात् । विशब्दस्य पूर्वपदत्वाभावादिति तावत्कैयटेनैव व्याख्यातम् ।
तथा च समासान्तोदात्तत्वं भवत्येवेति स्पष्टमेवोक्तं इदमप्यवधेयं तिङः समासस्त्वङ्गत्वाद्दस एव अन्यथा पर्यभूषयदित्यादौ हल्ङ्याब्भ्य इति लोपेन यत्या
करोतीत्यादौ नपुंसकत्वाभ्युपगमे न च निर्गतोऽपि पत्स्यकुरुते इत्यादौ स्वस्यप्रकुर्वीरन्नित्यादौ न लोपस्य च प्राप्तेः छान्दसत्वेनैवासु लोपस्य वाच्य

सि०धी त्वात्. तस्मात्काव्यादौ उपसर्गः पृथक्कृद्भेवेति सिद्धांतः इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं उक्तयोगाभ्यां
सिद्ध समासानुवादेन विभक्त्यलोपस्वरौ विधीयेते अयं चानित्यः उक्ता हरिर्ववी मनइत्यादेर्जीमूतस्येव भवति वृतीकमित्यत्रैतेतिरीये
थकच्छंदसोऽस्य च दर्शनात्. एतेनेव समासस्त्रस्य छांदसत्वमपयास्तं इवेन समासेऽश्रोताः समासगतोपमाया अलंकारिकैरुदाहृतत्वाच्चेति
हरीतकीं भुंक्ष्व राजन्मातेव हितकारिणी अद्वैतमप्यनुभवामि करस्थबिल्वमिवाखिलं शरीरमहिनिर्ल्वयिनी ववीक्षेइत्यादेश्व समर्थयोगान्ना
त्वेति प्रथमांतेनैव साधने कर्मन्यपदार्थ इति सूत्रस्य भाष्यसंमतत्वात् एवेति दीक्षिताः ॥ ॥अव्ययीभावः अधिकारोयं यद्यपि पूर्वपदार्थ
प्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्व इति प्राचां व्यवहारः इत्यपि महासं
ज्ञाकरणसामर्थ्यादाश्रितः तथापि प्रायिक एव उन्मत्तगंगमित्यव्ययीभावेऽन्यपदार्थस्य अर्द्धपिप्पलीति तत्पुरुषे पूर्वपदार्थस्य द्वित्रा इति बहु
व्रीहावुभयपदार्थस्य च प्राधान्यदर्शनात्. समाहारद्वंद्वे उभयपदार्थप्राधान्यादर्शनाच्च एकार्थीभावपक्षे पदद्वयस्यानर्थकत्वाद्धेति कैय राम०
टादयः ॥ ॥अव्ययं विभक्ति समीप समृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्या

तद्वचनेषु अत्राव्ययमिति योगे विभज्य अपदिशमिति साधनीयं क्लीबेंऽतरालं अपदिशं दिशोर्मध्ये विदिक्स्त्रियामित्यमर इति केचित् । त
च्चिंत्यं भाष्यादावनुक्तत्वात् । विभक्त्यर्थेऽव्ययीभावः अव्ययीभावे शरत्प्रभृतिभ्य इति टच् । अव्ययीभावश्चेति क्लीबत्वमिति क्षीरस्वामिना त
त्र व्याख्यातत्वात् । दिशोरिदमिति विग्रहस्य दर्शितत्वाच्च । संबंधस्य चार्थवशान्मध्यरूपस्यैव ग्रहणात् । नन्वत्र विभक्तिपदमधिकरणमात्रपरं न
चैवं विभक्तीति सामान्यनिर्देशवैफल्यं परिशिष्टवदधिकरणपदस्यैव ग्रहणापत्तेरिति चेत् तथा सति कर्मात्रापात्राधिक्यात् । मैवं अधिकरणमात्र
विवक्षायां विभक्तिपदस्थाने ङिग्रहणस्यैव लाघवात्संगतात् । नचैवं एकत्वस्यैव लाभापत्तिः तथात्वे सुदृत्यवामिधानापत्तेः प्रथमोपस्थितत्वा
त् । तस्माद्विभक्तिपदोपादानसामर्थ्यादधिककरणादतिरिक्तार्थवृत्तेरप्यव्ययस्य ग्रहणमभिमतमिति नकाप्यनुपपत्तिः ततश्च कर्तृकर्मकरणसं
प्रदानापादानरूपशक्तिवृत्तेरप्यव्ययस्यात्र सिद्धत्वात् अधिकरणसंबंधोभयपरमव्ययमत्र गृह्यत इति सिद्धं पत्तु नारद इत्यबोधीत्यादौ इति शब्देनेक
र्माभिधानस्य प्रसिद्धत्वादिति नारदमित्यव्ययीभावो भवत्येव विभक्तिपदस्वारस्यादिति केचिदुक्तं तच्चिंत्यं तस्य कर्मत्वमात्रावृत्तित्वात् । तथाहि ।
नारदं अबोधि इत्यत्र तज्ज्ञानबोधापेक्षया नारद इत्यबोधीत्यत्र ज्ञानबोधस्य वैलक्षण्यमनुभवसिद्धं आद्ये उल्लेख्यज्ञानस्य नारदविशेष्यकत्वं नियमे

सि०धा० न गम्यते नारदत्वप्रकारकत्वं तु औत्सर्गिकं धर्मीतरप्रकारकस्यापि नारदविशेष्यकज्ञानस्य तद्दृष्टेत्यत्वात्· द्वितीये तु नारदत्वप्रकारकत्वेनि
यमेन गम्यते नारदविशेष्यकत्वं तु न तथा: नारदत्वप्रकारके मित्रविशेष्यके पि विरोधे सति तादृशप्रयोगदर्शनात्· तथा च विशेष्यत्वरूपं कर्मत्वं
ज्ञानाद्यर्थकधातुयोगे द्वितीयार्थः इति शब्दस्य तु प्रकारत्वमर्थः स्वसमभिव्याहृतपदार्थतावच्छेदकप्रकारकत्वस्य ज्ञाने नियमतो वभास
नात्· स्वसमभिव्याहृतपदार्थविशेष्यकत्वं तु घटमाख्यलेलभ्यते न तु अमख्यलेद्द्वितीय अनभिहितस्त्रेवेवक्ष्याम: तत्राव्ययीभावस्वीकारे तस्य नि
त्यसमासत्वान्नारदइत्यगोधीतिप्रयोगस्यासाधुत्वप्रसंगाच्चेतिदिक्. विभक्तिरित्यर्थरूपाकारकशक्तिरधिकरणादिस्वरूपा वचनेन शब्दः कर्म
वुद्ध्यस्यार्थपरः विभक्त्यादिभिरभेदेनतद्व्याख्यः अधिकरणाद्यर्थे वर्तमानं सुवंतं मव्ययं समर्थेन सह समस्यते न च सुप्सुपेत्यनेन
सिद्धिः पुनर्विधानात् तस्यानित्यत्वद्योतनात्· अतएव विभाषाधिकारात् पूर्वं पठितस्यापि तस्य नित्यसमासत्वाभावात् पूर्वं भूतो भूतपू
र्व इति स्वपदविग्रहो वृत्तावुक्तः वीप्पायामश्वोवोप्यश्च इत्यादौ तत्समासे कैपटे पीतिवोध्यं संज्ञायामिति वत्सुप्सुपेत्यस्यापि नित्यत्वेसितिनि एम०
त्यसमासयोः शाकलप्रतिषेध इति वार्त्तिकस्य नित्यग्रहणात्रत्याख्यानपरस्यानित्यत्वग्रहणेन नार्थः इदमपि सिद्धं भवति वीप्सायामश्वो वाप्य

श्च इति भाष्यस्यानुपपत्तेश्च यथाकृतवार्त्तिकेनाऽपि तन्निषेधसिद्धेः नचैवं पंकजादिपदेष्वपि नित्यसमासत्वादविग्रहत्वं स्यादिति वाच्यं यो
गिकार्थपुरस्कारेणाविग्रहदर्शनेपि समुदायार्थस्य पद्मत्वस्य समासैकगम्यतया वक्तुमशक्यत्वादिति दीक्षिताः विभक्तौ ऽरौ इत्यत्र च हरिः
हरौ इ० अधि इत्यलौकिकं वाक्यं अंतरंगानपीति ऽलुक् नतु परत्वादौत्वं घेरकारान्तादेशे यथोक्तरूपासिद्धेः सन्निधानात्समस्यमानपदान्तर्गतेव
विभक्तिर्गीत्यात तदर्थस्याधिशब्देन द्योत्यः नचैवं निपातेनाभिहिते विभक्त्यनुपपत्तिः सुपैतेन समासविधानसामर्थ्यात्तदुत्पत्तेः अत एव बहिर्जार्थः स्यप
दस्यादौ उक्तार्थस्यापि प्रयोगो वक्ष्यते विभक्त्यर्थमात्रवृत्तेरेवाव्ययस्येह ग्रहणं केचेन अग्रहणास्यसामर्थ्याद्विभक्त्यादिवृत्तेः कान्येपात अन्यथा तद्वैयर्थ्या
त् गृहस्योपरि ग्रामस्य पुर इत्यादौ नात्वधिकरणार्थकावेऽपि दिग्देशकालेष्वधिके सुवर्तमानत्वान्न समासः केचित्तु निपातेनाभिहितत्वात्सप्त
मीतेनात्वं समासे पक्षाषष्ठ्यंतेनेति मतद्वयमपि परिशिष्टोक्तत्वात् इंगीचक्रुः तच्चिंत्यं समस्यमानपदस्य सप्तम्यंतं विनासमासेऽधिकरणार्थका
ऽधिशब्दप्रयोगानुपपत्तेः प्रागुक्त हरौ अधि कृत्वेति विग्रहमाहुः तन्न नित्यसमासत्वेप्यस्वपदविग्रहत्वमक्षतं ल्यपं वृत्तस्य समासघटकातिरिक्तस्य प्र
वेशात् नच समासार्थलेशमप्यबोधयतस्तस्य विग्रहांतर्भावो न युक्त इति वाच्यं समासार्थातिरिक्तार्थबोधकत्वेन विग्रहवहिर्भावे कुंभं करोति कु

सि० धा भकारइत्यपि न स्यात्· अरण्ये तेक्तं मानत्वसंख्याघनवबोधात्· समासार्थबोधकत्वस्याऽधिकं प्रविष्टमिति न्याये नोभयत्र सामर्थ्यात्· किं चैवं विग्रह
वद्भिर्भावे कुंभंकरोतिकुंभकारइत्यपि न स्यात्· अरण्ये वृत्तेमानत्वसंख्याघनवबोधात्· समासार्थबोधकत्वस्याऽधिकं प्रविष्टमिति न्याये विग्र
हे न तद्बोधादिति दिक्· समीपे· हेम्नस्समीपमुपहेमम्· अत्वर्थसंज्ञात्वात्सामीप्यप्राधान्येपं समीपवर्त्तिप्राधान्येन तूपदेशादि इति वृत्ती दि
वेक्ष्यते· अतो न सामीप्य[illegible] सन्दुयामेदेनान्वयः· तत्र तु समीपवर्त्तिनोऽभेदेनेति विशेषः· नच समयानिकषाग्रामादित्यादावतिप्रसंगः· तेषां म
धिकरणत्वविष्टसामीप्यपरत्वात्· ग्रामस्य समीपे इति बोधात्· उपकुंभमित्यादौ सामीप्यस्य घटादिनिष्ठत्वेन गम्यमानत्वात्· तथा च तत्र सामीप्य
देशान्तनेतद्वृत्तित्वं च घटादौ प्रकारः· उपकुंभमित्यादौ तु कुंभस्यैव सामीप्यनिरूपकत्वेन तद्विशेष्यत्वेनेति विशेषः· यत्तु तत्र द्वितीयापंचम्योर्विधान
सामर्थ्यान्न समास इति तन्न· चैत्रस्य ग्रामं समयेत्यादावत्सामर्थ्याद्दसमासेन तद्विधेश्चारितार्थत्वात्· न च समासस्य नित्यतया वृत्तस्य विशेषणा
योगेनेति चैत्रस्येत्यादेर्नापत्तिः· सविशेषणानां वृत्तिर्नेत्यस्याप्रसिद्धत्वात्· अनित्यसमासपरं तदिति वाच्यं मानाभावात्· तस्य योगे एकार्थीभा रम०
वेन समासस्याप्यभावाच्च· न च स्थूलत्वकुंभस्य कार इत्यापत्तिः कर्मयोगं विना अणोऽसाधुत्वात्· स्थूलं कुंभकार इत्यस्य वाऽसामर्थ्यात्· अत

एवमस्यां तत्पुत्रीपतिरित्यादेरगमकत्वं माभूदित्युक्तं व्यपेक्षायां वाक्यमेव एकार्थीभाववृत्तिरेवेत्यप्यतदर्थत्वात् समृद्धो मद्राणां सन्निधिः सुमद्रं मद्राणां वि-
शेष्यत्वेन कुगतीति तत्पुरुषः समृद्धा मद्राः सुमद्रा इति अव्ययं दुर्यवनं अर्थाभावे तु अभावप्रतियोगिना समास इदं तु अत एव अभावप्रतियोगित्वेन तु
यवनानामिति विग्रहः अर्थाभावे निर्मक्षिकं अविघ्नं संसर्गाभावे परसमासस्तत्र समस्यमानपदार्थविरोधित्वात् भेदस्य तु पदार्थतावच्छे-
दकेनैव सह विरोधात् यत्तु भूतले घटो नेत्यत्र घटाभावबोधो न भवति अव्ययीभावस्य नित्यसमासत्वादिति तन्न अभावस्य विशेष्यत्वे एवा-
व्ययीभावविधानात् भूतलवृत्त्यभावप्रतियोगी घट इत्यभावप्रकारकप्रतियोगित्वसंसर्गकघटविशेष्यकबोधतात्पर्ये भूतलवृत्तित्वाभाववान् घट इति
बोधे वा समासाप्रसक्तेः न च भूतलवृत्तिर्घटाभाव इति बोधस्यापि तात्पर्यवशेन नैयायिकैः स्वीकारात् तत्र दोषो दुर्वार इति वाच्यं घटत्वावच्छिन्नप्रति-
योगिताकप्रकारकाभेदसंसर्गकाभावविशेष्यकबोधे तात्पर्ये अव्ययीभावः घटत्वावच्छिन्नप्रतियोगितासंसर्गकघटप्रकारकाभावविशेष्यकबोधे
तात्पर्ये तु नेति विभागसंभवात् न चोपघटमित्यत्रोक्तावच्छिन्नप्रतियोगित्वे संसर्ग इति वाच्यं अर्थाभावपदात्तादृशप्रतियोगिताकप्रकारकबोध-
स्यैवोक्तत्वात् तदर्थं विहिताव्ययीभावस्यापि तदर्थकत्वकल्पनात् एतेन नान्तुपाजेष्विति पर्युदासो व्याख्यातः तत्रैव निरूपितं यजतिषु येयजा

सि०धा मह्यं करोतीति नानुयाजेष्विति श्रूयते तत्र संशयः प्रसज्यप्रतिषेधः पर्युदासो वेति । तत्र नञो नुयाजान्वये नित्यत्वाद्वा समास इति वदतो याजशब्दे
न समासापत्तिः सामर्थ्याविघातात् । वार्त्तिककारोऽपि नावचनेनार्थकं भाष्यकारेण समासस्यानित्यतां विग्रहे वा समभिव्याहृतं नार्थं ना चैवमेतेन । वि
ग्रहसमासयोरेकार्थत्वे हि समासनियमाद्वाक्यनिवृत्तिप्रसंगो विभाषावचनमनर्थकं स्यात् । इति प्राप्ते सिद्धान्तः । प्रतिषेधस्य प्रसक्तिपूर्व
कत्वात् स्याच्च लोकतोऽनिर्वाहात् शास्त्रादेवतदङ्गीकारे वृप्रसंजके प्रतिषेधकयोः स्थलत्वेन लताबोः शिल्पायेन विकल्पप्रसंगात् पर्युदास एव । सामर्थ्ये
सत्यपि विभाषाधिकारेण समासपाठात् समासः । समासे विशेषणत्वान्नञ्योगे वाक्ये तु तरन्वय इति वैषम्येऽपि अर्थभेदाभावेन समासेन वाक्यं मा
बाधीति तदपवर्णकत्वात् । अन्यथा विभाषाधिकारात्प्रागपि ह्येतेनोपकुंभादिसमासेनापि वाक्यं न बाध्येत । उपपदसमासेन च कुंभकारादि
ना तस्मात् कात्यायनीयं वावचनानर्थक्यं न्यायस्त्रोमयविरोधादयुक्तमिति । शब्दचिन्तामणिप्रभृतयोऽप्येवं पर्युदासः घटो नास्ति त्वं नासि
अहं नास्मीत्यादौ पुरुषव्यवस्थानुपपत्तेः घटादीनामभावान्वयेत्तदादौ नास्तिसामानाधिकरण्याभावात् । घटाभावस्त्वं भावो मदभावश्चास्मी २८०
ति वृत्तः सर्वत्र प्रथमपुरुषापत्तेः अतो नञर्थस्तिङर्थः क्रियान्वय एव युक्त इति । तदप्यसत् । घटो नास्तीत्यत्र सावच्छिन्नप्रतियोगिताकत्वं

घेन घटत्वस्याभावे विशेषणं यथा घटत्वावच्छिन्नप्रतियोगिताघटस्याभावे संसर्गः घटाभावोऽस्तीत्यत्र न घटपदं घटत्वावच्छिन्नप्रतियोगिताके
लाक्षणिकं अभेदस्य तस्याभावे संसर्गः उभयथाप्यभावस्य विशेष्यत्वात्प्रथमपुरुषः त्वं नासीत्यत्र वर्त्तमानाभावप्रतियोगीत्वमिति त्वे
दंभावोऽस्तीत्यत्र त्वत्प्रतियोगिको वर्त्तमानोऽभाव इति बोधः आद्ये प्रतियोगित्वमाख्यातार्थ आश्रयत्वं तयात्वं पदार्थे विशेषणमिति पक्षे त्वं सामा
नाधिकरण्यं द्वितीयेऽत्वे पदलक्ष्यस्यत्वत्प्रतियोगिताकस्याऽभावेऽभेदः संसर्गः आभावे चाख्यातार्थवर्त्तमानत्वस्य इति पक्षे सामानाधिक
रण्याभावः एवमहं नास्मीत्यादावपि योज्यं एतेन वायोः रूपाणामभावोऽस्तीतिवत् रूपाणि न सन्तीत्यत्राप्येकवचनमेव स्यादित्यपि निरस्तं आ
द्ये रूपत्वावच्छिन्नप्रतियोगिताकाभावस्यैक्यादेकवचनम् द्वितीये वा पृथक् भावप्रतियोगी निरूपाणीति विशेष्यभूत रूपात्मकप्रतियोगिभेदा
द्बहुवचनं इत्यास्तामप्रकृतमेतत् एतेनाभावस्यार्थो श्राद्धं कुर्वीत रात्रौ श्राद्धं न कुर्वीतेति स्मृतिवाक्ये विपर्यासो व्याख्यातः यत्तु तत्र नि
षेधवाक्ये कुर्वीत पदं चैव पर्यवसायि इति कृत्वोक्तं तत्र अकरणं धात्वाख्यातार्थसंबन्धिनि लक्षणाभ्युपगमादाकांक्षाते न लक्षणावद् इति मेथि
लसंप्रदायः अन्यथा हिमस्यात्पयोऽतिहिमं तस्य ध्वंसः इत्यर्थः न वार्थाभावे नासि हेतौ पृथगुपादानं व्यर्थं तत्रात्यन्ताभावस्यैवोपादानात्

सि॰धा॰ अत्रचात्यपग्रहस्यैवप्रमाणत्वात्ते तेनप्रागभावार्थेनात्ययीभावः तेषुध्वंसत्वमभावत्वव्याप्यमखंडमेवेत्यर्थाभावात्पृथगुपादानमिति। तत्रध्वंस
त्वस्याभावत्वाघटितत्वेपिध्वंसस्याभावत्वानपायात्। संप्रतिइत्यस्यार्थमधिकरणशक्तिप्रधानं एतर्हिसंप्रतीदानीमधुनासांप्रतंतथेत्यमरोक्तेः
अधिकरणकारकाक्षिप्तमात्रजिक्रियानजानिविधीयते अतिनिद्रंनिद्रादरिद्रानीनप्रयुज्यतइत्यर्थः अतितैसृकमाछादनं इतिवृत्तिः तिसृभावे संज्ञा
यांकन्नुपसंख्यानं तिसृकोनामग्रामः तत्रभवंतैसृकमाछादनं तच्चअतिशीतेवाकाले उपयोज्यं इदानींनोपभोगार्हं तैसृकमाछादनमिति
तदर्थः तैसृकपदस्याछादनपदसापेक्षत्वेपिगमकत्वात्समासइत्याहुः प्रांचस्तु असंप्रतीति संप्रत्यभावः अनेनोपभोग्यवस्तुनोपोव
र्त्तमानकालवृत्तस्यैवनिषेधः क्रियतइत्याहुः ननुअधिकरणस्यनिषेधंप्रतिप्रतियोगित्वेनान्वयोविरुद्धः भूतलेनघटइत्यादौभूतलस्याभावप्र
तियोगित्वानवभासनादितिचेत्न वस्तुतोऽधिकरणस्यनाभावप्रतियोगित्वं तज्ज्ञानस्यबुद्धाववधिकरणत्वेनप्रतीयमानस्यवा। नाद्यः अधिक
रणस्यकेवलान्वयित्वपाद्यरादेरपितथात्वानुपपत्तेः नांत्यः कालस्यनिषेधप्रतियोगित्ववदभावस्याधिकरणत्वात् भवानंगीकरोतु नचाधि रम॰
करणशक्तिप्रधानेस्याभावेप्रतियोगित्वेनान्वयोनस्याद्भूतलस्यैवेतिवाच्यं तथाभूतस्यापिदिवाशब्दस्यदिवामन्यतेत्यत्राधिकरणशक्तिप्रा

तत्तथा शब्दार्थस्यत्वाश्रयत्वसंबंधेनैवान्वय इति तेषम्यात् नच यथाशक्ति यथाबलमिति सादृश्यस्वरूपप्रकारत्वाच्चिंथा लक्षत्वपांतयथा शब्दस्य समा
सोनस्यादिति वाच्यं अव्ययस्यैवास्य लक्षणत्वेन तदुपपत्तेः॥ ॥यावदवधारणे॥ यत्परिच्छेदवत्तिया वाक्यार्थं रूपां सदृक्समस्यते यावदिति तद्धितांते
नास्य पदविग्रहः यावदमत्रं ब्राह्मणानामंत्रयस्व इत्यामत्रैर्ब्राह्मणाः परिच्छिद्यते अमत्रसंख्याकान्ब्राह्मणानित्यर्थः यद्यप्यमत्रसंख्य
याब्राह्मणाः परिच्छिद्यंते तथापि केवलसंख्यायाः परिच्छेदकत्वायोगादमत्रानुरोधाद्धतेषां परिच्छेदकत्वोक्तिः अवधारणे किं यावद्दत्तं तावद्भु
क्तं कियदिति नावधारयामीत्यर्थः॥ ॥सुप्प्रतिनामात्रार्थे॥ अल्पार्थवृत्तिना प्रतिना सह सुबंतं समस्यते शाकस्य लेशः शाकप्रति सू
पप्रति पुनः सुप्ग्रहणस्याव्ययाधिकारनिवृत्तिज्ञापकत्वात् अन्यथा च स्वरादीनां दोषामन्यमहः दिवामन्या रात्रिरिति वृत्तिविषये सत्वप्रधा
नतादर्शनात् तद्धितांतानामेवाव्ययानां प्रतिना समासः स्यात् मात्रार्थे किं वृक्षं प्रति सिंचतीत्यादौ माभूत् नचैतेत्र कर्मप्रवचनीयसंज्ञाविधानसा
मर्थ्यान्नसमास इति वाच्यं षत्वनिवृत्त्यर्थतया तदुपपत्तेः॥ ॥अक्षशलाकासंख्याः परिणा॥ संख्यावांविशेषस्य ग्रहणं अक्षशलाकयोः
स्वरूपस्य अक्षशलाकाशब्दौ एकवचनांतौ चतुःपर्यंतसंख्याश्चैते तेनतीपांताः कितवव्यवहारे नेपराजये गम्यमाने विपरीतं वृत्तमित्यर्थे परिणा स

द्वि

सि० धा० ह समस्यंते तृतीयांतत्वं वर्त्तमानक्रियाकर्तृत्वा आर्यौ सिद्धं अन्यदीचेति कं पश्चिकाखंद्यूतं धंबभिरक्षैः शलाकाभिर्वा भवति तत्र सर्वेषां

47 मुत्तानत्वे अधोमुखत्वे वा पाते पितृर्जयो वैषम्ये पराजयः अक्षेण विपरीतं वृत्तं अक्षपरि· शलाकया विपरीतं वृत्तं शलाकापरि एकेन तथा ए

कपरि एवं द्विपरि त्रिपरि चतुःपरीति· पंचम्या॥ एते पंचम्यावा समस्यंते अपहरि संसारः अपहरेः एवं परिणा वहिर्ग्रामं वहिर्ग्रामात आग्रामं

आग्रामात· परस्परसाहचर्यादपपरी वर्जने इति कर्मप्रवचनीयौ पंचम्यपाङ्परिभिरिति तद्योगे पंचमी अंचतिरप्यपमेव तत्साहचर्यात्त

त्रार्थपंचूत्तरपदेति पंचम्येव भाव्यं पंचमीग्रहणं तु वहिर्योगे पि षष्ठ्यर्थे पंचमीज्ञापनार्थं तेन वहिर्योगे चोपसंख्यानमपि तिनारम्भ्यं॥ ॥आङ्

मर्यादाभिविध्योः॥ आमुक्ति आमुक्तेर्वा संसारः आवालं आवालेभ्यो वा हरिभक्तिः अत्रार्थग्रहणं शक्यमकर्तुं एतयोरेवार्थयोः कर्मप्रवचनीय

संज्ञापाः पंचम्याश्च विधानात· आपरमात्मा एवभूगोलकमिति तु लेखकप्रमादः भगोलकादित्येव पाठो युक्तः चकारेण समासविच्छेदाद् समासे च पंच

म्या आवेरूपकृत्वादित्याहुः॥ ॥लक्षणेनाभिप्रती आभिमुख्ये आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह वा समस्येते अभिरभागे लक्ष एम०

णत्थंभूतेति च कर्मप्रवचनीयत्वाद्द्वितीया अभ्यग्निशलभाः पतंति प्रत्यग्नि· लेतलक्षणभावं आभिमुख्यं चेत्युभयमभिप्रतिभ्यां द्योत्यं लक्षणेन किं

धान्यमयव्हापवृत्तिस्वभावेन कर्मत्वांगीकारात् तथाचातिनिद्रमित्यस्य निद्रायोग्यकालाभाव इत्यर्थः शब्दप्रादुर्भावे इति हरि: हरि
शब्दस्य प्रकाश इत्यर्थः हरिपदं शब्दस्वरूपपरं तस्य प्रकाशार्थेन इतिशब्देन समासः पश्चादर्थे अनुरथं रथानां पश्चादित्यर्थः इह द्व्य
द्विपदस्याल्पाच्त्वेन अप्रसक्तस्य पूर्वनिपातस्याकरणं एतत्समासानित्यत्वज्ञापनार्थं अतो वाक्यस्यापि साधुत्वमिति केचित् समीपा
घर्थे शैशवेरतद्धितांतैः संरुचर्या त्वथाविधस्यैवेत्यग्रहणं अत एव परस्मिन्नित्यत्र ततः पश्चादिति अनेकमन्यपदार्थे इति सूत्रे सर्वपश्चादिति च
भाष्यादित्यन्ये योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः अनुरूपं रूपस्य योग्यं वीप्सायां अर्थमर्थं प्रति प्रत्यर्थं भाष्यप्रामाण्या
द्वाक्यमपि साधुः यद्यप्यतिशब्दो न कर्मप्रवचनीयत्वान्न सामर्थ्यात्त्वर्थवाक्यमपि न च यथा मस्य वृक्षं प्रतीत्यत्र समासाप्रसक्त्या तत्रैव द्वितीया
विधानं सावकाशमिति वाच्यं समासावश्यकत्वे विशेषणस्यैवानन्वयापत्तेरित्याहुः स्रे: सादृश्यसदृशी अनुपूर्वस्य भाव आनुपूर्व्यं तल्लक्षण
दित्याह्यन्ये ज्येष्ठानुपूर्व्येति अनुज्येष्ठं ज्येष्ठक्रमेणेत्यर्थः यौगपद्ये सचक्रं सहशब्दस्य समासः अव्ययीभावे चाकाल इति सभाव ४
सदृशः सख्या ससखि सकिरवीति वृत्तिः अपाचितपरिमाणाम गालौकिकीर्वा पूर्वे सादृश्यस्य प्राधान्यं अत्र तद्वत इति विशेषः अन्यथा स

सि०धा० मद्राम द्राः सुमद्रम् इतिवद्व्ययार्थप्राधान्याभावे समासो न स्यात् । सपक्षवं व्यासपराशराभ्यामिति नैषधं पाणिपक्षे पल्लवसदृशमित्यर्थः । सप

48 त्रिरनुरूपमालभावः सत्रलववर्गाणां तेषाम अत्ययोऽत्यभावः । साकल्ये । सतृणमभ्यवहरति । न किंचित्त्यजति । न तु तृणभक्षणे तात्प

र्यं अन्तवचने साग्न्यधीते अग्निशब्दस्तदर्थग्रन्थपरः । तत्पर्यन्तमधीत इत्यर्थः । न च साकल्येन सिद्धिः । परपाठवान्देशो ध्येतव्यत्वेन परिगृही

तश्च दृष्टेह समाहारं तशब्देन सकलापेक्षणाच्च समाप्तेः साकल्यशब्देनोक्तत्वात् । अग्निनासहेति विग्रहः । अन्तत्वं घोत्यमिति केचित् ।

अग्निरंतोऽस्येति त्रि अग्न्यंतं तत्त्वमिति वा विग्रहः इत्यन्ये । यत्तु सहशब्दस्यान्तवाचकत्वाभावाद् नत्वस्य सुतरामलाभाद् एवपदेऽनन्वयापत्तेर्दुष्टमिति

तदुक्तं । घोत्यार्थेनैव शब्देनः स्वपदविग्रहोक्तो वा भकाभावात् । अन्तरंगत्वस्यापि तुल्यत्वात् । अन्तगतचैकत्वेहि प्राधान्येनांतत्वेनोपस्थितमिति

शंका स्यात् । अध्ययनान्वयस्तु वृत्तौ यो न विग्रहे तत्तुल्यपीसत्वेपि तुल्यः । अध्येतव्यपरिच्छेदकत्वमात्रं तत्रापि तुल्यमेवेति दिक् ।। ।।पथ्याः साह

स्याः ।। यथार्थत्वेन स्वादृश्येन वा प्राप्तस्य पर्युदासार्थं सादृश्यमित्यत्रैः । त्येपयाशब्दः समस्यते तेनेदं न यथा हरिस्तथा हरः । न च तथाशब्देन सह हरे राम०

शब्दस्य समासः स्यादेवेति वाच्यं सादृश्यप्रतियोगिना सहेति चेत्तद्धि धानात् । यथाशब्दार्थस्य सादृश्यस्य प्रतियोगित्वसंबंधेनान्वयस्य बोधे नो

स्त्रुघ्नं प्रतिगतः स्त्रुघ्नाद्गतस्तमेव प्रतिगत इत्यर्थः अतः स्त्रुघ्नस्य कर्मत्वं न तु लक्षणत्वं अभिप्रतिग्रहणाद्येनाभिस्तेन गत इत्यत्र न· आभिमुख्य·अह
णां किं अभ्यंका गावः प्रत्यंकाः अभिनवः प्रतिनवश्चांको यासां ताः न चाव्ययार्थबाधा न्यस्यौत्सर्गिकस्याभावादेव नाव्ययीभावप्रसंग इति वाच्यं बहु
व्रीहि विषयेप्यव्ययीभावो भवतीति ज्ञापनार्थत्वात् तेनाभिमुनि व्याकरणमित्यादिसिद्धिः॥ ॥अनुर्यत्समया॥ यदिति सामान्ये क्लीवत्वं यं पदार्थं सम
या सामीप्यं भाषाणी यः पदार्थ इति यावत् तेन लक्षणभूतेनानुर्वा समस्यते अनुवनमशनिर्गतः वनस्यानु वनसामीप्यनिरूपकं अशनिगमनाश्रयदे
शोपलक्षणत्वं समयेति किं वृक्षमनुविद्योतते विद्युत् वृक्षस्य लक्षणत्वमेव न तु सामीप्यनिरूपकत्वे अयं विभक्त्यैव सिद्धे विभाषार्थं सूत्रं॥ ॥
यस्य चायामः लक्षणेत्यनुवर्त्तते यस्यायामोऽनुना द्योत्यते तेन लक्षणेनानुर्वा समस्यते अनुगंगं हास्तिनपुरं अनुगंगं वाराणसी आयामलक्षणत्वे
नोक्तं अव्ययार्थस्य भेदे संबंधेनाविनाभावार्थान्वपात· यदि तदुपलक्षितत्वमपि तदर्थः तदा दैर्घ्यस्यानुशब्दार्थान्तरे उपलक्षिते तस्यात्र संबंधे तस्य वाराणस्या
न भेदेनान्वयः अदृष्टापत्तेरिति फलितोर्थः॥ ॥तिष्ठद्गुप्रभृतीनि च॥ एतानि निपात्यंते तिष्ठन्ति गावो यस्मिन् स तिष्ठद्गु दोहनकालः चकार एवकारार्थो व
संतरप्रवेशनिरासार्थः अथ आतिष्ठद्गु जपन् संध्यां पश्चिमामापतीगवमिति महाविप्रयोगे पूर्वत्र पंचमीलोपपक्षे पृथक्पदत्वाभ्यां निर्वाहेपि द्वितीयेपि कथं

सि॰धा॰ निर्वाहस्तिष्ठेत् अत्राहुः विजातीयवृत्तिनैव निषिध्यते अनजीभावश्चाभवत्येवेति॰ आपतीगवादिरिति पाठ इत्यन्ये खलेयवादीनि प्रथमांतानि॰ प्रातिप
दिकार्थमात्रादन्यत्र न प्रयोग इत्यर्थः तिष्ठद्गु वहद्गु शत्रादेशो निपातनात्॰ गोस्त्रियोरिति ह्रस्वः आपतीगवं शत्रादेशपुंवत्त्वनिषेधसमासांताः खलेय
वं खलेबुसं सप्तम्या अलुक्॰ लूनयवं लूयमानयवं पूतयवं पूयमानयवं संहृतयवं संह्रियमाणयवं संहृतबुसं एते कालार्थाः समभूमि समपदाति॰ भूमेः सम
त्वमिति पूर्वपदार्थः प्रधानं सुषममित्युभयत्र मांतपाठ एव पदेष्वागमो निपातः समभूमीत्यादिपाठे अन्त्यलोपः अकारार्थे संशब्दस्य वा प्रयोगः सुषमं विष
मं दुःषमं निःषमं अपसमं समस्य शोभनत्वं विगतत्वं दुष्टत्वं निर्गतत्वं अपगतत्वं चेति विग्रहः आयतीसमा आयतीसमं शत्रादेशपुंवत्त्वनिषेधौ पापस
मं पुण्यसमं समासः समस्य शोभनत्वं विगतत्वं दुष्टत्वं निर्गतत्वं अपगतत्वं चेति विग्रहः आयतीसमं वत्सरः प्राह्णं प्रमृगं प्ररथं प्रदक्षिणं प्र
गतत्वमह्नः इत्यादि विग्रहः प्रतिगतस्य संगतत्वं संप्रति॰ विपरीतमसंप्रति॰ इच्कर्मव्यतिहारे दंडादंडि॰ द्विदंड्यादिभ्यश्चेत्यस्य विधानात् सोऽप्यव्ययी
भावः॥ ॥पारे मध्ये षष्ठ्या वा पारमध्यशब्दौ षष्ठ्यंतेन सह वा समस्येते निपातनादेदंतत्वं सप्तम्या अलुक् कार्यविमध्ये गंगा दानपेत्यादेः सि ए८॰
द्धिः इह विकल्पोंतरपक्षे षष्ठीतत्पुरुषार्थः महाविभाषया अव्ययीभाववाक्ययोरेव सिद्धेः विकल्पप्रतियोगिनो समस्तरा प्रवृत्त्या वान्यतरस्यां ग्रहणं वृत्तिनि

ऽविकृतत्वात्॥ ॥ कृ॰ परस्मैपदं आदेशापेक्षा षष्ठी लस्यादेशाः परस्मैपदसंज्ञाः आत्मनेपदसंज्ञया परस्मैपदसंज्ञाबाधार्थमिदं तन्योरारंभः न चैवं
पुरुषसंज्ञाभिः शानच्कस्वोः सावकाशा परस्मैपदसंज्ञा बाध्येतेति वाच्यं लिङ्विवृद्धिः परस्मैपदेष्विति परस्मैपदग्रहणेन परस्मैपदसंज्ञायाः पुरुषसंज्ञाभि
र्बाधो नेति ज्ञापनात् ज्ञापकस्य च सामान्यापेक्षत्वात् आत्मनेपदसंज्ञयापि समं पुरुषसंज्ञानां समावेशः अन्यथा परस्मैपदे सावकाशानामासामात्मनेपदसंज्ञानवका
शत्वात् तया बाधप्रसंगात्॥ ॥ तङानावात्मनेपदं तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः आस्ते आसीनः चक्राणः आनपदेन शानच्कानचोर्ग्रह
णं लादेशत्वाभावात् तेन तौ परस्मैपदिभ्योपि भवतः अतएव लोलुभ्यमानाद्यमश्वानशीतिवामनः स्मरगोगुकाना इति सोढ्पलहरी रसमानसास्ते
ति माघः एतेन तत्प्रत्यते निः कलेधायमान इति आथर्वणास्कालिपि व्याख्याताः॥ ॥ तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः प्रथममध्यमोत्तमाख्य
प्रथममध्यमोत्तमाख्येति कृते द्वंद्वानामेकशेषः तेन पदद्वयेषु त्रिकाः षड्वसंज्ञा इति षष्ठ्यास्त्वस्य निर्देशः एव चये महासंज्ञाकरणं पूर्वाचार्यानुरोधात् इद
त्रीणि त्रीणि एकं पदं येवेति हरदत्तः अवांतरपदसंज्ञापासत्त्वामपि समुदायपदसंज्ञामाश्रित्यसंहिते कपदे नित्येति सप्रवृत्तिः अन्यथा समासेपि पृथक्कु
छेदः स्यात् द्विहन्नमध्येपदांतरप्रयोगः सात्वापत्तिश्चेति कोस्वामः॥ ॥ तान्येकवचनद्विवचनबहुवचनान्येकशः तानीति पुरुषसंज्ञाभिः सामावे

सा० धा० शार्थं अन्यथा प्रत्येकवचनसंज्ञयोः पर्यायः स्यात् । ततश्च द्वन्द्वे मध्ये तथादि कार्यपक्षे न भवेदिति लः प्रथमादि संज्ञकानि त्रीणि त्रीणि एकशः क्रमेण एकवचना
दिसंज्ञानि स्युः एकश इति प्रथमान्ताद्वीप्सायां शस् । येन नाप्राप्ति न्यायेन द्विर्वचनापवादेन शसैव वीप्साया उक्तत्वान्न द्विर्वचनं पदत्र एकैकश इति प्रयोगः तच्चैकं
पदत्रयं एकैकशो ददातीति भाष्यप्रयोगात् इदमपि साधितं तत्र पदत्रयमिति तेनानुक्तार्थं वीप्सा भवती त्युपक्रम्य भाष्ये तथा प्रयुक्तत्वात् अस्वार्थे प्येकशः शब्दोऽस्ति तस्मा
द्वक्तत्वार्थासिद्धिरिति शक्तिमिति कैयटव्याख्यानाच्च संख्यैकवचनाच्च वीप्सायामिति शस् एव वीप्सायां विधानात् इति दिक् ततः वस्तु तत्त्व एकोऽकपिलोऽएकैकशः सहस्रशः कृत्वो
द्दत्वेति भाष्यप्रयोगात् एकमिति कैयटेन तद्व्याख्यानाच्च स्वार्थको पि शस्प्रत्ययो ऽस्ति एवं च एकैकशो पुनर्वचनमिति गोवर्द्धनाचार्यप्रयोगः ऐकैकश्येनेति बाध
लक्षणोत्थास्त्रीत्वादिविकारादिप्रयोगाश्च संगच्छन्ते इति किं न्याप्र्यस्युः सुपस्त्रीणि त्रीणि क्रमादेकवचनादिसंज्ञानि स्युः इत्यन्वर्थत्वमाश्रित्य द्व्येकयोर्द्विवचनैक
वचने बहुषु बहुवचनमिति त्याज्यं एकवचनस्यौत्सर्गिकत्वविध्यर्थं येन कर्मप्रवचनीयादिसंज्ञावद्यथासंभवमन्वर्थतायाः सुवचत्वादिसाधनात् एकत्वेद्वि
वचनं लक्षणयापि न साधितिज्ञापनार्थं तदिति नैयायिकाः ॥ विभक्तिश्च सुप्तिङौ विभक्तिसंज्ञौ स्तः । प्रत्येकवचनसंज्ञाभ्यां समावेशार्थश्चकारः तिङां वि रा न०
भक्तिसंज्ञा तु न विभक्तौ तुस्मा इत्येतन्मन्त्रस्य सार्थं रूपं तत्त दायेत्याधर्थमपि ॥ ॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः लकारेणास

ध्यापच्छ्रायं समाप्तः ॥ ॥ सद्विद्वत्पदवीक्यमाननिगमाकूपारपारंगमश्रीलक्ष्मीधरलब्धबोधजनुषा विश्वेश्वरेणोदिते श्रीसिद्धान्तसु
धानिधौ सुधिषणो रक्षापदमध्यासृतं ध्यायं ध्यापमिहाभिधेयमधुनाशोधापयं धीर्धीयताम् ॥ श्रीगणेशाय नमः ॥ ॥ समर्थः पदविधिः
पदसंबंधी विधिः समर्थाश्रितो बोध्यः समर्थपदस्य तदाश्रितेलाक्षणिकत्वात् । विधिपदं कर्मसाधनं उपसर्गे घोः किरिति किप्रत्ययः विधवि
धाने इत्यस्माण्णादिकइप्रत्ययेन व्युत्पन्नो विधिशब्दः अयं तन्त्रोदात्त इति विशेषः अत्र एकार्थीभावः सामर्थ्यमधिकारः इत्येकं तत्पक्षः व्यपेक्षा
सामर्थ्यमधिकार इति द्वितीयः द्विविधं सामर्थ्यमधिकार इति तृतीयः एवं परिभाषायामपि त्रयः पक्षाः तत्रैकार्थीभावः सामर्थ्यं परिभाषे
ति सिद्धान्तः इतरौ पूर्वपक्ष इति स्थितमाकरे अन्यतरस्य द्वयोर्वा सुबन्तत्वे सति यः प्रवर्त्तते स पदविधिः मीमांसकास्तु पदत्वप्रयोजकसाधारणमे
व पदविधित्वं तेन व्रीहिभिर्यजेत इत्यत्र व्रीहियवयोर्न समुच्चयः साकांक्षत्वेन सामर्थ्येनाभावे तृतीयानुपपत्तेः विभक्त्युत्पत्तौ सत्यां पदसंज्ञेति
तृतीयाविधेरपि पदसंज्ञाप्रयोजकतया पदविधित्वेन समर्थपरिभाषाविषयत्वात् इत्याहुः तदसत् शब्दान्तरान्वयाकांक्षायां एव सामर्थ्यात् अ त
न्यथा समुच्चयाभावे एवं घातादिसाकांक्षत्वेन तृतीयानुत्पत्तिप्रसंगात् नीलं घटमित्यादावपि विभक्त्यनुत्पत्तिप्रसंगात् नीलसाकांक्षतया क्ष

५४

सि०धा० स्यगाजपुरुष इतिवद् सामर्थ्यात् । मन्यते तु पदविधित्वविरहान्न परिभाषोपस्थानमपीति वैषम्यं अत एव सन्नन्ते उपसर्गार्थविशिष्टधात्व
र्थस्य कर्मत्वमिति पक्षे उपसर्गस्याकांक्षत्वेपि धातोः सन्नन्तस्य पदविधित्वाभावेन समर्थपरिभाषाया अप्रवृत्तेः महान्तं पुत्रमिच्छतीत्यत्र तु
सुबन्तात्क्यज्विधानेनैतस्य पदविधित्वात्तद्दोषः सुपां कर्माख्यादौ सुतां तु समस्तपदानामिति ङ्न्तत्वौ पदसंज्ञेति तस्यापि पदविधित्वमस्त्येवेति
समर्थपरिभाषोपस्थानेन तद्विरोधापत्तिर्दुर्वारा एतेन विशेषणत्वस्यान्ययोगव्यावृत्तिं विनाऽसंभवेन द्रव्यान्तरसापेक्षत्वे विशेषणत्वस्या
प्यनुपपत्त्यैकार्थीभावलक्षणसामर्थ्यानुपपत्तेरित्यपि निरस्तं अन्ययोगव्यावृत्त्यादेर्विशेषणत्वस्वीकारे दण्डीपुरुष इत्यादेरनुपपत्तेः स्वायो
गव्यावृत्तिमात्रविवक्षायां तु समञ्जेपष्यदोषात् अत एव यदि इत्थं तत्र सामासो मः स्यादित्यपवादाः अहर्निशं पाणिपादादिवद्वत्सामाश्रुत्यान्य
दिजगत्सामाआरुपरायणा निरस्त्र वद्दृढं तत्र साधार्यप्यो व्याप्तिषो मे विकल्पेपि स्वायोगव्यावृत्त्या विशेषणत्वसंभवादेकार्थीभावलक्षण
सामर्थ्यानपायाद्विशिष्टस्यायोगस्वायत्ततोपांनिमित्तत्वमिति सिद्धान्तः श्रीहरिभिरित्यादौ त्वश्रीहरिजन्यत्वयोगत्वयोः सामानाधिकरण्यमात्रस्य राम०
विधिबोधत्वात् तत्प्रयोजनत्वसामानाधिकरण्यस्यापि शास्त्रान्तरेणाबोधे उभयत्र विजातीययोगत्वमेव जन्यतावच्छेदकमिति वणारि

क्षतमेतत् । अन्ये तु अशक्तविनिगमनाविरहाद्बहुव्रीहौ पदद्वयेपि लक्षणा तथापि न शक्तिकल्पनगौरवादिति वदंति नव्यास्तु गोपदस्यैव विशिष्टार्थल
क्षणा अत एवार्द्धपिप्पली उपकुंभमित्यादौ पूर्वपदार्थप्रधानेपि षष्ठीतत्पुरुषापवादभूतायां उत्तरपदस्यैव पिप्पल्यर्द्धादौ लक्षणा पूर्वपदं तु ता
त्पर्यग्राहकं तदर्थसोत्तरपदलक्षणाविशेष्यत्वाच्च अभ्यादन्निर्वाहस्त्वाख्यायते एतेन गोपदस्य गोस्वामिलक्षकतापाः एकदेशेन विचित्रात्वयो न सा
दित्यपास्तं न च चित्रपदे विशिष्टलक्षणामादायाविनिगमनाविरहः तस्य गुणवाचकतया तल्लक्षणापाः परंपरासंबंधरूपतया गुरुत्वात् । एतेन अन्य
पदार्थबहुव्रीहौ अजगत्तानां प्रामादिपदानामपि कर्त्रादिवाचकत्वेन साक्षात्संबंधस्वत्वाद्विनिगमकाभावस्त्वपास्तं तथापि तेषां सामान्यरूपेणाद्यवाचकत्वं
उदकादिपदानां तु विशिष्टोतिसंभवात् अश्वारूढादिपदानां गुणविशिष्टद्रव्यवाचित्वनियमेपि प्रकृते चित्रादिपदानामपि तथात्वेनाविशिष्टत्वात् । अरुगुरित्या
दावपि निगमकस्य सत्त्वात् तेषां केवलगुणवाचकत्वाभावमात्रस्याकिंचित्करत्वात् । अरपदे लक्षणायां प्रत्ययसन्निधानलाभाच्च नव्यानेकेषां सु
वंतानामन्यपदार्थपरत्वे बहुव्रीहिविधानादेकमात्रपदस्यान्यपदार्थपरत्वेन तत्पुरुषत्रिरिति वाच्यं तोत्पर्यग्राहकत्वेदिनातदुपयोगस्य मताकानादि
भिरुक्तत्वात् । अन्यथा समासस्यानेकपदत्वाभावात् एकैकोतत्वापि तद्विरोधतादवस्थ्यात् । यत्तु घटादिपदे पि प्रकृतिप्रत्ययविभागसंभवात्समस्यपार्थ

सि०धा०

स्यजातिविशेषादौ लक्षणेति कल्पयितुं शक्यतया समुदायशक्तिविलयापत्तिरिति । तत्र यौगिकार्थे समुदायशक्तिविलोप आपद्यते न्यच्छ
श्चैव नाघः इष्टापत्तेः नानाः तत्रावयवार्थसंबन्धाभावात् । बहुव्रीहेरपि पदद्वयदेवदत्तत्वादिशक्यतावच्छेदकं तदैवघटपटादिसाधारण्यस्या ।
त् । न त्वेवमस्ति बोधयोर्वैलक्षण्यस्य सर्वसंमतत्वात् । न च चित्रगवीस्वामित्वविशिष्टदेवदत्तत्वादिकमेव शक्यतावच्छेदकं देवदत्तादिप
दस्य तात्पर्यग्राहकमिति वाच्यं नानार्थत्वापत्तेः अन्यपदार्थ इत्यनुशासनविरोधात् देवदत्तादिपदस्यैव सर्वमर्थो बहुव्रीहिस्तात्पर्यग्राह
क इत्यापत्तेश्च अत एव भाष्यकैयटयोः पदार्थाभिधानेऽप्रयोगानुपपत्तिरभिहितत्वात् । यथा चार्थे द्वन्द्व इत्यभिधानात् द्वन्द्वे चकारस्याप्रयोग
स्तद्वद्देवदत्तपदार्थस्य समासेनाभिहितत्वाद्देवदत्तादिपदस्य योगो न स्यात् । इति पूर्वपक्षयित्वा न वानभिहितत्वात् इत्यनेन सामान्यार्थ
स्य समासेनाभिधानेऽपि विशेषस्यानभिधानात् । विशेषप्रतिपत्त्यर्थं देवदत्तादिप्रयोग इति सिद्धान्तितम् तथा च चित्रगवीस्वामित्वप्रकारकबो
धत्वमेव चित्रगुरिति समुदायशक्तिज्ञानस्य कार्यतावच्छेदकं एवं च तार्किकादीनां गोपदलक्षणाज्ञानस्यापि विशेषः अत एव मीमांसा एम०
वार्त्तिके भवेत्तां यदि रूढस्य वाजिनो लौकिकत्वेन अत एव मीमांसे समुदायस्य शक्तिं को जानु कल्पयेदित्युक्तं अर्थवदित्यादिसूत्राननुरोधेनाव्युत्पत्ति

पक्षस्यावश्यमभ्युपेयतया समुदायशक्तिलोपापत्तेरनुचितत्वाच्च। कस्य शब्दस्यानुत्पत्तित्वमित्यपेक्षायां च पत्रावयवार्थमादाय न तत्पदजन्यबोधोपप
त्तिरूप्सेयति विनिगमकस्याभावत्वात्। प्रकृतिभागप्रत्ययभागयोर्घटत्वे पटत्वादौ व्यभिचारेण घटत्वप्रकारकघटविशेष्यकबोधानुपपादकत्वात्।
एतेन पंकजपदप्रवृत्तिं विदंपास्ता। तत्र पद्मत्वप्रकारकबोधार्थमेव समुदायशक्तिस्वीकारात्। यत्त्वेवमपि तत्र विभक्त्यर्थान्वयानापत्तिः
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। अपरपदोत्तरं प्रत्ययविधानाभावेन तदर्थस्य प्रकृत्यर्थत्वाभावादिति तन्न। घं प्रकृति
त्वं हि अंगत्वमेव। यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इति वचनात्। तथा च समासोत्तरं विभक्तिविधानात् एकस्य तात्पर्यग्राहकत्वमपरस्य
लक्षकत्वमिति वैषम्ये सत्यपि लक्ष्यार्थे प्रकृत्यर्थत्वानपायात् एतेन समासोत्तरं विभक्तेः स्यादित्यपि निरस्तम्। अन्यथापि क्रमः समासग्रहणादेव
प्रातिपदिकसंज्ञा न त्वेवं तस्य नियमार्थत्वाभावे हेमहिमेति सूत्रेण मूलकेनोपदंशमिति समुदायस्य प्रातिपदिकसंज्ञापत्तिः कृद्ग्रहणे गति
कारकपूर्वस्यापि ग्रहणमिति चेन्नैवं अनेन हि किमापाद्यते समुदायोत्तरं विभक्तिर्वा पूर्वपदे विभक्तिलोपो वा। नाद्यः इष्टापत्तेः अन्यापत्तेर्न
लोपस्य सुलभत्वात्। न द्वितीयः तृतीयाप्रभृतीन्यन्यतरस्यामिति सूत्रेण तृतीयाग्रहणादेव पर्यापत्तेः उपदंशस्तृतीयायामित्यस्यानुपलम्भमात्र

ति॰ प्र॰

विषयकत्वेनश्रमेवाव्ययेनेति सूत्रे सोव समासस्ति द्धः तद्विपक्षेत्तनीयाश्रमणार्थतत्रापि लोपे नु किंविकल्पेन॰ वस्तुतस्तु कद्रूप रोगतिकारक
पूर्वस्य केवलस्य च अस्तां अन्यथा कष्टश्रितेत्यादौ द्वितीयाश्रितेति समासो न स्यात् तथाच केवलस्य [illegible] तस्य कारक पूर्वस्य प्रातिपदिक
संज्ञापत्तौ केवलस्य प्रातिपदिकत्वं स्याद्विधानं व्यर्थं स्यादिति नात्र तस्य निभाषोपस्थ्यानमिति तत्रैव विप्रतिषिद्धमित्यास्तां तावत्॰ एते न त्वं गे
स्त्रिय एकतपज्जतीति सत्रांगानुवादेन त्रित्वादिविधिर्न संभवति समासे एकपदस्ततो भंगप्रसंगात्॰ एकं हि पदं उद्देशकं विधायकं वा पुरुकं न त्वेको द्दे
शेनापरविधानमिति सिद्धांतविरोधस्त्वपास्त उत्तरपदलाक्षणापां एकपदार्थतस्य सुलभत्वात्॰ वस्तुतो बहुव्रीहावेवोत्तरपदे लक्षणा
उपकुंभमर्द्धपिप्पलीत्यादौ तु पूर्वपदार्थस्य कुंभसमीपपिप्पल्यर्द्धादेर्विभक्त्यर्थे प्रातिपदिकांतरार्थे चान्वयो नानुपपन्नः तादृशबोधे तादृशस
मस्तपदद्वयस्य पदयोरव्यहितपूर्वापरीभावस्य प्रातिपदिकांतरार्थाभेदान्वयबोधे समानविभक्तिकपोस्तादृशसमस्तपदद्वयं तयोः समभि
व्याहारस्यापि च प्रयोगाकांक्षात्वकल्पनात् इति पिनवः पंथाः समासग्रहणस्य विध्यर्थं तयात उत्तरविभक्तेः सौलभ्यात्॰ नच तत्रोद्देश्यविधेय एम॰
भावेन बोधः स्यादिति वाच्यं उद्देश्यविधेयभावावच्छिन्नविषयतया शाब्दे समासानंतर्गतपदद्वयजन्योपस्थितेर्हेतुत्वकल्पनात्॰ एतेन राजपुरुषः

संप्लः यदि स्थितं तरसामासोमः स्यादैंद्रवायवाग्रान् गृह्णाति गृह्णीयादित्यादौ चतथान्वयो न स्यादित्यपास्तं उद्देश्यविधेययोर्द्वयोः समासा
नंतर्गतत्वस्य विवक्षितत्वात्. एतेन वषट्कर्तुः प्रथमभक्ष इत्यादिषु बाधशंका निरस्ता शास्त्रे पूर्वनिर्दिष्टस्योद्देश्यत्वं चरमनिर्दिष्टस्य विधेयत्वे
मिति नियमस्य सर्वसंमतत्वाच्च. व्युत्पत्तिरेषा च दर्शितैवेत्यादि प्रस्ताममतिविस्तरः तस्मादयमत्र भावः राज्ञः पुरुषः इत्यत्र राजाषष्ठ्यर्थ
संबंधे स चाश्रयत्वेन पुरुषे विशेषणमिति राजसंबंधाश्रयः पुरुष इति बोधः अत्र प्रकृत्यर्थो राजा प्रतियोगित्वसंबंधेन षष्ठ्यर्थेन्वेति तथा च
प्रतियोगिताश्रयत्वयोः संसर्गत्वेनैव तेषां पदार्थत्वमिति विभागः। तथा च बोधो राजसंबंधिलक्षणया राजसंबंधिप्रकारकाभेदसंसर्गक
पुरुषविशेष्यकबोधस्वीकारे समासाद्युपपादयितुं शक्यः तथा च राजनिष्ठप्रकारतानिरूपितप्रतियोगित्वनिष्ठसांसर्गिकविषयतानिरू
पितसंबंधनिष्ठविशेष्यताख्यप्रकारतानिरूपिताश्रयत्वनिष्ठसांसर्गिकविषयतानिरूपितपुरुषनिष्ठविशेष्यताशालिज्ञानं त्वं राजपु
रुषपदशक्तिज्ञानकार्यतावच्छेदकं कल्पनेन चैतादृशार्थे समुदायलक्षणा एवं तदुपपत्तिरिति वाच्यं उभयोस्त्यल्पकलक्षणया बोधकत्वे ऽपि प्र
योजनमानेन वृत्तेर्लक्षणात्वमेवेति दुराग्रहमात्रपर्यवसानात्. नन्वेवं शोभनदण्डकादिबहुव्रीहौ विग्रहसमानाकारकबोधस्य केनाप्यनंगीका

सि॰ धा॰ रात्· तत्र शक्तिर्न स्यादिति वाच्यं तथापि एकत्वस्य तत्पात्त्वापि तत्कल्पने बाधकाभावात्· न च वाक्ये संख्याया अपि राजादिविशेषणा
त्वेन भानात्कथं समानाकारकत्वमिति वाच्यं पदवत्त्वंशे संभवस्तावतो पिसागानै चितात्· न चैकत्वविशिष्टराजसंबंधाश्रयत्वादिकमेव
शक्यतावच्छेदकं कल्प्यतामिति वाच्यं तथानुभवाभावात्· द्वौ नावमे देकत्वसंख्येवमासत्तः इति सिद्धान्तात्· संख्याविशेषाणामविभागेनावच्छे
दकत्वभेदेकैत्वसंख्या तदुक्तं वाक्यपदीये यथौषधिरसाः सर्वे मधुन्याहितशक्तयः अविभागेन वर्त्तन्ते तां संख्यां तादृशीं विदुः· पत्वापरित्यक्तवि
शेषं संख्यासामान्यमभेदैकत्वसंख्येति कैयटः तदुक्तं भेदानां वा परित्यागात्संख्यात्मा स तथाविधः· व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते
ते· आश्रितविशेषाणां यथारूपेणारूपवात् संख्यायते न भुक्ता दिशि प्रभेदक गम्यते इति इदं च मतभेदप्रदर्शनमात्रं संख्यासामान्यमानाभावा
त्· धनितं चेदं अस्यमानो लिंगस्य सामान्ययोगः पृथक्ताक्षमताकैयटेनेति बोध्यं द्विवचनस्यादौ शब्दविशेषोपादानात् संख्याविशेषप्रत्ययः· तावकी
नो मामकीनः इत्यादौ देशविशेषात् शौर्पिकमित्यत्र आत्रियः के न विशिष्टस्यैव परिमाणस्योपादानात् मामजात इत्यादौ विशिष्टका राम॰
लावगमे तात्पर्यात्· एवमन्यदप्यूह्यं संधेयं न्यायमथमोपपत्तिस्थित्तत्वात्कपिंजलन्यायेनात पुरुषहस्त्यादौ राजादीनामेकत्वमन्ययोस्क

26 त आरोहन्तीत्यत्रापि एषर्थे स्यान्तर्भावयितुं शक्यतया आरोहति हस्तिपकान्हस्तीत्यत्रन्यग्भवनानुकूले हस्तिपकनिष्ठव्यापारानुकूलव्या
पारवान्हस्तीति बोधस्य आरोहयति हस्तिपकान्हस्तीत्येतद्वाक्यजन्यबोधस्य च तुल्यतया संपन्नसांपन्नयोः समानार्थकत्वसाम्यात् अध्यारो
पितप्रेषणात् तृतीयकक्षायामपि निवृत्तप्रेषणाद्वितीयकक्षामादायैव शक्यतासाम्योक्तेः अणौ कर्मणो णौ कर्तृत्वं नास्ति प्रथमकक्षाक
र्मणो हस्तिन एव तत्र कर्मत्वात् हस्तिपकानामेवोभयत्र कर्तृत्वादिति नातिव्याप्तिरिति वैषम्यं इयं कक्षा न ग्रंथकारैरुक्तेति चेत्तत्रा
गु विशेषितस्याकिंचित्करत्वात् संपन्नसमानार्थकत्वमात्रस्यैव हि भावबीजत्वे निवृत्तप्रेषणप्रथमद्वितीयपक्षयोरप्युच्छेदापत्तेः अ
पि च ग्रंथ

नचेष्टापत्तिः द्वितीयांतत्वापत्तेः नचघटः क्रियतइत्यादौ व्यभिचारः घटं करोतीत्यादौ तस्यामेव क्रियायां प्रयोगात् तरो द्वितीयात्वस्यासत्॰
नचकर्मत्वेन विवक्षाविषयत्वं द्वितीयाप्रयोजकं नतु कर्मत्वमात्रं पृथगपद्यकारकाणां नावश्यं हेतिवाच्यं कर्मत्वसत्वे विवक्षाया दुर्वारत्वात्॰ न
चवैयाकरणसंप्रदायो नियामक इतिवाच्यं वक्तमात्रं कर्मत्वपि लक्षणप्रसंगात् अतिप्रसंगस्योक्तरीत्यैव सुपरिहरत्वात्॰ नचापादानान्य
त्वमपिविशेषणं नदीवर्द्धतइत्यादाववपगोपचयपत्रपायादेः अग्रामगीरभागेन संयोगविभागौ फलेइतितच्छालिनितीरेतिव्याप्तेः तथा
वृक्षादेः कर्मकत्वं नस्यात्॰ नचक्रियानाशकत्वं फलेविशेषणं परसमवेतक्रियाजन्यवृत्तानिष्ट विभागश्चनक्रियानाशकः उत्तरसंयोगस्यै
वक्रतेनक्रियानाशकत्वात्॰ ग्रामादेश्चगंतृसमवेतगमनविनाशहेतुसंयोगशालित्वात्तत्रातिव्याप्तिरपीतिवाच्यं वृक्षादिफलसंयोगस्यक्रियाना
शकत्वाभावात् रोहावतिव्याप्तितादवस्थ्यात् एवमात्मानंजानातीत्यादावव्याप्तिरिति अत्राहुः क्रियाफलंकेनचिद्धातुनाकर्त्रतिरिक्तनिष्ठत्वेन
प्रतिपाद्यते केनचिच्चनतथा॰ यदाकर्तृनिष्ठत्वेन प्रतिपाद्यते अथवाकस्यचिद्धातोः॰ कर्त्रतिरिक्तनिष्ठत्वेन फलप्रतिपत्तौ तात्पर्यं कस्यचित्तु न
तथा यदा कर्तृनिष्ठत्वेन फलप्रतिपत्तौतात्पर्यं तत्रक्रियाश्रयातिरिक्तनिष्ठतयाधात्वप्रतिपाद्यफलशालिकर्मननवक्ष्यतीरपोऽस्त्वयातं उत्तारण

सि०सु०

विशेषे विभागजन्यफलस्य प्रतीत्यर्थत्वाभावात्. अथः संयोगस्य तदर्थत्वात्. वर्द्धतिना च कर्त्रतिरिक्तनिष्ठत्वेन कस्याप्यभिधानात्.
न चात्मानं जानातीत्यत्रात्मास्थिः परसमवेतक्रियाफलशालित्वेन क्रियाश्रयातिरिक्तवृत्तियत्क्रियाफलं तज्जातीयफलाश्रयस्य
विवक्षितत्वात्. घटादिवृत्तिव्यवहारसजातीयस्यैव [illegible] प्रतीतेः प[illegible]मनः परत्वाभावे फलानाश्रयत्वेपि च क्रियाश्रयाति
रिक्तनिष्ठत्वेन फलस्य धात्वनर्थत्वमानतान्न दोष इति. नैयायिकास्तु धात्वर्थतावच्छेदकफलशालित्वं न तत्. संयोगावच्छिन्नक्रियागमेरर्थः विभा
गावच्छिन्ना त्यजेः अधः संयोगावच्छिन्ना पतेः स्पंदमात्रस्य तदर्थत्वे पर्यायत्वप्रसंगात्. न त्यागमनपतनजन्यविभागमात्रात् पूर्वदेशसंयोगमा
त्राद्यः त्यजेरुत्तरदेशे कर्मत्वापत्तिः स्पंदेः धातोर्व्यापारमात्रगामिकत्वपाधात्वर्थतावच्छेदकत्वस्य संयोगे विरहात्पूर्वापरदेशयो
स्तीरस्य च तथात्वप्रसंगः फलावच्छिन्नव्यापारवाचित्वाद्धातूनां [illegible] सकर्मकत्वे जानात्यादीनां तु नानार्थान्वितो देश्यत्वातिरिक्तविष
यत्वरूपविभक्त्यर्थान्वयार्थकत्वेरूपं गौरांतत्. घटं जानातीत्यादि ज्ञानो घटविषयताशालिज्ञानाश्रय इति बोधात्. उभयसाधारणसकर्मकधातु
योगस्य कर्मप्रत्ययः अत एव पतेर्न सकर्मकत्वं. नानार्थान्वितस्य च तदर्थर्थो द्व्यपत्वस्यैवयत्वेन्वपात्. अभुंजानेपि भोजनापत्तेर्

एम०

श्रथ च संयोगावच्छिन्नव्यापारत्वाद्विना धातुना प्रतियोगिविशेषितस्य वृक्षफलस्योपस्थापनेन प्रतियोगिनिरूपकांशत्वादिति न द्वितीयानिर्देशः
एवं च भञ्जनस्यापादानत्वम् एवं चक्रं करोतीत्यादौ कृधात्वर्थावच्छेदकोत्पत्तिरूपफलभागित्वात्कारादेः कर्मत्वमेव कर्मत्व इति केचित्पतिनो
कर्तृमात्रनिष्ठत्वेनाधःसंयोगात्मकफलोपनयात्कर्मकत्वं गम्यादिनां तु ग्रामनिष्ठत्वेन तदुपनयात्सकर्मकत्वमित्याहुः एतन्मते संयो
गावच्छिन्नव्यापारे लक्षणामङ्गीकृत्य द्वितीयासमासविधानं समाधेयं केचित्तु पतिः सकर्मक एव किन्तु गुरुत्वजन्यविजातीयक्रियैव तदर्थः
तत्समभिव्याहारे न द्वितीया यायास्त्वधःसंयोगलक्षणं कर्मत्वं एवं त्यजिगम्यादेरपि व्यापारएवार्थो न तु फलावच्छिन्नो गौरवात् द्वितीया
दिस्तु तत्समभिव्याहारे रूपतात्पर्यग्राहकतया विभागसंयोगादिपरः अतो ग्रामं त्यजति गच्छतीत्यनयोर्नैकपर्यायत्वं त्यजेर्विभा
गावच्छिन्नस्पन्दवाचकत्वं गमेः संयोगावच्छिन्नस्पन्दवाचकत्वं कार्यतावच्छेदकमिति स्वीकारात् गमनं त्यागः इत्यत्रापि फलावच्छिन्नस्पन्दे लक्षणा
न च चैत्रेण ग्रामस्त्यज्यते इत्यत्र स्पन्दविशेषणकविभागादिविशेष्यकशाब्दानुपपत्तिः विभागसंयोगान्यतरस्पन्दोभयवैशिष्ट्यावगाहिशाब्दत्व
स्यैव विवक्षितत्वात् विभागादिविशेषणकस्पन्दविशेष्यकत्वस्पन्दविशेषणकविभागादिविशेष्यकत्वेत्युभयस्य संग्रहात् सकर्मकत्वव्यवहारस्तेन

सि०धा० तुगतत्तन्निमित्तकः परसमवेतत्वन्तद्धात्वर्थान्वितफलशालित्वं तत्तद्धात्वर्थकर्मत्वं तेन पूर्वदेशादेर्गमनादेन कर्मत्वमिति वदन्ति। तन्नेत्य
परे। क्रियानिमित्तत्वं विना कर्मणोपादानस्य चकारेण कत्वायोगात्। जुहोतिस्का देवतोद्देश्यकोऽग्निप्रक्षेपोऽर्थः स चाग्निसंयोगानुकूलक्रि
यानुकूलो घृतादिनिष्ठो नोदनादिव्यापारः नवाऽग्नौ जुहोतीत्यादौ समभ्यर्थस्यान्वये निराकांक्षत्वं संयोगानुकूलक्रियानुकूलव्यापा
रस्यैव धात्वर्थत्वात्। अतः क्रियाया धात्वर्थतावच्छेदकतया तद्घृतोघृतादेरेव कर्मत्वं न तु संयोगवतोऽग्नेः संयोगस्य धात्वर्थतावच्छेदकतावच्छे
दकतावच्छेदकतया धात्वर्थतानवच्छेदकत्वात्। धात्वर्थे साक्षात्प्रकारस्यैव धात्वर्थतावच्छेदकत्वात्। तथा च घृतवृत्त्यग्निसंयोगावच्छिन्नक्रि
यानुकूलव्यापारानुकूलकृतिमानिति धीः मूल्यदानं विना स्वस्वत्वध्वंसपरस्वत्वजनकस्त्यागो दानं देवतोद्देश्यकस्वस्वत्वध्वंसफलकस्त्यागो
यागः मूल्यग्रहणप्रयोजकस्वस्वत्वध्वंसपरस्वत्वजनकस्त्यागो विक्रयः मूल्यदानप्रयोजकस्वस्वत्वोत्पादकस्वीकारः क्रयः इत्यस्य स्वत्वजनकस्वी रा०
कारः प्रतिग्रहः तथा च विप्राय गां ददाति। विष्णुं यजते गां विक्रीणाति। क्रीणाति। प्रतिगृह्णातीत्यादौ मूल्यग्रहणं [illegible] विना विप्रोद्देश्यकगो
वृत्तिस्वत्वध्वंसपरस्वत्वजनकत्यागानुकूलकृतिमान्। विष्णूद्देश्यकस्वस्वत्वध्वंसत्यागानुकूलकृतिमान्। गोवृत्ति मूल्यग्रहणप्रयोजकस्वस्वत्व

गस्यानेयामकत्वाच्च नातिप्रसंगः तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं बहुत्वे द्वित्वं भवति तिष्यपुनर्व
स्वः तिष्यपुनर्वसू तिष्येति किं कृत्तिकारोहिण्यः नक्षत्रेति किं तिष्यश्च पुनर्वसवश्च माणवकाः तिष्यपुनर्वसवः न चात्रयो
ण्वादेव व्याहतिरिति वाच्यं तिष्यपुनर्वसुशब्दस्य कालभवेन माणवेकत्वे तिष्यपुनर्वसुशब्दस्य सम्प्रत्ययनात् न चानयापि सू
वे सत्रादेव नक्षत्रपदलाभ इति वाच्यम् कालार्थकात्तिष्यपुनर्वसुशब्दाद्वारणार्थत्वात् बहवः तिष्यपुनर्वसवो गताः कतरे
ण तिष्येणांगतः यद्यप्यनयोः प्रदेशान्तरस्थमपि कार्यं नक्षत्रस्यैव स्यादित्येतदर्थं तेन पुष्यपुनर्वस्वोर्नक्षत्राणि पुल्लो
पद्यन्ते न नक्षत्रपदेनोपादेयेन नक्षत्रवाचकवातदुपादानेन कश्चिद्विशेष इति चेन्नाह पर्यायस्यापि ग्रहणार्थं तिष्यपुनर्व
स्व इति सिद्धे इति किं यतिष्यः स एव पुनर्वसू येषां ते तातानो ते तिष्यपुनर्वसवः बहुव्रीहिसमासे एवायं तदुदितेति तिष्यपुनर्व
सू न वा ऽप्राणिनामिति पष्ठेदासमासातिप्रसक्तौ केवलात् वाऽनुपपत्तिरिदं सर्वो द्वन्द्वो विभाषैकवद्भवतीत्यस्य तात्पर्यनात् तेन
वाश्ववडवं शालेकायनेवाश्ववडवं शालेकायनाइत्यादि सिद्धं इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य द्वितीये द्वितीयमाह्निकम् ॥ श्री। ३

र्थः वस्तुमात्रसाधारण्यादर्थत एव लाभादनुपयोगाच्च किन्तु सजातीयान्तरव्यावृत्तत्वं सजातीयनिष्ठभेदप्रतियोगितानव-
च्छेदकैकत्वरूपं साजात्यं च समभिव्याहृतपदार्थसंबन्धितविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण तेनाऽयंघटोऽस्तीत्यादौ एतद्घटनि-
ष्ठस्यैकत्वस्य घटान्तरनिष्ठभेदप्रतियोगितायां घटान्तरनिष्ठैकत्वस्यैव तद्घटनिष्ठभेदप्रतियोगितायामवच्छेदकतया घटनिष्ठ-
भेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः एतद्देशविद्यमानत्वविशिष्टघटान्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वस्य
तद्घटनिष्ठैकत्व एव प्रसिद्धेः तत्र घटान्तरसत्त्वे विवक्षायां तु तदप्रसिद्धमेवास्मात् अत एव पशुना यजेतेत्यादौ एकत्वस्य विवक्षि-
तत्वात्तत्र यागस्यैकपश्वेतरव्यावृत्तेः बहुघटसत्त्वे घटोऽस्तीतिप्रयोगस्य जात्यभिप्रायेण समर्थनीयः यत्तु भावाख्यातवद्वाक्ये
कत्वमविवक्षितमेव साधुत्वार्थत्वादिति तन्न तत्र गत्यन्तराभावेऽप्यत्र तदभावात् इत्याहुः प्रकृतमनुसरामः अत्र वार्तिके
अशिष्यो वा विद्धवत्पृथगभिधानादिति जातिप्राधान्यविवक्षायामेकवचनं तत्र द्रव्यप्राधान्यविवक्षायां तु बहुवचनस्य
सिद्धत्वात्तदिदं नारभ्यमित्यर्थः अस्मदः सविशेषणप्रयोगे नेति वाच्यं देवदत्तो गार्ग्यायणः पण्डितो वाग्ग्रहे ब्रवीमि मे राजा च

सि॰कौ॰ श्रमण्डुयासितगुरुयत्नाभिमानोऽवतात् इत्यादौ न भवत्येव निषेधस्यान्वयविशेषणविषयत्वादित्याहुः दन्तात्र अस्मदो द्वयोश्च

३१ एकत्वे द्वित्वे वा विवक्षिते स्मदो बहुवचनं वा स्यात् वयं ब्रूमः अहं ब्रवीमि आवां ब्रूव इति वा इदमपि भाष्ये प्रत्याख्याते इदं मेऽस्य

द्वित्वपुरुषपदोति अनेनादस्माः हे स्तुप पश्यामीत्युभयथा लोके प्रयोगदर्शनात् आपेक्ष्याख्यातस्य संयोगादिव्यापारपर-

त्वात् अत्रैवाश्रयत्वपरत्वात् तथा च वयं पश्याम इत्यादौ वयमित्यनेनेन्द्रियाणामभिधानात् शरीरवत्त्वाप्यहंकारो-

त्पादात् एकेन्द्रियग्रहत्वाविन्द्रियोतराणामौदासीन्येन सविधानत्वात् कर्तृत्वस्य विवादोत्तरत्वात् पारतन्त्र्यविवक्षायां तु हमि-

त्येकवचने युष्मदस्मदोश्चैकशेषे स्मदएवार्थद्वयाभिधायित्वात् द्विवचने फल्गुनीप्रोष्ठपदानां च नक्षत्रे द्वित्वे बहुत्वप्र

युक्तं कार्यं वा स्यात् नक्षत्रे च अतः पूर्वे फल्गुन्यौ प्रोष्ठपदे वा उदिताः पूर्वाः फल्गुन्यः प्रोष्ठपदा वा नक्षत्रे किं फल्गुन्यौ मा

णविके इदमपि प्रत्याख्याते न युक्तं वेदमसमादायवहुत्वसंभवात् कृत्तिकारोहिणीत्यादिवत् अमावास्यायामप्यादित्यमे

उत्प्रविष्टेन चन्द्रेण नक्षत्राणां योगात् एकस्यां तु ताराया फल्गुनीशब्दस्य वृत्तेः पुष्यवेतावित्यादिवत्त्वेकवचनं शिष्टप्रयो ३१

लोकानुभवमूलकत्वात् तेन हि प्रत्ययार्थतावच्छेदेन प्राधान्येबोध्यते उत तत्सामानाधिकरण्यमात्रेण नाद्यः चैत्रमित्रादौ
कर्मत्वादेः प्रातिपदिकार्थस्य प्रकारत्वेपि संख्यात्वादेः प्रत्ययार्थस्य प्रातिपदिकार्थे प्रकारत्वात् नान्त्यः प्रकृत्यर्थस्यापि क्वचि
त्प्रधानतया प्रत्ययार्थेपि तद्वचनस्यानुपयुक्तत्वात् तथा केवंमेण लोकविरुद्धार्थबोधकत्वादिति लोकसिद्धार्थबोधकत्वा
दिति वहेतद्द्वयेनासमर्थम् कालोपसर्जने च तुल्यं अतीताया रात्रेः पश्चिमार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोद्यतनः वि
शेषणं चोपसर्जनं इत्यादि पूर्वाचार्याणां वचने तत्राप्यशिष्यते समाने लोकसिद्धत्वात् यद्वा लोकसिद्धत्वाख्यो हेतुस्तस्मः
तथात्वमशिष्यत्वसिद्धिरिति योज्यं जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां स्पष्टोर्थः यद्यपि जातिरुपलक्षणे व्यक्तिरू
पदार्थ इति पक्षेपि बहुष्वेकवचनमित्येव युक्तं जातेरुपलक्षणत्वेनाख्यायामिति व्याख्यानात् तथापि जातौ पदार्थे एतत् तदु
क्तं जात्याख्यायां सामान्याभिधानादैकार्थ्यमिति भाष्ये तु यज्ञा गर्गा गार्ग्य इत्येतदेकमित्युक्तं तद्गोत्रस्यापि पारिभाषिकजा
तित्वाभ्युपगमात् बहुषु गार्ग्येषु गार्ग्यत्वस्यैकस्य भावादिति कैयटः जातिश्चेह समानकाभीनां नैकत्वेन वर्त्तते न त्व

भिजकालीज्ञानेकत्वनिर्देशित्वादिः ज्ञाने पदार्थपदे सर्वेषां जातिशब्दत्वेऽपि जात्याख्यायामित्युक्तिसामर्थ्यात् न च त्रपदे
सि·मु· व्रीहिभ्य आयतस्तत्र चेदिति नीतिगुणः स्यात् स्थानिवद्भावेकङ्‌ स्यादेशस्य स्पष्टसोऽङित्वात् मेवं एकस्मिन्नर्थे बहुत्वस्यैवाने
३२ नातिदेशात्स्यान्यादेशभावविरहात् तदुक्तं अर्थातिदेशात्सिद्धमिति एवं तिष्यपुनर्वस्वोरित्यत्रापि द्विवचनबहुव
वचनशास्त्राभ्यां द्वित्वबहुत्वयोरभिधानेमिति वोध्यं संख्याप्रयोगे प्राप्ते निषेधो वक्तव्यः एकस्मिन्बहुत्वातिदेशस्यैकशब्दप्रयो
गेऽपि प्राप्तौ प्रतिषेधारंभः एको व्रीहिः सम्पन्नः सुभिक्षं करोति विकल्पः किं कीदृशमपि यद्यपि स्यात् तत्र सम्पन्नो व्रीहिरि
त्यादौ भिन्नव्यक्तिपरत्वेऽपि एकत्वं व्रीहित्वज्ञानेऽवैवान्वेति क्वचित्पदार्थतावच्छेदकपदार्थयोरप्यन्वयस्वीकारादिति केचित्
अन्ये तु व्रीह्यादिपदशक्यतावच्छेदकतया व्रीहित्वादेः स्वरूपतएवोपस्थित्याऽनन्वयितावच्छेदकव्रीहित्वत्वरूपेणानुपस्थिते
स्तत्र पदार्थान्तरालयानुपपत्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबन्धेन शक्यमर्थे व्रीह्यादावेवैकत्वान्वय इत्याहुः अपरे तु
एकवचनेन तानेकत्वानामुपस्थित्या तेषां प्रत्येकं नानाव्रीहिष्वन्वय इत्याहुः नव्यास्तु नेदमुक्तं नह्येकत्वमात्रमेकवचनस्या ३२

देरुक्तविषयतैवार्थः अतएवकपालंकरोतीतिनशक्त्याप्रयोगः उपादानत्वाख्यविषयताया एव तत्र सत्त्वात् यांतु घटपदंकपालेलाक्षणिकं तेन
क्रियाजन्यघटात्मकफलशालित्वान्मुख्यमेव कर्मत्वादि शक्त्या तु कपालंकरोतीतिनप्रयोगः हेतुस्तमभिव्याहृतघटादेस्तत्त्वघवेनिरूढलाक्षणि
कत्वादित्याहुः पंचकर्तृकरणकर्माधिकरणविभक्तीनां आश्रय एवार्थः फलाश्रयः कर्म व्यापाराश्रयः कर्ता कर्तृकर्मान्यतराश्रयोधिकरणं तत्रफलो
देश्यफलेऽप्यन्यतमाश्रयमात्रमर्थः तत्त्वमेवार्थेऽशक्तिरूपमवच्छेदकं नचचैत्रोग्रामंगच्छतीत्यादौ चैत्रादेरपिकर्मत्वद्वितीयापत्तिः संज्ञान्तरविरहवि
शिष्टकर्मसंज्ञाया एव द्वितीयाप्रयोजकत्वात् परया कर्तृसंज्ञया कर्मसंज्ञाबाधात् एकसंज्ञाधिकारेणसमावेशस्याप्यसंभवात् इति तद्धिंस्य आ
श्रयमात्रस्य वाच्यत्वे कर्तृसंज्ञायापर्यवसानानुपपन्नत्वात्तस्याः कर्मसंज्ञाबाधकत्वानुपपत्तेः नच फलस्याश्रयोपरिविशेषणत्वविवक्षायां कर्मसं
ज्ञा व्यापारस्य तथात्वे तु कर्तृसंज्ञेतिवाच्यं फलाश्रयत्वादेः शाब्दबोधविषयत्वेऽपिकर्तृकर्मान्यतराश्रयत्वस्याधिकरणस्थले शाब्दबोधाविषयत्वात्
तत्रनियामकाभावात् ॥ ॥तथायुक्तंचानीप्सितं ईप्सिततमवत्क्रियया युक्तमनीप्सितमपिकर्मसंज्ञं परिगणनंकर्तव्यं नृटस्यअणोतीत्यादावतिप्र
संगनिवारणार्थं तथाचभाष्यं दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेनचयत्सचते तदकीर्तितमाचरितं कवि

सि०धा० ना नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं कर्त्तव्यमिति निश्चयः प्रष्टीत्यत्रानित्यमागमशासनमिति नुगभावः इकोयणचि विसनाद्यंताघा
तवहत्याद्येशसुद्रादावत् उपयुज्यत इत्युपयोगो मुख्यं कर्म क्षीरकलादि तस्य निमित्तं गावादि गां दोग्धि पय इत्यत्रापि पयस इक्षितत्वमुपयुज्यमानत्वान्न तु गोः
न च तथा प्रकृतत्वेन सिद्धिः तथा प्रकृतत्वाभावात् अविवक्षितो गुणत्वेन कर्मणा च यस्य चेमे संबध्यते क्रियायाः साध्यत्वात्प्रधानं कारकाणां गुणत्वं षष्ठ्येत्समवाये स्व
रितेत् परस्मैपदविधेवैतस्याठपसेथ्वसेवग इत्यस्यानुद्यतेतो रूपं धातूनामनेकार्थत्वात् कविना कांतदर्शिना मेधाविना शागापेत्यत्ति पावत् अकीर्त्ति
तं अकथितमित्याचरितं ग्रहणमित्यर्थः अपादानाद्यविवक्षायां चैतदित्याह अपूर्वविधाविति पूर्वोक्तानामपादानादिसंज्ञानामविषये इत्यर्थः न
चैवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषय इति प्रसंगः पूर्वेत्यन्यमात्रस्योपलक्षणात् नवाकथितमिति निष्ठार्थभूतत्वस्य वक्ष्यमाणे बाधः तस्याऽविव
क्षितत्वात् अत एव पराजेरसोढ इत्यादौ पराजेष्यमाणस्याप्यपादानत्वं इति संप्रदायः परत्वाद्धेतुकर्तृसंज्ञाभ्यामेतद्बाध एकसंज्ञाधिकारादिति न्यायगत्यर्था
नामिति गतिबुद्ध्यादिसूत्रोपात्तानामुपलक्षणं चकारेण जयत्यादिसंग्रह इति कैयटः ते च माधवेनोक्ताः जयतेः कर्षतेर्मथेर्मुषेर्दण्डयतेः पचेः तारे एम०
र्ग्रहेस्तथा मोचेस्त्याजेर्दापेश्च संग्रहः ॥ कारिकायां चशब्देन सुधाकरमुखैः कृतः अथ मिक्षेः पृथग्गुपादानं व्यर्थं दुहादिनिर्देशस्यार्थपरत्वात् या

घटस्य कृतियोगादानयनस्य च कृद्योगषष्ठीप्रसंगसत्वादिदं वाक्यमसाध्वेवेति तदसत्. घटानयनयोरन्वयस्यात्रानभिमतत्वात्. घटस्य कर्मत्वे तस्य
वानयने न्वयस्यावाधितत्वात्. चकारप्रयोगापादनमप्यनर्हं समन्वयविशिष्टघटादिलक्षणार्थैवोपपत्तेः श्रीलिङ्गशक्तिस्वीकारापेक्षया लक्षणाया स्तपु
क्तत्वात्. यत्पदप्रयोगस्याप्यनापत्तिः चित्रहेतुत्वेपि समासे गोपदस्य चित्रगवीस्वामिलक्षकत्वे पास्वामिप्राप्त्यसिद्धेः समासे तत्प्रयोगप्रयोजना
भावात्. चित्रा गावो यस्येति विग्रहे गामेव विशेष्यतया समासार्थावबोधकत्वे विग्रहस्य अर्थस्यादिति पष्ठ्यर्थस्य स्वामिनः स्वछन्देन विशेष्यतासं
पादनार्थमेवोद्देश्यविधेयभावविधयापत्तेस्तद्द्वयोः प्रयोगात्. ननु गोपदस्य गोस्वामिलक्षणायां चित्रापदार्थानन्वयः गोः पदार्थैकदेशत्वात्. नापि वि
त्रापदस्य चित्रास्वामिनि सा गोपदार्थानन्वयादिति चेत्. अत्रवदेशोपाध्यायाः ८ वाक्य एव लक्षणा नच चित्रा गोर्यस्येति विग्रहे एव लक्षणास्त्वप
पदार्थस्तत्रानयनादिक्रियान्वयी तत्र चित्रगोसंबंधितयैवोपस्थितेः कर्मत्वान्वयानुपपत्तेस्तद्द्वयोः प्रयोगात्. ननु गोपदस्य गोस्वामिलक्षणायां चि
त्रापदार्थानन्वयः गोः पदार्थैकदेशत्वात्. नापि चित्रापदस्य चित्रास्वामिनि सा गोपदार्थानन्वयादिति चेत्. अत्रवदेशोपाध्यायाः ८ वाक्य एव लक्ष
णा नच चित्रा गोर्यस्येति विग्रहस्य वुलभस्त्वत्पदार्थस्तत्रानयनादिक्रियान्वयी तत्र चित्रगोसंबंधितयैवोपस्थितेः कर्मत्वान्वयानुपपत्तेः

सि० कौ० गत्वा निर्विभक्तिकमेव पदं विग्रहे विग्रहवाक्यस्यान्वयबोधकत्वापातात्· न च क्रियायामेवान्वयोस्मिन्पक्षे वेदनिष्ठानुबंधित्वस्य प्रकाश
स्यस्यापि विग्रहवाक्यस्य अन्वयः पश्चाद्देवधात्वर्थे इत्याहुः· तत्रेदं चिंत्यं तथापि समुदायस्य प्रत्ययत्वमनुपपन्नं यस्मात्प्रत्ययो विहितस्तस्यैव ग्रहणमिति त्वा
त्· समुदायस्य लक्षणार्थवत्त्वे विना मत्वमनुपपन्नं न हीशाहः स्यप्रत्ययांतत्वेनाः प्रत्यय इति पर्युदासात्· न च प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्त
दंतस्य च ग्रहणमिति परिभाषया नदीशाहस्यैवतेन पर्युदासो न विशिष्टस्येति वाच्यं तथापि अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति पदद्वयस
मुदायस्य नामत्वानुपपत्तेः न च लक्षणायाः पदद्वयवृत्तित्वादर्थवत्समुदायत्वं नालौकिकस्यैव समुदायस्यार्थवत्त्वादिति वाच्यं तथापि द्वयोरर्थवत्त्वानां
पायात्· अन्यथा वाक्यार्थस्य लक्षणत्वे पक्षे विशिष्टार्थस्य समुदायप्रतिपाद्यतया वाक्यस्य प्रातिपदिकसंज्ञापत्तेः परिहार्यत्वात्· अत एव घोषयवा
च्याभ्यामर्थाभ्यां प्रकृतिप्रत्यययोरर्थवत्त्वाङ्गीकारे नियमेन संज्ञानिषेधः स्यादिति भाष्यादिशंका संगच्छते· अन्यथा गभीरयामित्यत्रापि विभक्तेः प्राति
पदिकावयवत्वाभावेनोपप्रसंगाच्च· एतेन गभीरयानघेत्यादिकमपि निरस्तं· अत एव द्वितीयो व्याख्यातः न घोषमित्यत्रापि तत्र विभक्तिलोपप्रसंगस्याधि एक०
क्यात्· अर्थवत्त्वसत्त्वे तत्रापि प्रातिपदिकसंज्ञाप्रसक्तेः· तेन क्रियाविशेषणतयाहितीयांतत्वस्वीकारेण भवतानामत्वस्वीकारात्· आसाम

षेदककोटावनप्रवेशान्नैरवंदुर्गैरं अतएवलक्षणयाअविशेषेपि मत्वर्थलक्षणापेक्षयागौणीदुर्वलेतितिष्ठपदेशाधिकरणेनिरणीतं ता
याच पराभीष्टे विशिष्टार्थे समासेशक्तियोगतः संभवेसति धर्मस्यलघोरेवपुरस्क्रियेतितिष्ठतुविस्तरः अथकथंदेवदत्तस्यगुरुकुलमित्या
दिकमितिचेत् अत्राहुः संबंधिशब्दस्थलेसापेक्षत्वेपिभवत्येववृत्तिः तदुक्तंवाक्यपदीये संबंधिशब्दः सापेक्षोनित्यंसर्वःप्रयुज्यते वाक्यवत्ता
व्यपेक्षाहिवृत्तावपिनहीयतइतितथातस्मात्समासस्तुद्योतकत्वान्नविशेषणे नविशेषणांसंबंधःसापेक्षत्वेप्यभवेदप्यपदा स्वाश्रयसंबंधित्वसंबं
धेनषष्ठ्यर्थस्यसंबंधस्यकुलएवान्वयः तदुक्तं समुदायेनसंबंधोयेषांगुरुकुलादिना संस्पृश्यावयवांस्तेपियुज्यंतेतद्वतासहेति चैत्रस्यनप्त्रेत्या
दावपिषष्ठ्यर्थस्यस्वाश्रयजन्यत्वसंबंधेनधर्मिण्यन्वयइतिशब्दालोके क्वचित्तुसापेक्षत्वेपिसंबंधिकभिन्नस्थलेपिवृत्तिर्भाष्यप्रामाण्यात् तथाहि
किमोदनःशालीनां केषांशालीनामित्यर्थः रक्तश्वेतभेदेनशालिद्वैविध्यात् सक्ताढकमापणीयानां आपणसंबंधिनांसक्तूनामाढकमित्यर्थः
कुतोभवान्पाटलिपुत्रकः पाटलिपुत्रादागतः पाटलिपुत्रकः रोपधेतोःप्राचामितिवुञ् देपाटलिपुत्रेकस्मात्पाटलिपुत्राद्भवानागतइत्यर्थः अकिंचि
त्कुर्वाणाद्यस्त्वत्र असमर्थसमासाअसाधवएवेतिसिद्धांतं तन्नसिद्धं एकार्थीभावसामर्थ्येसमासादयइतिवक्ष्यमाणविभाषायांचसामर्थ्यविशे

सि०सु० षरांनतुसप्यासे गुणाःकृतात्मसँस्कारइतिन्यायात्· तथाचविकल्पेनैकार्थीभूतं समस्तंसमस्यत्तेइत्यादिस्तत्रतत्रवाक्यार्थः नन्वेकस्मिन्नेव
विषयेविकल्पेनसमासइत्यर्थोऽसंभवात्· व्यपेक्षापांवाक्यमेव· एकार्थीभावेतुसमासएवेतिपाक्षे· यद्यप्यलौकिकेप्रक्रियावाक्येसामर्थ्यनास्ति तस्यश
ब्दबोधाजनकत्वात् तथापिपरिनिष्ठितेविशेषणेसंबंधाभावदर्शनात्ः प्रात्रादौद्वितीयादिसामानाधिकरण्यदर्शनेनलकारेतत्कल्पनेवेत्· एवंचि
त्रगुपदस्यान्यपदार्थपरत्वादलौकिकेपितस्यतत्त्वंकल्प्यते· अन्यपदार्थइत्यादिसौत्रानुवादेनैवदेवत्ताविग्रहप्रवृत्तिसिद्धश्चेत्याहुः॥ श्रीः इतिश्रीसिद्धांतसु
धानिधौद्वितीयस्याध्यायस्यप्रथमेपादेप्रथममाह्निकम्॥ ॥सुबामंत्रितेपरांगवत्स्वरे॥ सुबंतमामंत्रितेपरेपरांगवत्स्यात्स्वरेकर्त्तव्ये तादात्म्यातिदेशोयं त
न्निमित्तग्रहणंकार्त्त्यं तस्यामंत्रितपदार्थस्यपत्निमित्तंतत्प्रातिपदिकमेवसुबंतंपरांगवन्नतुतद्भिन्नमित्यर्थः यतेद्विवोरुहितमर्त्तभोजनं दिवइत्यस्य
परांगवद्भावादाष्टमिकोनिघातः नन्विहसुब्ग्रहणंव्यर्थं आमंत्रितस्यपदत्वेनतस्मिन्परेविधीयमानस्यपरांगवद्भावस्यपदविधित्वात्समर्थप
रिभाषोपस्थानेतिङंतस्यवारणासंभवात्· व्यधिकरणस्यवस्तुतोऽसामर्थ्यात्· समानाधिकरणस्यतुसमानाधिकरणमसमर्थमितिवाचनिकासामर्थ्य एम०
सत्वात्ः षष्ठ्यामंत्रितकारकवचनमित्यस्याव्याप्तिवारणायावश्यकत्वात्तएवतिङंतवारणाचे·अस्तुतसुब्ग्रहणोकृतेतीक्ष्णयासूच्यासीव्यन्त्रित्यत्रसुबंत

यमात्‌ विकल्पेंतरसत्वेनुसामर्थ्यात्तत्पुरुषसिद्धिः अतएवान्यत्र महाविभाषयोत्सर्गापवादयोर्विकल्पेऽपवादनिर्मुक्ते नोत्सर्गप्रवृत्तिः ते
नपूर्वकायस्येत्येकदेशिसमासाभावपक्षे वाक्यमेव न तु षष्ठीसमासः दक्षस्यापत्यं दाक्षिरितिवज्ज्ञाननिर्मुक्ते ऽणाभावश्च अतएवोदस्वितोऽन्यतर
स्यामितिविभाषारंभः॥ ॥संख्यावंश्येन॥ वंशेभवो वंश्यः सच द्वेधा विद्यया जन्मना च तद्वाचकेन सह संख्या वा समस्यते द्वौमुनी पाणिनि
कात्यायनौ द्विमुनिव्याकरणस्य त्रिमुनि जन्मना यथा एकविंशतिभारद्वाजं इह पूर्वपदार्थउत्तरपदार्थे सच समासार्थे वंश्ये विशेषणमि
त्यन्वयः द्विमुनिव्याकरणमितितु विद्यया सह वृत्तामभेदोपचारादितिवृत्तिः लक्षणेनेतिसूत्रे अभिमुख्यग्रहणाद्व्ययार्थप्राधान्याभा
वेप्यव्ययीभावइतिदीक्षिताः॥ ॥नदीभिश्च॥ नदीभिः संख्या समस्यते नचद्वीनावतीकोदेश इत्यत्रापि अव्ययीभावस्यादिष्टविशेषाय
दानेन पूर्वोत्तरपदनिर्देशेन समासविधानाद्विशेषाभावादिति वाच्यं अन्यपदार्थे प्रतिषेध इति वार्त्तिकात्‌ पूर्वपदार्थप्राधान्याभावेनद्वी
नावतीकइत्यत्राव्ययीभावानुपपत्तेः नचसप्तगंगमित्यत्रापि नततः समाहारपदस्याभावव्युत्पन्नत्वे समूहरूपस्यतस्यान्यपदार्थस्यक
मेधत्वस्यानतत्वेन तत्समाहारपरत्वेन पूर्वपदार्थविशिष्टोत्तरपदार्थस्य प्राधान्यादिति वाच्यं अत्रोक्ते द्विद्वार्थेधर्मि विशेषाकांक्षा

सि॰ धा॰ पांयमुनेत्युक्ते उत्तरपदार्थवृत्ति पूर्वपदार्थस्य विशेष्यत्वात् पदार्थवृत्ति विषये द्विप्रभृतिशब्दानां द्वित्वादिपरत्वं यापमुनयो द्वित्वमित्यस्य
समासार्थत्वात् पूर्वपदार्थनिर्वाहः नन्वसमुदायेनान्यपदार्थावगमात् कथं त्तरपदाभ्यां द्वाभ्यां तत्र प्रदेशा स्पूर्वपदार्थप्राधान्यमस्त्वे
वेति वाच्यं अन्वयव्यतिरेकाभ्यां तयोः संख्यानदीविशेषमात्रवाचकत्वावधारणात् समाहारे चायमिष्यते सप्तगंगं द्वियमुनं स्वरूपस्य पा
रिभाषिकेन घाष्वनेद्ग्रहः बहुवचनेन सामर्थ्यात् सर्वमेकनदीतरं स्यात्र समाहाराभावान्नाव्ययीभावः अन्यथा नदीपौर्णमास्याग्रह
यणीभ्य इति चूणात् नचोच्यत्रे वेत्स्त्रयोगविभागेन क्रियमाणे गोदावर्यांश्च नपाश्चेत्यपि बहुव्रीह इति वाच्यं प्रयोगादर्शनादेकनदीतरेतद्प्रवे
तेः॥ ॥अन्यपदार्थे च संज्ञायां अन्यपदार्थवृत्तिसुबंतं नित्यं समस्यते संज्ञायां उन्मत्तगंगं नाम देशः लोहितगंगं शनैर्गंगं अस्मेतिकिं
कृष्णवेणी संज्ञायां किं शीघ्रगंगो देशः विभाषाधिकारेप्ययं नित्यसमासः वाक्येन संज्ञानवगमात्॥ ॥तत्पुरुषः बहुव्रीहेः प्रागधिकारो
यं॥ ॥द्विगुश्च द्विगुरपि तत्पुरुषसंज्ञः संख्यापूर्वो द्विगुरित्यत्र चकारपाठेनापि संज्ञासमावेशसिद्धेरिदं व्यर्थमित्युक्तं द्विगोस्तत्पुरुषत्वे टजः एम॰
चौप्रयोजनं पंचराजं राज्ञः हरितिट्चूतस्य समुदायावयवत्वपाउत्तरपदस्य णकारांतत्वाभावान्न ङीप्चे समासार्थोत्तरपदान्तः समासा

ताइतिपक्षेतुपात्रादित्वं पंचराजीतिनिर्मलं स्वहः अन्हष्टखोरेवेति टिलोपः रात्रान्हाहाइतिपुंस्त्वं पंचगवं गोरतद्धितलुकीति टच् भागवन्नस्त्री
त्वं द्व्यंगुलं तत्पुरुषस्यांगुलेः संख्याव्ययादेरित्यच् ॥ ॥ द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांत एतैः सुबंतैः सह
समस्यते स तत्पुरुषः इत्यर्थोपि बोध्यं कृष्णंश्रितः कृष्णश्रितः दुःखातीतः कूपपतितः नवेतानिपतीतिह द्विकल्पाघस्यविभाषेति निष्ठा
यामिट् निषेधापत्तिः अस्मादेवनिपातनादित्यन्ये केचित्तु सेसिचीत्यादिना विकल्पितेट्कानामपि कृती प्रमतीनां इदित्करणं यस्य वि
भाषेत्यस्यानित्यत्वज्ञापनार्थं तेनधावितमिमराजधियेत्यादिकमपि सिद्धमित्याहुः ग्रामगतः तुहिनात्यस्तः सुखप्राप्तः सुखापन्नः गमि
गम्यादीनामुपसंख्यानं ग्रामं गमी ग्रामगमी गमेरिनिरित्यौणादिक इनिः आङि चेति णिनिरिति ठबाहुलकात्केवलादपि भविष्यति गम्यादय
इति भविष्यदर्थे गत्यर्थकर्मणीत्यत्र द्वितीयायाः एतदपवादविषयेपि विधानार्थमिति कृद्योगेपि द्वितीया भाष्यमते तु गत्यर्थसूत्रे प्रत्या
ख्यानात्कृद्योगे षष्ठ्येवेष्यते इति तत्पक्षेऽन्ये केनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीनिषेधः तथाचि हराद्रिरहन्तां गामीपथा स ग्रामीतव
केलिशैलतोरिति श्रीहर्षः मधुपिपासुप्रभृतयो गमिगम्यादिः त्यादिति वामनः मधुपिपासुमधुव्रतसेवितमकुलजालमतं भमत्वी

सि०धा० त्रुधां ननु श्रितादिभिः सह बहुव्रीहिरेव सिद्धः द्वितीयासमासविधिवैयर्थ्यं अर्थभेदाभावात्· न च स्वरे भेदः अहीने द्वितीयेति तत्पुरु
षेपि पूर्वपदप्रकृतिस्वरत्वविधानात्· अतीताद्यस्तु प्राप्तापन्नैः सह तत्स्वरार्थं तत्पुरुषो विधेय एव· अतीतासत्वयोरहीने इत्यनेन· अ
नुपसर्गे इति पर्युदासेन च तत्र पूर्वपदप्रकृतिस्वरस्यानिष्टत्वात् थाथादिस्वरेणान्तोदात्तसिद्धये तत्पुरुषस्यावश्यकत्वात्· न च जा
तिकालसुखादिभ्यो ऽनाच्छादनात् क्तो ऽकृतमितप्रतिपन्ना इत्यनेन बहुव्रीहावन्तोदात्तविधानात्· जात्यादिभ्यः परेषु श्रितादिषु स्वरे दो
षः स्यात्· तत्पुरुषारंभे हि बहुव्रीहेरन्तोदात्तत्वं तत्पुरुषस्य त्वहीनेति पूर्वपदप्रकृतिस्वरत्वं इति द्वैरूप्यं तत्पुरुषानारंभे तु अन्तोदात्तत्वमेवेति
वाच्यं वा जाते इत्यत्र जातश्रितपतितगतादीनां श्रितादीनां प्रवेशं कृत्वा बहुव्रीहिमात्रप्रकारेण वा द्वैस्वर्ये विशेषाभावात्· न च यत्र बहुव्रीहित
त्पुरुषयोः प्राप्तिस्तत्र तत्पुरुष एवेति ज्ञापनार्थमिदं तेन राजसखः इत्येव भवति न तु राजासखास्येति बहुव्रीहिरपीति वाच्यं स्वस्ति सोम सखा
पुनरेहि गवां सखः इत्युभयस्यापि दृश्यमानत्वात्· अत्र भाष्यकाराः बहुव्रीहौ शेषाद्विभाषेति कपा भाव्यं न तत्पुरुषे इति तन्मते जात्यादाव
पि रूपभेदापत्तिः बहुव्रीहावेव स्वरद्वयस्वीकारात्· सिद्धान्ते तु तत्र तत्पुरुषे ऽहीने द्वितीयेति पूर्वपदप्रकृतिस्वरो न तु कप् बहुव्रीहौ तु कब् एम०

स्त्विन्नतु पूर्वपदप्रकृतिस्वरः अंतोदात्तविधानादिति विशेषः स्वयं क्तेन सुवंतेन स्वयमित्येतत् क्तांतप्रकृतिकं यत्सुप्तदंतेन समस्यते
द्वितीयायाः श्रकारेण संबंधः कर्तर्यर्थत्वात् स्वयंकृतमित्येकपद्यात्समासांतरमेव शस्त्रामरः कोशः क्तांतरमिति निपातनिषेधः स्वयंकृतस्यापत्यं स्वा
यंकृतिरिमितद्धितश्च ॥ ॥खट्वाक्षेपे खट्वेति द्वितीयांतं क्तांतेन सुवंतेन समस्यते निंदायां खट्वारूढो जाल्मः जाल्मो समीक्ष्यकारी
स्यादित्यमरः समावर्तनेनोत्तरं खट्वारोहणं विहितं तत्सर्वमेव तदावरणमित्यामिसंनिषिद्धाचरणमस्य वर्तत इति निमित्तं अवयवार्थस्त्वि
वक्षितः येनस्यात्क्रमणादूढः खट्वामनुशयीनरः आदितस्तत्र कर्मग्रमिष्ठत्वाभावमात्मनः स्यादेवाक्येन निंदा गम्यमानादिभाषाविकारे
पि समासस्य नित्यत्वं ॥ ॥सामि सुवंतमेतत् क्तांतेन वा समस्यते सामि त्वर्द्धे जुगुप्सित इत्यमरः अव्ययत्वार्थकत्वान्न द्वितीयांतत्वं सामि
कृतं एवं गाधिसुतेन सामिघटितामक्षोभमंदाकिनीति श्रीहर्षः॥ ॥कालाः द्वितीयांताः कालवाचिनः क्तेन सह समस्यते अनत्यंतसं
योगार्थवचनं मासप्रमितः मासप्रमितः प्रतिपच्चंद्रः मातुं माने आदिकर्मणि क्तः मासं परिच्छेत्तुमारब्धवानित्यर्थः प्रतिपच्चंद्रस्य मासेन सह
नास्त्यत्यंतसंयोगः प्रतिपद्येव शिष्टस्यतिथ्यंतरं चंद्रे विरहोत्र॥ ॥अत्यंतसंयोगे च कालाः इत्येव अक्तांतार्थ आरंभः मुहूर्तं सुखं मुहू

सि॰ धा॰ सुखं तद्यापीत्यर्थः कालाध्वनोरत्यन्तसंयोगे द्वितीया ॥ ॥ तृतीया तत्कृतार्थेन गुणवचनेन तृतीयान्तं स्वार्थनिष्ठजनकत्वप्रतियोगिकृ
तत्वत्त्ववदर्थकेन गुणवचनेनार्थशब्देन च सह समस्यते। तत्कृतेति छान्दसस्तृतीयालोपः तत्पदं तृतीयान्तार्थपरं तत्कृतत्वम
पि गुणाश्रयस्य स्वार्थद्वारकं शंकुलया खण्डः शंकुलाखण्डः किरिणा काणः किरिकाणः खडिभेदने कणनिमीलने घञन्तौ काणखण्डश
ब्दौ गुणवाचिनौ ततः कोपाद्यो गुणविशिष्टद्रव्यवाचिनावपि गुणवाचिनौ भवत एव तन्मात्रवाचकत्वस्यात्राविवक्षणात् वचनग्रहणसाम
र्थ्याच्च केवलगुणवाचिनो न ग्रहणं ष्ठेनेन पाटवमिति धान्येनार्थो धान्यार्थः कर्मणि भावे वा घञ् प्रयोजनं इच्छा तदर्थः हेतु तृतीयायाः
समासः तत्कृतेति किं दृष्टाक्षुद्रिकेत्यत्र मा भूत् यदा मुंक्तेऽर्थिभोजनापेक्षो दधिः करणभावः यदा तु विशिष्टद्रव्यसंस्कृतं दध्यपि पाटवं करोति
क्रियाकारकभावो विवक्ष्यते तदा भवत्येव समासः तस्माद्यत्रोत्तरपदे क्रियाया प्रतीतिस्तत्रापि तत्कृतत्वे समासः भोजनादिद्वारके सा
मर्थ्यमास्ते इति तात्कालिकतद्ग्रहणं एवं कुंकुमेन लोहितं मुखमित्यादावपि समासः गुणेति किं गोभिर्वपावान् गवादिभोजनात्पीनत्व एम०
मित्यस्ति तत्कृतत्वं न चायं गुणवचनो भवत्येवेति वाच्यं केवलगुणबोधकस्यैव यस्य क्वचिद्गुणविशिष्टद्रव्यबोधकत्वं तस्यैव गुणवचनत्वात् व

छब्दस्य च द्रव्यमात्रवाचित्वात् गुणाश्रयत्वे निविशते पैतीति लक्षणपिष्यते॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः। एतैः सह तृती
यान्तं प्राग्वत् समासविधानादेव तृतीयाप्रकृतेः पूर्वादिभि योगे तृतीया। मासेन पूर्वो मासपूर्वः। मात्रा सदृशः सम्मो वा मातृसदृशः। मातृसमः। तुल्यार्थै
रिति तृतीया। सदृशग्रहणं च सदृशप्रतिरूपयोः सादृश्य इत्यत्र षष्ठ्याः भाष्यकृद्भिः प्रत्याख्यातत्वात् तथाहि तुल्यार्थयोगे षष्ठ्यपि प्राप्तिः तत्र समासेनैव
सिद्धिः न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदस्य प्रकृतिस्वरार्थमिदं षष्ठीसमासे तोरस्नातृलोपस्यैरिति वाच्यं सदृशप्रतिरूपयोः सादृश्ये इत्यनेनै
व सिद्धेः न च तत्रैव सदृशग्रहणमास्त्विति वाच्यं षष्ठीसमासपक्षे तोरस्तन्ते तौ र्गवारपि नुतदावश्यकत्वात्। न चानभिधानात् षष्ठीसमास एव मा
स्त्विति वाच्यं दास्याः सदृश इत्यत्र षष्ठ्याः आक्रोश इत्यलुक् समासस्य भाष्ये उदाहृतत्वात्। न च सदृशे तृतीयान्ते न समासार्थमिह सदृशोपादानमि
ति वाच्यं तावता तत्राप्यदेव सिद्धेः। न च सदृशशब्दस्य केवलगुणवाचकत्वाभावाद्व्यापावछदसेव न तत्समासो न स्यादिति वाच्यं षष्ठीसमा
सेनैव सिद्धिसंभवात् इति। पूर्वसूत्रे अर्थशब्देन समासस्य व्याख्यातत्वादित्यर्थग्रहणं ऊनेन सप्रयुज्यते। न तु पूर्वादिभिः समशब्दस्य पृ
थगुपादानात्। माषेणोनं माषोनं कार्षापणं। माषविकलं वा। वाचा कलहो वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः। मिश्रग्रह

सि० धा० गो सोपसर्गस्यापि ग्रहणं गुरुसंमिश्राः मिश्रं चानुपसर्गमसंधावित्यनुपसर्गग्रहणादस्येतस्मिन् अवरस्योपसंख्यानं मासावरः॥ ॥कर्तृक
रणे कृता बहुलं ३ अभयेमध्ये अन्तरार्थात्तृतीया कृदन्तेन सह बहुलं समस्यते हरिणा त्रातो हरित्रातः नखैर्भिन्नो नखभिन्नः कृद्ग्रहणे गति
पूर्वकस्यापि ग्रहणं नखनिर्भिन्नः अर्थग्रहणं किं भिक्षाभिरुषितः हेतौ विधेयं तृतीया बहुलग्रहणाच्छ दशानप्रकृत्वादिभिर्न हस्तेन कृ
तवान् इत्यादिन चैवं क्लेनेत्यवोचाम तो इति वाच्यं नखनिर्भिद इत्यादौ घनो घंते समासानुपपत्तेः तस्माद्व्याख्यातियामिनिरात्मार्थं बहुलमित्यपस्मा
धुः बहुलग्रहणाद्द्विपादाभ्यां हारक ४ पादहारक इति गपादानपञ्चम्यापि समासः कर्मणि ण्वुल् एवं गलेचोपकः चुपमन्दायां गतौ हेतु
मत्संपतो कर्तरि ल्युल आमूर्ध्व मस्तकात्स्वाङ्गादित्यलुक् कृत्येरिति किं काष्ठैः पचतितरां इत्यत्र मा भूत्॥ ॥कृत्यैरधिकार्थवचने स्तुति
निंदान्यतरतात्पर्यकं स्वार्थातान्यर्थकं अधिकार्थवचनं तत्र कर्तरि करणे च तृतीया कृत्यैः समस्यते काकपेया नदी पूर्णत्वात्तीरस्थैः काकैर
पि पातुं शक्येति स्तुतिः अल्पत्वात्काकैरपि पेयेति निंदा वा क्रियापदानस्य स्तुतिनिंदातात्पर्यकत्वेन कर्तृकारणयोर्गौणत्वादप्राप्तः स एम०
मासो विधीयत इति केचित् अन्ये तु पूर्वं क्रियाकारकयोरन्वये तु स्तुतिनिंदयोरवगतिः अर्थवादाधिकरणन्यायात् अतः अपंचार्थ

मेतत्. अत एव काकपीता नदीति अकृतेनाप्यधिकार्थवचने समासो दर्शित इत्याहुः॥ अन्नेन व्यंजनं॥ संस्कारकद्रव्यवाचि तृतीयान्तं संस्का
र्येण सह प्राग्वत्. दध्ना उपसिक्त ओदनो दध्योदनः इह कारकाणां परस्परान्वयेपि वक्तावंतर्भूतं उपसेकक्रियया सामर्थ्य संपत्तिः उ
पसेकं विना दध्योः संस्कार्यसंस्कारकभावस्य प्रतीयमानत्वानुपपत्तेः न च वचनसामर्थ्यात् सामर्थ्येपि समासोस्तु किं दध्ना ओदनो भुक्त
मित्यादावव्याप्तेः॥ ॥भक्ष्येण मिश्रीकरणं॥ गुडमिश्रा धाना गुडधानाः वचनमिश्रणात् किं यानभीवः खरविशदमभ्यवहार्यं भक्ष्यं खर
रं कठिनं विशदं विभक्तावयवं न चैवं अभक्ष्य मित्यादि कथमिति वाच्यं ह्यस्य जलस्य भक्षणते उक्तार्थत्वात् तत्र गोरसत्वेन कर्मत्वात्तत्वेन वा निर्वा
हात्॥ ॥चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ चतुर्थ्यन्तपदवाच्यार्थोद्देश्यकं पदं वा किं नार्थादिशब्दैश्च सह चतुर्थ्यन्तं समस्यते तादर्थ्ये
सह प्रकृतिविकृतिभाव एव समासस्त्विष्टः बलिरक्षितग्रहणात् सामर्थ्यात्. अन्यथा कुबेराय बलेरपि कुबेरार्थत्वात् तदर्थत्वेनैव समासः स्या
त्. यूपाय दारु यूपदारु. कुण्डलाय हिरण्यं कुण्डलहिरण्यं नेह रंधनाय स्थाली अश्वघासादयः षष्ठीसमासा इति भाष्यं अत्र यूपदार्वादि
त्यादौ उत्तरपदार्थस्य पूर्वपदार्थार्थत्वप्रकारको बोधः अश्वघासादौ तु अश्वादिसंबंधित्वप्रकारक इति विशेषः अर्थेन नित्यसमासो विशे

सि०धा० ष्यलिंगता च वक्तव्या । द्विजायायं द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः । अत्र चतुर्थ्यन्ताद् अर्थस्योक्तत्वादर्थशब्दस्य पृथक्प्रयोगासं
भवेन नित्यत्वं न्यायसिद्धं समासेनुवचनसामर्थ्यादुक्तार्थस्याप्यर्थशब्दस्य प्रयोग इति वैषम्यं तस्मात् परवल्लिंगताबाधाय विशेष्यलिंगत्वमा
त्रैव कर्तव्यं ननु तदर्थे विकृतेः प्रकृताविति तत्र तदर्थे सर्थविति सूत्रं कार्यं तादर्थ्ये न चतुर्थ्या आक्षेपः तस्मै हितमित्यतो वा तदनुवृत्तिः चतुर्थी
समर्थात् तदर्थे वाच्ये सर्थप्रत्ययः स्यात् आदिभिड्ड्वभसः प्रत्ययस्येति संहितापाठे यकारस्य पस्य निर्देशो तत्र प्लुत्वेन सकारप्रश्लेषात् सकारस्ये
त्संज्ञा । स्थिति चेत्पदत्वे तेन राजार्थं भवदर्थमित्यादौ नलोपजश्त्वादि पकारोनुदात्तार्थः तस्मात्प्रकृते पर्याय एव स्वरसिद्धिः तेनार्थ इति पूर्वपदप्रकृति
स्वरो नारंभणीयः प्रत्ययत्वाच्च न पृथक्प्रयोगापत्तिः तद्धितत्वादभिधेयलिंगता चेति किमर्थमेतदिति चेत् न सर्थपः प्रत्ययत्वे प्रत्यर्थे स्वर्थमित्य
त्र इप्यडुच्चडोः प्रसंगात् सकारप्रश्लेषे च मानाभावात् बुस्ध्यमणादिसूत्रेणास प्रत्यये तेन सहस्यादावतिव्याप्तेश्च अथ तथापि ब्राह्मणार्थोपस्य एम०
स ब्राह्मणार्थ इति वृत्तौ हितरक्षितः ब्राह्मणार्थस्य वस्त्रनो ब्राह्मणाय योज्यत्वात् न च द्विजार्थं पय इत्यादेरपयसः पूर्वसिद्धतात्तेन ब्राह्मणस्य
न प्रयोजकत्वमिति वाच्यं क्रियोक्षणान्तसंभवात् एवं च चतुर्थ्यन्ते न विग्रहाभावः विशेष्यलिंगत्वे पूर्वपदप्रकृतिस्वरत्वे चेति सर्वत्र वृत्तौ हितत्वादे

वसिद्धमिति चेत् मैवं महदर्थमित्यत्रात्वकपोः प्रसंगात् स्यादेतत् तदर्थे स्योऽन्त्यपदस्यार्थशब्द आदेशः क्रियतां तथा च विग्रहाभावः स
र्वलिंगता च सिद्धाः न च पथ्य आदिशब्देऽप्ययोगाननुपपत्तिः आदिशब्दस्य शक्यांतरसाधारण्येन अर्थविशेषाभिव्यक्त्यर्थं तदुपपत्तेः तथा च तद
र्थार्थेति योगविभागः तदर्थे स्योऽन्तरपदस्यार्थशब्द आदेशो विकल्पेन भवतीत्यर्थः ततो बलिरक्षितयोरपि विभाषार्थशब्द आदेशः स्यात्
कुबेरार्थो बलिः कुबेरबलिः पूर्वेणासिद्धो ज्ञापनार्थमिदं प्रकृतिविकृतिभावान्यत्र नित्योऽर्थादेश इति तेन रंधनार्था स्थाली त्येव न तु रं
धनस्थालीति स्वार्थे दानुपूर्वपदानुदस्यादौ योग्यं इति चेत् मैवं उदकार्थो वीवधः इत्यत्र वीवधशब्दस्यार्थादेशमंथोदनेत्यादि नाऽदद
कशब्दस्यादादेशप्रसंगात् अतो यथान्यासमेवं न्याय्यं ॥ ॥ पंचमी भयेन ॥ पंचम्यंतं भयप्रकृतिकेन सुबंतेन सह समस्यते । चौरभयं भ
यमीतिभीभिरिति वाच्यं वृकभीतः नेदं वृकेभ्यस्त्रासः पूर्वस्येव वा कुलकस्यापपंचः तेन ग्रामनिर्गतो धर्मजुगुप्सुरित्यादि ॥ ॥ अपेता
पोढमुक्तपतितापत्रस्तैरल्पशः एतैः सह पंचम्यंतं अल्पं समस्यते स तत्पुरुषः वक्तव्यार्थादित्यत्र मंगलामंगलवचनमिति वचनेऽपि अस्मा
देव निपातनाद्धृतं सुखापेतः कल्पनापोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्रस्तः असार्वत्रिकत्वार्थकत्वेन अल्पशः इत्युक्तेर्नेह प्रा

सि·धा० सारासंपतितः वाकुलकस्यैवायं प्रपंचः॥ ॥सोकांतिकदूरार्थकृच्छ्राणि क्तेने अर्थैतिपूर्वोक्तविशेषणं स्तेकान्मुक्तः अल्पान्मु
क्तः अंतिकादागतः अभ्याशादागतः दूरादागतः कृच्छ्रान्मुक्तः पंचम्याः स्तोकादिभ्यः इत्यलुक्॥ ॥सप्तमीशौंडैः बहुवचनाच्छौंडा
दिभिरित्यर्थः छत्रिणोगच्छंतीत्यादिवद् अजहत्स्वार्थलक्षणया शौंडशब्दस्य तद्घटितधूर्त्तादिसमुदायपरत्वात् अक्षशौंडः प्रसक्तिरूप
क्रियायाः हेतोर्वर्तमानो वा तत्र सप्तम्यर्थान्वयः अंतःशब्दस्यात्र पठितस्य योगे वचविन आधारत्वविवक्षायां सप्तमी हेतुशाखेति वर वनेऽत्रे
त्वर्वनांतः अस्य वैकल्पिकत्वात्पक्षे अव्ययीभावः अंतर्वणं प्रतिरंतरिति णत्वमिति इदं दृष्टं अंतः शब्दे या विचारणा सा तां विभक्तिमात्रेऽप्य
गस्यासंभवात्साधुत्वार्थमेव मध्यशब्दस्य प्रयोगात् आधिकरणविशिष्टमध्यवाचकस्यास्य विभक्त्यर्थमात्रवृत्तित्वाभावात्तत्रेति दी
क्षिताः वस्तुतो मध्ये इत्यभिधाने पि अधिकरणातिरिक्तोऽर्थो नास्त्येवांतःशब्दस्य अधिकरणमात्रवृत्तिशब्दांतरकल्पने गौरवात् न च
वनेऽतरिति सप्तपदविग्रहस्यैव तथा सुत्पन्नपपत्तिः तत्पुरुषनिर्मुक्तेः अव्ययीभावस्य प्रसक्तेस्तस्य वा नित्यत्वेन वाक्यबाधकत्वादिति वाच्यं एम०
वने इति सप्तम्याः अधिकरणातिरिक्तार्थपरत्वेस्य विग्रहे वक्तव्यत्वात् अधिशब्दोप्यत्र तस्य वाऽधिकरणप्राधान्येऽव्ययीभावः आधेयप्राधा

न्येत्यनेन तत्पुरुषः अध्युत्तरपदत्वात्त्वसमासः आत्मनाधीनः आत्मसोऽध्यधिरिति विग्रहः शौड धूर्त कितव व्याडप्रवीण संवीत अंतर
अधिकरणप्रधानस्यायं अधि पटु पंडित कुशल चपल निपुणस्वत शौडादिगणो ह्येतैः समास इत्यर्थः ॥ ॥सिद्धशुष्कपक्वबंधैश्च॥
एतैः सप्तमी समस्यते सांकाश्यसिद्धः कांपिल्यसिद्धः संकाशेन कंपिलेन च निर्वृत्तं सांकाश्यं कांपिल्यं च नगरं संकाशादिभ्यो ण्यः न
त्रपतपसासिद्धशुष्कपक्वबंधैश्च एतैः सप्तमी समस्यते सांकाश्यसिद्धः कांपिल्यसिद्धः संकाशेन कंपिलेन च निर्वृत्तं सांकाश्यं कांपिल्यं न
संकाशादिभ्यो ण्यः तत्र तपसा सिद्ध इत्यर्थः आतपशुष्कः स्थालीपक्वः चक्रबंधः चक्रे बंधः बंधे च विभाषेत्यलुक्॥ ॥ध्वांक्षेण क्षे
पे ध्वांक्षेण विना सह सप्तम्यंतं समस्यते निंदायां तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः यथा ध्वांक्षास्तीर्थे चिरं नावतिष्ठंते तथा यो विद्या
पलाकार्येषु अनवस्थितो भवति नैव मुच्यते ध्वांक्षार्थो व्याख्यातो न क्षेपे किं तीर्थे ध्वांक्षस्तिष्ठति॥ ॥कृत्यैर्ऋणे॥ आवश्यके कृत्यप्रत्ययैः कृ
त्येति यत्प्रत्यय एव गृह्यते व्याख्यानात् वहुवचनं तु प्रकृतिभेदाभिप्रायं मासेदेयमृणं पूर्वाह्णे गेयं साम तत्पुरुषे कृति त्वलुक्॥ ॥संज्ञा
यां सप्तम्यंतं सुपा समस्यते संज्ञायां अरण्येतिलकाः अरण्येमाषाः वनेकसेरुकाः हलदंतात्संज्ञायामित्यलुक् वनेभेने संज्ञा नेव

सि॰ धा॰ गमान्त्रिंशत्समासेत्वं ॥ ॥ क्तेनाहोरात्रावयवाः । दिनस्यान्ते अह्नावयवाः समसंख्यन्ताः । क्तान्तेन समस्यन्ते । पूर्वाह्णकृतं अपराह्णकृतं पूर्वरा

त्रेकृतं अपररात्रेकृतं अवयवेति किं अह्नि दृष्टं रात्रिवृत्तमनुघतेति बहुलग्रहणादिति केचित् । अधिकरणस्य शेषत्वविवक्षायां षष्ठी

समासो वा ॥ ॥ तत्र तत्रेति सप्तम्यन्तं क्तान्तेन सह समस्यते तत्रभुक्तं तत्रकृतं यद्यप्यधिकरणार्थस्याभिहितत्वात्तत्रशब्दात्सप्तम्येव प्राप्ता न

थापि तत्र भवानित्यादौ विभक्त्यंतरे विदर्शनादधिकरणप्रतिपत्तये तत्रशब्दस्यापि सप्तम्यपेक्षत्वमिति वृत्तिकृतः । दीक्षितास्तु अत्र सप्तम्यधि

कारेपि अर्थवशान्न दोषः पूर्वपदस्य प्रकृतिस्वरस्याप्यध्वायत्वादेवसिद्धेः सप्तम्यालोपस्यावश्यकत्वेन विभक्त्यंतरस्याधारणस्य तद्वत्स्थ

त्वाच्चेत्याहुः ॥ ॥ क्षेपे सप्तम्यन्तं क्तान्तेन समस्यते निंदायां अवतप्तेनकुलस्थितं त एतत् । यथा तप्तदेशे नकुलस्थिरं न तिष्ठति । तथा का

र्याण्यारभ्य मध्ये परित्यजन्नेवमुच्यते । क्षेपेह्रणो गतिकारकपूर्वस्यापि ग्रहणान्नकुलस्थितशब्देन समासः । उदके विशीर्णं प्रवाहेमू राम॰

त्रितं भस्मनि हुतं निःफलमिति पात्रेसं · तत्पुरुषे कृति बहुलमित्यलुक् ॥ ॥

अथः संयोगावच्छिन्नव्यापारवाचिना धातुना प्रतियोगिविशेषितस्यैव फलस्योपस्थापनेन प्रतियोगिनिराकांक्षत्वादिति न द्वितीया
निर्देशः एवं वृक्षं त्यजति इत्यादावप्यूह्यम्। एवं च कण्टकं करोतीत्यादौ कृधात्वर्थविच्छेदकोत्पत्तिरूपफलभागित्वात्कण्टकादेर्मुख्यमेव कर्मत्वमिति
केचित्तु पतिना कर्तृमात्रनिष्ठत्वेनाधःसंयोगात्मकफलोपनायकमकर्मकत्वं गम्यादिनां तु यामनिष्ठत्वेन तदुपनायकत्वात्सकर्मकत्वमित्याहुः।
एतन्मते संयोगावच्छिन्नव्यापारे लक्षणामङ्गीकृत्य द्वितीयासमासविधानं समाधेयं केचित्तु पतिः सकर्मक एव किं तु गुरुत्वजन्यविजा
तीयक्रियैव चेतरेऽर्थः तत्समभिव्याहृतद्वितीयायास्त्वधःसंयोगलक्षणा कर्मत्वं एवं त्यजिगम्यादेरपि व्यापार एवार्थो न तु फलावच्छिन्नो गौरवा
त्। द्वितीयादिस्तु तत्तत्समभिव्याहाररूपतात्पर्यग्राहकमद्यशाद्विभागसंयोगादिपरः। अतो ग्रामं त्यजति गच्छतीत्यत्र न योर्न पर्यायत्वं त्यजेर्विभागावच्छिन्नस्पं
दशार्थत्वे गमेः संयोगावच्छिन्नस्पंदशार्थत्वे कार्यतावच्छेदकमिति स्वीकारात्। गमनं त्यागश्च तत्रापि फलावच्छिन्नस्पंदे लक्षणा न च चैत्रेण ग्रामस्त्यज
नेइत्यत्र स्पंदविशेषणकविभागादिविशेष्यकशाब्दानुपपत्तिः विभागसंयोगान्यतरस्पंदोभयवैशिष्ट्यावगाहिशाब्दत्वस्यैव विवक्षितत्वात्। विभा
गादिविशेषणकस्पंदविशेष्यकत्वे स्पंदविशेषणकविभागादिविशेष्यकत्वे तूभयस्य संग्रहात्। सकर्मकत्वव्यवहारस्त्वनन्यगततत्तन्निमित्तकः।

ग्रामंसेनांचनयतीतिक्रियाशब्दत्वात्। लिंगत्रयसाधारणात् यास्त्रियामपिनदीसंज्ञाविरहः। नन्वेवं दृषच्छनिप्रभृतीनामुभयलिंगानामपदादीनां
चगुणावचनानां सर्वलिंगानां स्त्रीविषयत्वाभावात्। [ि]यावृत्तावपि ङिति ह्रस्वश्चेति नदीसंज्ञा न स्यात् मैवं तत्राप्याग्रहणमपहाय स्त्रीशब्द
मात्रस्यानुवर्तनात्। अत्रेदंतत्वं लिंगान्तरानभिधायकत्वं नित्यस्त्रीत्वमिति केचित्। शब्दान्तरसमभिव्याहारं विनैव स्त्रियां वर्तमानत्वं तदिति हर
दत्तः। न च सख्यादावैरेतदर्थालाभः। आसमंतात् वृत्ता ते इत्यतो लिंगान्तरानभिधायकत्वस्यवास्यापि लाभात् समंताद्भावस्य तन्मात्रपरत्वे
वनैरपेक्ष्यपरतयापि नेतुं शक्यत्वात्। पत्न्याचारस्त्विवं तोत्कैः सिद्धिरपि स्त्रियेआत्मनयेत्याद्यावत्तिव्याप्तिः। न च महासंज्ञाकरणबलात्स्त्रीवाच
कस्येतदर्थलाभः। तस्मादेव नित्यांशस्यापि लाभेन स्त्र्याख्यावित्यस्यैव पर्यापत्तेः। आस्त्रग्राथ्यस्योक्तत्वेपि प्रकृत्यर्थस्यापृक्तत्वेन स्त्रियां
वर्तमानत्वान्नयापाद्य। नन्वेवं लिंगविशेष्यनिष्ठत्वेनैतिवाच्ये एतद्बोधकपदस्य सत्त्वे नुपादानादिति। तत्र स्त्रियमाचष्टात्मा इति द्वितीयापाविशेष्य
त्वार्थकतयास्त्र्यादेव तदर्थलाभात्। यदंजानातीत्यादौ विशेष्यत्वस्य द्वितीयार्थतायाः क्लृप्तत्वात्। प्रकृत्यर्थोक्तिमात्रेण निम्नसंग
दाने प्रकृते लिंगान्तरानभिधायकत्वसद्भावात् कैयटमतेपि तस्य दुर्वारत्वाच्च। न च हरदत्तमते ग्रामण्य इत्यादावपि नदीसंज्ञापत्तिः ग्रामणी

सि· सुधा खलपूकरगृहदानां मुखवत्तेः पुंस्येव सत्वात् शक्तत्वाद्भ्यस्तित्वाच्च· कौशांबी निर्गमनादिकं च स्त्रीपुंससाधारणमिति नाव्याप्तिः किंच कैप
टपत्ते आधेयैश्वासलरोपे इति माघविरोधः आध्मानकर्तृत्वस्य लिंगत्रयसाधारण्याद्वापर्णीशब्दादिव ङ्रीत्वानुपपत्तेः ननु आससमंताद्धी
यस्या इति बहुव्रीहौ उत्तरपदस्य नित्यस्त्रीत्वान्ङीत्वे प्रथमलिंगग्रहणं चेति वत्समासत्वात्· अतिलक्ष्मी आलक्षणाद्येति वृद्धितिचेत्र पर्णोदु ह्व्री
भत्वापत्तेः गतिकारकपूर्वस्यैव ग्रहणमित्युक्तगतिसाहचर्येण कारकपूर्वस्यापि नित्यसमासस्य ग्रहणं गतिसमासस्य प्रतिपदोक्तस्य ग्रहणाज्जे
तेन दुर्धियः निर्धियः वृश्चिकभियेत्यादावनित्यसमासत्वादेरनेकाच इति यणेनेति पुरुषोत्तममश्रमष्ट ज्ञिभिर्व्याख्यानात्· अतएव कृष्णे मेजंतसूत्रे मा
नः समस्य कृष्ण इति मंत्रव्याख्यायां दुर्धिय इति कैयट श्रहरविश्रकर्षणाचेदमर्थकथनं व्याख्येयमंत्रे तु दुर्ष्ठं ध्यायतीति विग्रहे नित्यसमास एव ततो
यणः· दुर्धो नाश दाश दभेदपेत्यतमनुसपदादेक्षत्वं इति एवोशदिसूत्रस्य वार्तिकेन कत्वे कृते यत्तु तद्वार्तिकव्याख्यायां दुष्टं ध्यायतीत्याते श्चोप
सर्ग इति कप्रत्यय इति कैयटहरदत्ताद्यः तच्चिंत्यं अंतस्वरितानुरोधे नार्थानुरोधेन च ख्यात्यादिवत् कृतपरत्वे दर्शानुकरणात्पैव व्याख्येय एम०
त्वात् सर्वस्य द्वे इत्युपदेवः नोऽस्मान्मामवधीदिति त्नीपवरणस्थाना त्यः तच्चिंत्यं अंतस्वरितानुरोधे अपवर्जनं महतीत्यमरादह निश

वस्य दानेन ठत्वे तु प्रद्वेषप्रयुक्तं माभिचारिकायं गमत् तमेव तद्दिह्यात्यामिति दीक्षिताः वस्कृतं स्कृतं प्रकृतमंत्रे स्कृतया वार्त्तिके तु कमन्त्ययां तस्या
विध्यशक्यस्य प्रहरांणां प्रयुक्तं तेत्रादिनो भयपरत्वं संभवात्· अत एव येनासिकृत्य प्रहितो ह्यच्छेना स्मान्जिघांसयेत्याथर्वणमंत्रः संगच्छते इति वक्तृणाम
भिप्रायः आध्यानमाधीरिति व्युत्पत्त्या गुणगुणिनोरभेदोपचारात् आध्यं समाधेयमिति तत्पचोरमानाभावादुपेक्ष्यं तस्मात्कैयटमते स्वाध्यै इति भाष्यविरो
धश्छिन्नः अत्र वार्त्तिकं प्रथमलिंगग्रहणं च प्रयोजनं किं ह्युक्तमासा इति अयमर्थः यः शब्दः प्रथमं स्त्रीत्वविशिष्टमर्थमाह· पश्चात्तु मकारांतरेण
लिंगांतरविशिष्टं स्यात्तेनरपरः तस्येदानीमह्याख्यत्वादप्राप्ता नदीसंज्ञानेन विधीयते· कुमारीमिच्छति कुमारीयति· कुमारीवाचरति कुमारयति वा
ततः क्विप् अल्लोपयलोपौ कौलुप्तं न स्थानिवदिति यणभावः कुमार्यौ ब्राह्मणाः [illegible] तत्सुलोपः कुमार्यै ब्राह्मणाय आण्नद्याः इत्याट् नन्व
कैयटमते क्यच्क्विपोः प्रकृतिभूतस्य ङीवंतस्यापि नित्यस्त्रीत्वं नास्ति कुमारशब्दात् क्यजंतात्क्विपि नितिः यत्नेन कुमारीशब्देन त्रिलिंगेन स
मानाकारत्वादिति चेत् अर्थभेदेन शब्दभेदाश्रयणात्· अयं विशेषः कुमार्यौ कुमार्यः एत्र नेकाचइति यण् अमिशसि च कुमार्यं कुमा
र्यः प्रध्यं प्रध्य इतिवत्· नेयङ्गतिकारकपूर्वस्यैवेति निषेधः नहितिरपूर्वस्य नेत्यर्थात्· विशिष्टाभावस्य केवलेपि सत्वात्· कुमार्यै इत्यादौ स्त्री

२

सि०धा० लिंगवत्. हे कुमारि ब्राह्मणीत्यादि कुमारशब्दात् ङीबन्तस्य तु कुमारीशब्दस्य कुमारीः अग्रंतत्वान्न सुलोपः अनदीत्वान्न संबुद्धिह्रस्वः
वातप्रमीवत्. पत्नीशब्दात् पत्न्यौ पत्न्यः इत्यादि विग्रहः कुमारमात्मन इच्छंती ब्राह्मणी कुमारीरित्यत्र क्यच् तते पुंवद्रूपं हरदत्तमते तु लक्ष्मीव
त्. अमि शसि च परिणति विशेषः न देवं क्विब्वा स्यात्. लशे. खरकुटी ब्राह्मणाय. खरकुटीवेति इवार्थे कनो लुम्मनुष्ये इति लुप्. यद्यप्यत्र लुपि
युक्तवद्व्यक्तिवचने इति स्त्रीत्वमप्राप्तिं तथापि स्वाश्रयस्य पुंस्त्वस्य निवर्तनात् स्त्रीमात्रवृत्तित्वाभावात् नासावनदीसंज्ञेति केवट हरदत्तादयः दीक्षि
ताक्त एवं चंचाः पदे पत्या सेशसो न त्वापत्तिः तस्मात्स्त्रियुवेत्. खरकुटीचंचादिशब्दैः स्त्रीत्वविशिष्ट एव लौकिकः प्रमाणमभिधीयते इत्येव तत्त्वं ए
वं च लुपः प्रयोजनत्वेन गणनमपि चिंत्यमित्याहुः वस्तुतो युक्तवद्व्यक्तिवचने सामर्थ्याभ्युपगमेन लाभाभाव इति बोध्यं अतितत्रैः ब्राह्मणाय तंत्रीमतिक्रांतोऽत इ
ति तत्पुरुषः बहुः श्रेयस्यो ऽस्य बहुश्रेयसी ईयसो बहुव्रीहौ नेति ह्रस्वस्य ईयसश्चेति समासांतस्य कपो निषेधः एषां संबुद्धौ ह्रस्वः ङि. त्स्वश्रा
ङागमादिकं च नदीकार्यं अव्ययवत्स्त्रीविषयत्वादस्तित्वं पूर्वमेतत्रस्थारवृत्तो तत्रैव ज्ञाने दीसंज्ञा पश्चादुपजायमानेपि बहिरंगे लिंगांतरयोगे
निवर्तत इति श्रेयवस्त्रीत्वेनैवोपपत्तौ पूर्वत्तात्विक मनोरम्यमित्यर्थः वर्णसंज्ञापक्षे समुदायस्य नद्यंतत्वात्कार्यसिद्धिः तदंतस्य नदीसंज्ञा ए८०

पक्षे तु अङ्गाधिकारेण स्वच्छन्दं उत्तरपदस्येति वचनात्· अतितन्त्री बंधुरित्यत्रापि पूर्वपदस्यान्यथा विशेषणात् पूर्वपदान्तोदात्तत्वं किं कोरपि एवं स्या
त्येयं अत्राक्षेपवार्त्तिकं ङ्वङ्ः स्थाने प्रतिषेधे परस्थाने प्रतिषेधप्रसंगोवयवस्येयङ्वङ्स्थानत्वादिति· अवयवस्य स्त्रीविषयत्वात् समुदायस्य
नदीसंज्ञावत्स्त्रवयवस्येयङ्वङ्· स्थानत्वात् समुदायस्य परस्थाने स्यापि तन्त्रस्त्रेण नदीसंज्ञाप्रतिषेधः स्यात्· आध्यै व्रात्त्यपेइति इह त्वि
वयवे इयङ् प्रियेइति समुदाये त्वेरनेकाच इति यण्· अत्र सिद्धान्तमाह वार्त्तिककारः सिद्धं त्वंगरूपग्रहणाद्यस्याङ्गस्य इयुवौ तत्प्रतिषेधादिति·
अस्यार्थः अत्र विभ्रुधातुक्तगामिस्त्र इयङ्वङ्भाजमङ्गमाक्षिप्यते अङ्गाधिकारीयत्वात्· तेन यस्याङ्गस्येयङ्वङौ निर्दिश्येते तस्य नदीसंज्ञानि
षेधः आध्यै इत्यत्रचावयवस्याङ्गसंज्ञानास्ति समुदायस्य त्वियङ्वङ्स्थानत्वं नास्ति· यणा बाधादिति न दोषः एतदर्थमेव तत्रेत्थं स्थानग्र
हणं इयङ्वङोर्यदा सिद्धिः तिस्तदा प्रतिषेधोपपत्तिः स्यात्· यदा त्वपवादेन बाधस्तदा माभूदिति कुत्रेयङ्वङ्स्थानप्रवृत्तौ न स्त्रीवचनेइति वा
चने इति वाक्यान्तरं· अयं पदेग्रहणात्सिद्धमित्यस्यायमपवादः· क्वचिदियङ्वङ्स्थाना नो प्रवृत्तिरर्थान्तरसंक्रान्तिः तेषां स्त्रीवचनत्वसंज्ञा
न लिंगान्तरवचनेन नवशाशब्दस्य वचनौ वेत्यर्थः शाकघ्ने अतिशाकटये श्री लक्ष्म्याय श्रिये अतिश्रिये ब्राह्मणाय इह तु स्यादेव अतिश्रिये।

सि० धा० अतिस्त्रियै वा अतिस्त्रये इति भाष्यं नचैवं हि नित्यस्त्रीत्वेना स्त्रीलिंगत्वात् हरदत्तमते सत्वात् केयमेतेषि ङिति ह्रस्वश्च सत्र आख्यानानुवृत्तेस
कृतत्वात् एवं च सुधीस्त्वयं भ्रूनिलक्ष्यमिति च मूशब्दे ऽयुरूपद्वयं बोध्यं नि: कौशांबि: प्रमाणित्यत्र तु नदीसंज्ञाया मपिन विशेष: ह्रस्वादेशेन ना
द्याश्चप्रहारात् न संबुद्धि ह्रस्व: वर्णस्य नदीत्वात् स्मारक्वा त्वं तु शत्रुयाप्रयतनामाकाशस्यापि मधिकरणत्वस्याविवक्षणात् तदंतस्य नदीसंज्ञाप
क्षेपि सर्वे सर्वपदादेशा इति न्यायेन सर्वादेशत्वात् न चेच्छा नित्या ऽन्यथा: विशेषणात्तया पाल्यत्वप्रयोगनिषेधस्योक्तत्वात् ङिति ह्रस्वश्चेति विकल्प
स्कम्भत्वे वेति कौस्तुभ:॥ ॥नेयङुवङ्स्थानावस्त्री इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्त: स्त्रीशब्दं विना ख्यानं निरपवादप्रसक्ति:
हे श्री: हे भ्रू: अस्त्रीति किं हे स्त्रि नदीत्वात् संबुद्धि ह्रस्व: अथ कथं विमानना सुभ्रु कुत: पितुर्गृहे इति कालिदास: हा पितः क्वासि हे सुभ्रु वह्वेवं वि
लेलाप स इति भट्टि: मुकुलयति चेतत्र सर्वथा सुभ्रु रेवं इति भवभूति: प्रसूनना चशरासनेन स्वैकवंशाप्रभवं भ्रुवं च इति श्रीहर्षश्च
अत्राहु: प्रमाद एवेति हरदत्तादय: दुर्घटवृत्तिकारस्तु भूशब्दादप्राप्ति जाते इति सू: ङ: समासे उपसर्जने ह्रस्वेन ऊङ् तदंतस्य ङि नेस्य समुदाय एम०
भक्तत्वात् नोवङ्स्थानत्वमित्याह दीक्षितास्तु नेदं युक्तं प्रतिपदस्य भक्तताया प्रमाणाभावात् एकादेशस्यान्तवद्भावेन भ्रूशब्दावयवता भा

अप्यनयापात्ते· अंगाधिकारे तदुत्तरपदस्य स्त्र्याख्यनिर्विवादत्वया समुदायभक्तेप्युवङ्भवत्येव सुश्रुवौ वितायादीनां सर्वे संमतत्वादित्याहुः
सामान्येन पुंस्त्वमिति केचित्· यथासंभवं क्रियाविशेषणत्वमित्यन्ये॥ ॥वामि॥ पूर्वोक्तौ वामि नदीसंज्ञौ वा स्तः श्रीणां श्रियां भ्रूणां भ्रुवां अस्त्री
त्येव· स्त्रीणां द्वितीयैकवचनस्य तु नेह ग्रहः विशेषाभावात्॥ ॥ङिति ह्रस्वश्च॥ इयङुवङ्स्थानौ स्त्र्याख्यौ चयू नदीसंज्ञौ वा स्तः ङिति परे श्रियै श्रि
ये भ्रुवै भ्रुवे कृत्यै कृतये धेन्वै धेनवे नदीसंज्ञापक्षे आण्नद्या इत्याट् आटश्चेति वृद्धिः· अस्त्रीत्येव· स्त्रियै स्त्रीलिंगाविति किं अग्नये वायवे इह प्र
थमलिंगग्रहणाभावात् निःकौशांबिवदित्युक्तं अतिस्त्रिरित्यत्र तु विशेषः अतिस्त्रिया वितायै स्त्रियाः इति इयङ् स्वगोणात्वेपि· किंतु गुणाभावो
त्वनुद्भूः परत्वात्तु स बाध्यते क्लीबेन मात्र स्त्रीशब्दस्येयङ्· तद्बाधार्थं तां जसि चेति गुणः अतिस्त्रयः वाम्शसोः अतिस्त्रियं अतिस्त्रीं औटश
सोरियङ् आङो नास्त्रियां अतिस्त्रियाणा घेर्ङिति अतिस्त्रये इत्यादि ङसि ङसि अतिस्त्रियोः २ ह्रस्वेति नुट् अतिस्त्रीणां अच्च घेः अतिस्त्रौ ओकारे ङसि
नित्यं स्यादम्शसोस्तु विभाषया इयादेशो विनान्यत्र स्त्रियाः स्यादुपसर्जने इति कौस्तुभः क्लीबे नुम् अतिस्त्रिणी इत्यादि वारिवत्· स्त्रियां तु ङिति
ह्रस्वश्चेति संज्ञाविकल्पः नचास्त्रीति निषेधः इयङुवङ्स्थानयोरेव तेन विशेषणात्· पूर्वसूत्रेण तत्संबद्धत्वात्· ऋचोवस्त्रीभयविशेषणत्वे माना

सि० धा० भावात्· तेनातिस्त्रियै अतिस्त्र्यै ओत्वं बाधित्वा परत्वादियङ्· राम्· अतिस्त्रियां पक्षे अतिस्त्र्यौ इति अत्र वा विध्यर्थं स्यादेश्चेत्येव सूत्रणीयं ननु
नामि ङिति ह्रस्वश्चेति सूत्रद्वयं गौरवात्· तस्मात् सूत्रद्वयं सन्निपातपरिभाषाज्ञापनार्थं अजादित्वस्य नदीसंज्ञाप्रयोजकत्वे हि नदीसंज्ञानिमित्ती
कृत्य नुट् न स्यात् स्त्रीणामिति· आमो ऽजादित्वं व्याघातात् पत्रेरिति कैयटः॥ ॥शेषो घ्यसखि ह्रस्वौ याविदुतौ तदन्तं सखिभिन्नं अनदी
संज्ञं घिसंज्ञं स्यात् ह्रस्वे मानवे ह्रस्वौ किं ग्रामण्ये खलप्वे· एकं किं· मात्रे असखीति किं सख्ये अनदीसंज्ञं किं मत्यै· सुसखिरित्या दौ भवत्येव :स
मुदायस्य सखिशब्दभिन्नत्वात्· नचैतन्न चतदन्तविधिः विशेष्यसंबन्धाभावात्· ननु एवं सखी स्यत्रापि पत्ते पद्येति चेतिरकारलोपव्याख्यानवैयर्थ्यं
सवर्णदीर्घे विशेषाभावात्· न च अतिसखेरागच्छतीत्यत्र सवर्णदीर्घस्य पूर्वत्वं तन्महाबाधि संज्ञानिषेधः स्यादिति वाच्यं तत्प्रयोजनं सम
वः सत्यप्यंतवद्भावे समस्तस्य सखिशब्दादन्यत्वानपायेन निषेधतादवस्थ्यादिति मेवं सखी सख्यौ सख्यः इत्यादौ अत्र नङ्ग्लोपोऽवीर्णाप
लोपस्यावश्यकत्वात्· न च लिंगविशिष्टपरिभाषया दोषतादवस्थ्यं विभक्तौ लिंगविशिष्टाग्रहणात् पतिः समास एव पतिशब्दः स 
मास एव घिसंज्ञः भूपतये· नेह· पत्याप त्ये· समासे पतिशब्दस्यैव घिसंज्ञेति विपरीतनियमं वारयितुमेवकारः तेन द्रष्ठमुष्टिनेत्यादिसिद्धं इह

पतिर्गरुडे इत्यत्रापि घिसंज्ञत्वात्पूर्वनिपातनियमार्थं पृथक्कृतं ॥ अन्यथा ह्येषोघ्य सखिपतीत्यत्रैवावक्ष्यत वहुनूपूर्वस्यतु घिसंज्ञा सुसखिवत्सखिनाग
नरेंद्रेण स्त्रीवे चपतिनेयन्तौ सीतायाः पतयेनमः कृष्णस्यसखिरर्जुनः इत्यादिकंतुछांदसं आख्यानसंपत्तौ कर्मणि अत्रबहः लोक्षप्रयोगकत्वाच्चपर्युदासा
य्रहरांनेत्यन्ये वक्रोवावस्पतेरपीत्यादौ तत्पुरुषे कृतीति बहुलग्रहणाद्वलुक् एतेन दिवस्पते गृहदर्शिनार्सादितिनैषधंव्याख्यातं एवंवास्तोष्पति
रपि षष्ठ्याः पतीत्यादिनासत्वं श्रियः पतीत्यादिवरोयात्रत्रछंदसीमन्त्रवर्त्तनेपि पारस्करादित्वात्सुटू इतिकेचित् द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पति
गृहमेधाच्छ चेति सामान्यापेक्षज्ञापकादलुक् कस्कादित्वात्सत्वं इणः परस्यतु षत्वमित्यन्ये वाचस्पतिकेचित् द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्प
तिगृहमेधाच्छ चेति सामान्यापेक्षज्ञापकादलुक् कस्कादित्वात्सत्वं इणःपरस्यतु षत्वमित्यन्ये वाचस्पतिं विश्वकर्माणमूतये वास्तोष्पतेप्रतीत्यादौपृथक्पद
पाठो वैदिकानां ॥ ॥षष्ठीयुक्तश्छन्दसिवा पतिशब्दो घिसंज्ञः क्षेत्रस्य पतिना वयं इहवेति योगविभागः छंदसीत्यनुवर्त्तते सर्वेविधयश्छंदसि विकल्प्यन्त इ
त्यर्थः बहुलं छंदसीत्यादिकं प्रपंचार्थं ॥ ॥ह्रस्वं लघु चेतति चितीसंज्ञाने लघूपधगुणः नवह्रस्वप्रदेशेष्वपि लघुसंज्ञया व्यवहारः सुकरः सार्वधातुमित्यादौ ह्र
स्वान्तादौ तद्धितइति वत्वाभावापत्तेः गुरुसंज्ञया लघुसंज्ञाया वाधात् तस्मादेकसंज्ञाधिकारात् पूर्वमेव ह्रस्वसंज्ञारंभः यत्तुभाष्येतत्र ह्रस्वसंज्ञायादीर्घप्लुतसंज्ञे

सि०धा० भ्यां समावेशमाशंक्य एकसंज्ञाधिकारेऽयं प्रयोगः करिष्यत इत्युक्तं तत्र चकारादिनाऽस्य संज्ञाया गुरुलघुसमावेशः करिष्यत इत्यभिप्रायं पदं अत एव
तत्र पक्षांतरोपन्यास इति बोध्यं ॥ ॥संयोगे गुरु ॥ ह्रस्वं गुरुसंज्ञं संयोगे परे शिक्षा भिक्षा गुरोश्च हल इत्यप्रत्ययः ॥ ॥दीर्घं च ॥ गुरुसंज्ञं स्यात् ईहांचक्रे इजा
देश्च गुरुमत इत्याम् ॥ ॥यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽंगं ॥ यस्मात्प्रत्ययो विहितस्तदादिः शब्दः प्रत्यये परेऽंगसंज्ञः स्यात् रामेण प्रत्यय इति किम् स्त्रीइ
यती इदम्शब्दाद्वतुपो वस्य घादेशः प्रकृतेरीशभावः यस्येति चेति तल्लोपः स्त्रीशब्दात्सुशब्दस्य तल्लोपस्य च विधिः स्त्रीतित्रंगसंज्ञा स्याद्भसंज्ञा चेति संज्ञा
द्वयनिमित्तो यस्येति लोपः स्यात् न चेदमादेशलोपस्याभीयत्वादसिद्धत्वमिति प्रत्ययपरत्वाभावः भाभादसिद्धत्वमिति केचिदभ्युपगमात् नापि स्थानि
वद्भावः पदांतरनिरपेक्षपदसंस्कारपक्षे स्त्रीशब्दस्येकारस्यानादिष्टादचः पूर्वत्वाभावात् विधिशब्दस्यापि तदेव प्रयोजनं तस्मिन्सति परशब्दस्याप्यध्या
हारप्रसंगात् यत्तु भोष्यद्दधि अधुनेति प्रत्युदाहृतं तन्न अधुनेति प्रत्ययो निपात्यते इदमस्थ्लोप इति पक्षे इदमोऽश्भावो धुनाच प्रत्यय इति पक्षे तदसंभवा १५०
दिति कैयटः नेत्र विधिग्रहणेऽपि स्त्रीशब्दात्सुप्रत्ययविधानाद्दोषतादवस्थ्यं श्रूणा सत्याय स्माद्यः प्रत्ययो विहितस्तस्मिन्नेव प्रत्यये परे तदंगसंज्ञमित्याश्रय
णात् तेन स्त्री अपश्यतीत्यत्र नेयङ् अशब्दादपि पूर्वं इत्येकादेशस्य परादिवद्भावे न प्रत्ययत्वेऽपि क्रमः स्त्रीशब्दादविहितत्वात् एकत्रात्र तेनेयं प्रत्यये डिलोपेव

अशब्दस्य स्वतः प्रत्ययत्वेपि न दोषः । उप्रत्ययेपस्थाने तेरेव विहितत्वे न स्त्रीशब्दप्रकृतिकत्वाभावात् । प्रत्ययप्रापिते पावान्नृवौ भागस्त्रावतोंगसं
ज्ञा न तु प्रत्ययोत्पत्तिवेलायां प्राप्तः प्रकृतित्वेन तन्मात्रस्येत्यर्थः । तेनैव दामिव दिष्णामीत्यादौ विकरणान्तस्यांगसंज्ञायां अतो दीर्घो य
ञीति दीर्घः न चारंभसामर्थ्यं यथवधयगतो यङ्लुकि लोपो व्योरिति यलोपश्च पापामिथापावइत्यादौ चरितार्थत्वात् । कुंडानि यद
७३ नुमृपरादिलदानुपिवेतिदीर्घः दधीनीत्यादौ कारांतत्वाभावात्पूर्वांतपक्षे सामानीत्यादि न सिध्यति । यदा त्वेकोत्वपक्षः स्नेहं वृत्रयाजनमा
दिग्रहणस्य । पूर्वांतपक्षस्येवेच्छाधीनत्वाद्दप्रयोजनमेतत् । प्रत्यये किं प्रत्ययविशिष्टस्यैतत्पाधिकस्यवामाभूत् । तथासति वव्रश्चेत्युरद
त्वस्य परनिमित्तत्वं न लभ्येत । तथा चेच्छाधीनत्वभ्रागप्रवृत्त्या वकारस्य संप्रसारणं स्यात् । अल्विधित्वेन स्थानिवद्भावे शब्दस्य प्रवृत्ते र्दुर्व
चत्वात् । यत्तु प्रकृत्यादिप्रत्ययेंगमित्येव लाघवादकुर्यात् प्रकृतिमात्रस्य तु कर्त्राकारके इत्यादौ गुपदेशिवद्भावातिसिध्यति । तन्चिंत्यं अ
गातिरिक्तप्रकृतेर्दुर्वचत्वादात्माश्रयापत्तेः । नहि प्रत्ययाव्यवहितत्वं पूर्वे वर्जितं प्रकृतित्वं स्त्रीं इयतीत्यादावाप्तिमाप्तेः । वहुगु इत्यादावव्याप्तेश्च ।
स्कुं चेदमवराइत्यार्हतानि विस्तरः । इहयस्मात्प्रत्ययविधिस्तदादिप्रत्यये इति योगविभागः । परिभाषेयं प्रत्यये ग्रहणमारोपयस्मात्स्यविधिस्तदादि

ग्रहणं भवतीत्यर्थः । न च धर्माणां पदाध्याहारात्स्वराणां सोपस्कारत्वात् । तेनञ्जित्यादिर्नित्समित्यादौ यत्रप्रत्ययः समस्यानिर्दिश्यते तत्र तदादेर्ग्रहणा
सि०धा० त् । देवदत्तो गार्ग्य इत्यादौ संघातस्याप्रदानत्वं न भवति । किंनु गार्ग्यशब्दस्यैव सुप आत्मनः क्यजित्यत्राप्यते न तदादिनियमः सुपा कर्मणा तु तदा
देर्वा विशेषणात्तदंतविधिः तेन महांतं पुत्रमिच्छतीत्यादौ समुदायात्क्यन्न समुदायस्यासुबंतत्वात् अवयवस्य सापेक्षत्वात् असामर्थ्या
त् देवदत्तश्चिकीर्षतीत्यत्र संघातस्य न धातुसंज्ञा देवदत्तो गार्ग्य इति संघातस्य न प्रातिपदिकसंज्ञा देवदत्तो गार्ग्यायण इति संघातान्न तद्धि
तोत्पत्तिः । अन्यथा ह्यधिकसप्तौ संघातस्यस्यातां पूर्वस्य सुपो लुक् प्र नेत्स्मात्स्यपप्रत्ययः सोपस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति परिभाषा वाचनि
कीति सिद्धं यत्र एवं कार्यित्वेनाश्रीयते तत्र तदादेः कार्यं भवति यत्र तु प्रत्ययांतः संघातोऽन्याश्रीयते तत्र तदादेः प्रत्ययांतस्य ग्रहणमित्यर्थः एके त्वित्युत्त
क्तयोगविभागलभ्यते तत्परिभाषायां तदंतस्येत्यंशस्य निर्मूलत्वप्रसंगः । तदंतशब्दस्याक्रान्तपादानात्तदसाङ्कः । तत्रेति एकदेशानुमतिद्वारा पूर्वाचार्योक्त
स्यांशांतरस्यापि संग्रहसिद्धेः ज्ञापकस्थले एवं तथात्वमित्यत्र बीजाभावात् । इष्टसिद्ध्यर्थतया ज्ञापकत्वं योगविभागेपि तुल्यत्वात् । नन्वेवं अवंतस्येन कु राम०
त्वसिद्धं तस्मात् । उदके विशीर्णमित्यत्र तदित्यादौ व गतिकारकाधिकेन समासो न स्यादिति चेन्न । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषा

पानात्सिद्धेः प्रयोजनं समासमध्ये विधिस्वरः । सांकुटिनं व्यावक्रोशीत्यादौ अणिनुण् इति सोपसर्गाद्दण् । यदि तु कुटिस्त्रिस्मात् द्रास्यात्र दात्तस्यैवा
दिवृद्धिः स्यात्तद्दाहरणम् । आगम्यते स्मेति कर्मणि क्तः । गतिस्वरेणाद्युदात्ते आगतशब्दः । नत्रोह्रशब्दस्य स्त्रोकात्तिकेति समासः । पंचम्यास्तोकादिभ्य इत्यलु
क् इह प्रथमस्वरेणान्तोदात्तत्वं न त्वसमासस्वरेणासिद्धिः । गतिरनन्तरः कर्मोपपदके क्तान्ते परे अव्यवहितो गतिः प्रकृत्येति आद्युदात्ते स्यात् तद्वाधत्वात् तथा
चेहरादागतशब्दो मध्योदात्तः स्यात् सत्यां तु परिभाषायां गतिकारकोपपदात्कृदिति कृत्स्वरापवादं कृत्स्वरं बाधित्वा थाथघञ्क्ताजवित्रकाणामिति अ
न्तोदात्तत्वं क्तग्रहणेन गतिकारकपूर्वस्यापि ग्रहणात् । नचैवं थाथादिस्वरस्यापि गतिस्वरोपवाद इति वाच्यं गतेरनन्तरस्य क्तान्तस्य यदन्तोदात्तत्वं तस्यैव सोप
वादः कारकोत्तरस्य थाथादिस्वर एव भवतीति सिद्धान्तात् । नन्वागतशब्दस्याद्युदात्तत्वेपि हरशब्देन समासे समासान्तोदात्तत्वमेव भविष्य
तीति चेन्न अत्र कैयटाशयः अन्तार्थं कृतेनया परिभाषया हरेडन्तरपदप्रकृतिस्वरेणाद्युदात्ते आगतशब्दे प्राप्ते सगतेरपि क्तान्तत्वात् तस्य छान्तरेशाप्तादी
तिस्वरस्य बाधकस्यापि बाधेन थाथादिस्वरो भवतीति वाभिप्रेतं । न तु स्वरश्वासन्तथा सिद्धमुदाहरणमिति । अस्यां च गतिरनन्तर इत्यनन्तरग्रहणं ज्ञापकं तो
दि अन्यत्र कृतमित्यत्र अभिशब्दस्य प्रकृतिस्वरो माभूदित्येतदर्थं यदीयं न स्यात्तर्हि उद्धतशब्दस्य क्तान्तत्वाभावात् क्तान्ते उत्तरपदेऽनन्तरे परे गतेः स्वरो वि

धीयमानो नैव प्राप्नोतीति तद्वैयर्थ्यं स्यात् ॥ ॥ सुप्तिङन्तं पदं सुबन्तं तिङन्तं च पदसंज्ञं स्यात् आलरणाः सुपुः यद्यपि प्रत्ययग्रहणे तदन्तग्रहणात् सिद्धं
तथापि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनार्थमन्तग्रहणं तेन कुमारी चासौ गौरितरा चेति विग्रहे कुमारगौरितरेति सिद्धं तरबन्तस्य
घसंज्ञायां कुमारीशब्दस्य पुंवद्भावं परत्वाद्बाधित्वा घरूपेति ह्रस्व एव स्यात् । गौरीशब्दस्य च तरपि परे ह्रस्वो न स्यात् । नन्वेवं सनाद्यन्ता इत्यत्रान्तग्रहणं क
र्तमिति गौरवं अन्यथा सनादेरेव धातुसंज्ञायां तदादेरेवांगत्वात् ततः एवमट् स्यात् कृत्तद्धितेति सूत्रे च केवलानामेव कृत्तद्धितानां प्रातिपदिकसंज्ञा स्यात्
ततश्च भिद्धि ध्रु इत्यादौ न स्यात् । नाप्यर्थवत्सूत्रेण सिद्धिः अधातुरिति निषेधात् । नापि प्रत्ययलक्षणेन प्रत्ययनिमित्तमन्यस्य यत्किंचित्कार्यं विधीयते तत्रैव
तत्र प्रवृत्तेः प्रत्ययस्यैव यत्कार्यं तस्य तेन दुर्लभत्वात् । असतो वचनशतेनापि कार्यित्वानुपपत्तेः एवं औपगव इत्यत्र केवलस्य तद्धितस्य प्रातिपदिकसं
ज्ञायां षष्ठ्याः प्रातिपदिकान्तर्गतत्वाल्लुङ्न स्यादिति चेत् । अत्र भाष्यं सनाद्यन्ता इत्यत्र कृते मेवान्तग्रहणं कृत्तद्धितेत्यत्रान्तग्रहणमनुवर्त्तते कृत्तद्धि
तान्तं चार्थवत् । न केवलाः कृत्तद्धिताश्चेति स्यादेतत् । यद्यर्थवत्वाप्पारमार्थिकी स्यात् कृत्तद्धितान्तस्यापि नास्ति पदस्य वाक्यस्यैव तथात्वात् । अथ प्रक्रि 
यादशायां अन्वयव्यतिरेकाभ्यां कल्पितार्थवत्ता तदा कृत्तद्धितयोरप्यस्तीति चेत् । अत्राहुः अर्थवद्ग्रहणानुवृत्तिसामर्थ्यात् लौकिकार्थप्रत्यासत्त्यो

ऽमित्यत्र तु तेरोपोर्थः अनया तेषु लक्ष्यते सम्राज्ञी पतत्रिति प्रकृतिप्रत्ययोर्मिलित्वायद्यर्थे बोधकत्वं स इति यावत् ॥ ॥ न क्ये क्यचि ङि क्यचिच्च नान्तमेव प
दसंज्ञं नियमार्थमिदं सुबन्तात ङस्यन्तेर्वक्ष्यमाणत्वात् राज्ञे वाचरति राजायते नलोपः प्रातिपदिकान्तस्येति नलोपः क्यषन्तं तु भाष्यमते नोदाहर
णं नायेन कारान्ताद्विधीयते इति भाष्योक्तेः लोहितादिडाज्भ्यः क्यषिति तद्विधानाच्च नान्तमेवेति किं वाच्यति स्रुचीयति पदत्वाभावान्न कुत्वादि
न च विपरीतनियमापत्तिः न ङिसम्बुद्ध्योरिति नलोपः प्रातिपदिकान्तस्येति च ज्ञापकात् अन्यथा नलोपः क्ये इत्येवावस्यात् ॥ ॥ सिति च सिति प्रत्यये परे पूर्वं पदसं
ज्ञं भसंज्ञापवादः भवतष्ठक्छसौ भवदीयं ऊर्णायुश्च ऋतः ऋतोरण् ऋत्वियः ओर्गुण इति गुणाभावः ॥ ॥ स्वादिष्वसर्वनामस्थाने कप्रत्ययावधिषु स
र्वनामस्थानभिन्नेषु स्वादिषु परेषु पूर्वं पदसंज्ञं राजभ्यां सर्वनामस्थाने तु राजानौ इत्यादि न त्वेवं राजा इत्यत्र नलोपो न स्यात् अपदलक्षणो न सर्वनामस्थान
परत्वात् अङ्के निषेधे न पदसंज्ञा प्रादुर्लभत्वात् इति चेत् नात्र सर्वनामस्थान इत्यस्य पर्युदासत्वात् सुप्तिङन्तमिति प्राप्तपदसंज्ञाया बाधाभावात् अत्रैवाप्रसक्त्य स्ति
प्रतिषिद्ध्यासती बाधितेमिति स्वादिष्विति हि प्राप्तिः किं पूर्वस्याः प्राप्तेर्बाधिका स्वयं निषेधस्याबाधा तत्र प्राप्तिबाधस्यानुचितत्वात् अप्राप्यनुमानस्य बाधत्वा
त् अपवादविषयपरिहारेणोत्सर्गस्य प्रवृत्तानान्त्स्वादिष्विस्य सर्वनामस्थाने शेषवत्सभावात् तस्याः सुप्तिङन्तमित्येतद्बाधकत्वानुपपत्तेः अत एव

इत्याइत्र नाप्स्वीति प्रतिषेधविषये पूर्वसवर्णदीर्घस्याप्रवृत्त्यभावे वद्धिरेवीत्यस्य प्रवृत्तिः पक्षा· स्वादिष्विति योगो विभज्यते स्वादिषु पूर्वं पदसंज्ञं भवति सर्वनामस्था
सि० धा० नेऽयचीत्यस्मात्पयोगः असर्वनामस्थाने इत्यत्र अनुवर्तते न अयचीत्यनेन संबध्यते यकारादि सर्वनामस्थानं नास्तीति यकारग्रहणं उत्तरार्थं तथा चाऽजादौ सर्वना
मस्थाने परसंज्ञानिषेधो न तु हलादौ इति राजोत्यत्र पदसंज्ञा सिद्धिः· ततो भसंज्ञायां न भः सर्वनामस्थाने नैव संबंधः १८ सर्वनामस्थाने यकारादावजादौ
व पूर्वं भसंज्ञमित्यर्थः ननु स्वावपि पदमिति व्याख्याने भदंकरो विशेषो रित्यत्र पूर्वस्यान्ततरस्य दुर्जोरित्यस्य संज्ञाः तत्र पदान्तं यग्रहणे नापि दुर्वारत्वात· मेवं का क्व
पदयोरन्तयोः परे च नस्यात् द्विधा नास्त्रे तु वाक्सविसर्जनीयोऽन्त्यो नत्वोकारः भवद्भ्यो धारयद्भ्य इत्यत्र नयोरुपसंख्यानं तसौ मत्वर्थे इति भसंज्ञाप्राप्तौ पदसं
ज्ञाविधानं शतृप्रत्यये व्यत्ययेन भवतेः शपो लुक् उवङ् ततो मतुप् ॥ ॥ एवमिमं यकारो च वे [illegible] स्वादिष्व सर्वनामस्थाने षु कक्रयात्यवधि
षु परतः पूर्वं भसंज्ञं पदसंज्ञापवादः गार्ग्यः यस्येति लोपः राज्ञः अल्लोपोऽनः भसंज्ञाया मन्तरपदलोपे षष्ठः प्रतिषेधः अत्र कंपितः षड्गुलिदत्तः षडिकः व
कचो मध्यमात्पूर्व इत्यनुकंपायां ठच् ठाजादावूर्ध्वं द्वितीयादचः इति इट् गुलिशब्दस्य लोपः यस्येति चेति अकारलोपः तत्र तु स्वावधिकपा भसंज्ञया प्रत्ययलक्षणेन सुवंतत्वा राम०
त्प्राप्ताया पदसंज्ञाया बाधात् [illegible] न स्वादित्यारंभः सिद्धमेव स्थानिवत्वात् भसंज्ञायां विधीयमानायां अकारलोपस्य स्थानिवद्भावो दकारान्तमेन भसंज्ञा

नीतिच्छिन्नाबाधिकत्वात्पदसंज्ञयोर्नबाध्यबाधकभावः नचनपदांतेतिएच्छानिवृत्तनिषेधः परांतस्यविधेयत्वेनतत्प्रवृत्तेः कानिसंतिकौस्तस्त्वपत्रष
दांतयोर्यवयोर्विधेयत्वात् इहतुजश्चस्यपूर्वमेवप्रवृत्तत्वात् ननेवंअनुकंपितोवाग्यायीदत्तोवाचिकइत्यत्रापिकुत्वंस्यात् मैवं सिद्धमेकाक्षरपूर्वपदा
नामुत्तरपदलोपवचनात् तस्यचहलजातैश्चात्वात्नस्थानिवद्भावइतितल्लायिकयाभसंज्ञयाबाधात् षषष्ठाजादिचिवचनादित्यकारस्यपृथग्लो
पात्रदोषः नभोंगिरोमनुषांवत्युपसंख्यानं नभस्वत् अंगिरस्वत् मनुष्वत्पदसंज्ञापांतुरुत्वंस्यात्नषत्वं अपदांतस्येतिवचनात् वृषन्वस्वश्वा
योः वृषरावसुः वृषन्नस्वश्वयोः वृषराववसुः वृषणाश्वस्यपवित्रः पदांतस्येतिनिषेधास्मत्वंनस्यात् नलोपश्चस्यात् नचभत्वादल्लोपापत्तिः अंगस
ज्ञायाअभावात् तस्यांबाधकाभावात् उपसंख्यानान्नेतानिछंदोविषयाणीतिकेचित्॥ ॥तसौमत्वर्थे तांतसांतौभसंज्ञौमत्वर्थेप्रत्यये तडित्वा
नयशस्वी नभयशस्वानित्यत्रनस्यादितिवाच्यमतुपोपिमत्वर्थवर्तित्वात् देवदत्तशालापांआलत्रणाभ्यानीयंतामित्युक्तेहिशालत्रणात्वस्यदेवदत्तव
त्तित्वेनस्यापिकार्यान्वयः उद्देश्यतावच्छेदकरूपावच्छिन्नत्वात् देवदत्तस्यशालाभिधानमित्युक्तेतुनेशालात्वस्यदेवदत्तावृत्तित्वात् अतएवथ
र्वेचिद्विनस्फाअश्वाविनितिप्रतिषेधःसंगच्छते॥ ॥अयस्मयादीनिछंदसि संज्ञाद्वयाधिकारात्यथासंभवंतदुभयप्रदर्शनेयासाधुत्वविधानं उभ

सि॰टी॰ संज्ञान्यपीति वार्त्तिकात् मयट्। तयोर्माघायामित्यत्र ऽभ्च्छंदसि कथं मयडित्याशंक्यात्र स्यादेव निपातादिति न्यासकृत् घच ऽभ्च्छंदसीतीत्यत्र अत्र मतुत्रामा
वः ससखुभासन्त्र्रक्ततागरोन पदत्वात्कुत्वं मत्वाङ्गत्वाभावः कुत्वविध्येकवाक्यतापत्त्रेपदत्वस्य मत्वेन बाधात्॥ ॥बहुषु बहुवचनं बहुत्वे एतत्स्यात्
स्युः दाराः इत्यादौ तु अवयवावयवविशिष्टबहुत्वस्यावयविन्यारोपः प्रकृत्यर्थवृत्तित्वस्य तावतापि निर्वाहात्। जलपरमाणुबव्याप इति प्रयोगस्तु गुण
नाद्यपेतिवर्द्धमानादयः नच घटे पि घटाः इत्यापत्तिः तत्रारोपे प्रमाणाभावात्। दारा इत्यादौ तु बहुवचनं तत्त्वे नियमप्रतिपादकं कोषवृद्धव्यवहारादेर्निया
मकत्वात्॥ ॥द्व्येकयोर्द्विवचनैकवचने बतौ इत्तः द्व्येकशब्दौ भावप्रधानौ अन्यथा बहुत्वे चेनामतः पर्वसत्वेपि बहुपदं बहुत्वपरं -- -- तद्बहुत्वस्य ध
र्मे आरोपाद्बहुवचनं अनेकपर्यायसंख्यात्वेपवहुत्वस्य ग्रहणं यथा स्यात्। नच द्वे वै पुल्यवाचिनो बहुशब्दस्य ग्रहणवारणार्थं तेन बहुः सूप इत्यादौ न। अत्र श्लो
कवार्त्तिकं सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां प्रसिद्धो नियमः प्रकृतेषु वा कर्मणि द्वितीयेत्यादेः प्रकरणस्य संख्याशास्त्रस्य चैकवाक्यत्वेन
सहैकवाक्यतया विधायकत्वं एकस्मिन् कर्मणीत्येवं गुणगुणिनोः सामानाधिकरण्येन संबंधे संख्याकर्मादयः सुपामर्था भवंति। संख्याशा १८०
स्त्रस्य तिबादिशाक्येनाप्येकवाक्यत्वं अनन्वय संख्या चैवेत्यस्य दृष्टगुणपादानं वृतीयचरणेनार्थनियमउक्तः चतुर्थेन प्रकृतार्थाविक्षः प्रत्ययनि

प्रसङ्गः। तुल्यजातीयस्य नियमेन व्यावर्त्तनाद्द्वयेभ्यः स्वादीनामुत्पत्तिः एकत्व एवैकवचनमिति नियमेन द्वित्वादेर्व्यावर्त्तनात्। भवतु वा प्रत्ययानां स-
मान्येन नियमः तथापि अपादानसम्प्रदानेत्यादिलोपविधानाज्ज्ञापकाद्द्व्येभ्यः स्वादिसिद्धिरतः परत्वाद्वा गुणाद्युपपत्तिरिति भाष्यं॥ ॥६॥ इति श्री सिद्धान्तसुधानि-
धौ प्रथमस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकं समाप्तं॥ कारके। अधिकारोयं प्रथमार्थे सप्तमी प्रतिपदमावादस्य त्वा विधानाच्च सप्तमीति निर्देशा-
नुपपत्तेः कारकसंज्ञायाः स्वविधेयत्वात्। न त्वेवं एकसंज्ञाधिकारादपादानादिसंज्ञाभिः समावेशो न स्यात् अत्राऽह ध्रुवमपाये इति योगविभागो वक्ष्य-
वस्य कारकसंज्ञाविधायनेन ततोऽपादानमिति कारकग्रहणं च कमपायेत्यादिमनुवर्त्तते कारकं सदपादानसंज्ञमित्यर्थः अनुवृत्तिं विनापि वचनसामर्थ्यात्त-
पर्यायेण लभ्येऽनुवृत्तिसामर्थ्यात्समावेशसिद्धिः एवं सम्प्रदानादिष्वपि व्याख्येयं तेनान्तर्वेश्मन्यादेरधिकरणत्वात् सप्तमी गतिकारकोपपदात्कृदित्यत्र स्वपदस्व-
रूपान्तरस्य स्वसिद्धः स्थाय्यादिस्तत्रेऽप्रसादवर्णे राजत्वे वेपादानात्। नयोपपदलोदेवत्वसिद्धिः सदा मंगलवेविशिष्टसप्तमी निर्दिष्टत्वाभावादिति प्र-
यहतः अत्रैनैयायिकाः विभक्त्यर्थद्वारा क्रियान्वयित्वं क्रियानिमित्तं कारकं राज्ञः पुरुषो गच्छतीत्यत्र राज्ञो द्वारा गमनप्रयोजकस्य राज्ञो द्वारतायां क्रि-
यान्वयीति। साक्षात्क्रियान्वयित्वं न ग्रामादेः तदन्वितान्वयित्वं राज्ञोपीति अतो विभक्त्यर्थद्वारेति। संबंधस्य तु न क्रियापानान्वयः संबंधश्च कारकबोधे

सिं॰सु॰ नामजन्योपस्थितेर्हेतुत्वात्॰ अतएवसंबंधिनोनकारकत्वं नचापादानेसंभवदनेचाव्याप्तिः तयोःक्रियानिमित्तत्वाभावादितिवाच्यं पारस्वत्वफलकत्यागविशे
षोहिदानं तत्रविशेषणतापरस्वत्वांशहेतुतयासंप्रदानस्यकारकत्वात्॰ स्वीकारस्यस्वत्वहेतुत्वात्॰ विभागफलकेत्वेत्यर्थः संयोगफलिकाचक्रियापतनं
तत्रविभागांशहेतुतयापादानस्यकारकत्वात् यथाग्रसंयोगनिमित्ततयासंयोगफलकक्रियात्मकगमननिमित्तत्वंग्रामस्येत्याहुः वैयाकरणास्तु अ
पादानाद्यन्यतमत्वसंकेतविशेषसंबंधेनकारकशब्दोवाकारकत्वं तदुक्तं समानाद्यभिधीयंतेसत्ताद्यैर्विशेषिता संज्ञाशब्दस्वरूपंवायत्पायेस्वतत्वादि
भिरिति तन्नक्रियाकारकत्वं तन्नक्रियान्यतमत्वादिसंकेतविशेषस्थानेवोच्यत्वसंबंधेनेतिवाच्यं तन्नक्रियाकारकस्यसंकेताभावात्॰ नचाकर्मकक्रियायांक
र्मघटितमन्यतमत्वं कथमितिवाच्यं तन्निर्मुक्तस्यैववाच्यत्वात्॰ अन्वर्थाचेयंसंज्ञा करोतीतिकारकमिति॰ तेनक्रियानन्वयिनोनसंज्ञा ननुब्राह्मणस्य
पुत्रंपंथानंपृच्छतीत्यत्रपुत्रोपिकथंकारकं प्रष्टुःप्रश्नकारकत्वेपियंप्रतिप्रश्नस्तस्यजनकत्वायोगात्॰ सत्यं जिज्ञासाविषयविषयकं हिवाक्यंप्रश्नः जिज्ञासावक्ता
नविषयकेच्छा तदेकदेशोज्ञानेतस्यजनकत्वात्॰ अपादानादिवत्॰ नन्वंकुरोजायतइत्यादौकथंकारकत्वं पूर्वमसत्वादितिचेत नबुद्धिव्यवस्थापितस्यार्थस्य राम॰
क्रियाकारकत्वस्वीकारात्॰ केचित्तुतत्रांकुरादिपदंतदुपादाननिरूढलाक्षणिकं तथाचांकुरएवपवर्ततइत्यत्र नकूलव्यापारवानितिधीरित्याहुः स्यादेतत्॰ वृक्षस्य

पर्णं पततीत्यत्र वृक्षस्य कारकतापत्तिः वृक्षात्पततीत्यत्र कारकतायाः क्लृप्तत्वात्· अथात्र संबन्धित्वेनैव वृक्षस्य विवक्षा: अत एव वृक्षस्य गतस्यापि
पर्णे शाखा वा स्थे वृक्षस्य पर्णं पततीति न प्रवृक्षात्यागे पततीति प्रयोग इति चेत्· तथापि ग्रामस्य पुत्रं पंथानं पृच्छतीत्यत्र ग्रामस्य कर्मसंज्ञा
स्यात्· अकथितं चेत्यत्र कथितशब्दस्य प्रधानगौणविलत्वात्· मैवं करोतीति कारकमित्यन्वर्थसंज्ञाश्रयणात्· नन्वेवं कारकशब्दस्य कर्तृपदस्य
मानार्थकत्वात्करणं कारकं अधिकरणं कारकमित्याद्यनुपपत्तेः करणादीनां कर्तृपरतंत्रत्वात्· अत्र वार्त्तिकं सिद्धं तु प्रतिकारकं क्रियाभेदा
त्पचादीनां करणाधिकरणयोः कर्तृभाव इति· अस्यार्थः स्वव्यापारे सर्वेषां स्वातंत्र्यात्तदनुष्ठानद्वारेण प्रधानक्रियायामुपयोगात्कर्तृत्वं तत्रियावपि
स्वव्यापारस्यानिर्वर्त्तनानन्यपारतंत्र्यावस्थायामप्यनिवृत्तं कारकत्वं तथा हि अधिश्रयणोदकावसेवनतंडुलावपनैधोपकर्षणक्रियाः प्र
धानस्य कर्तुर्व्यापारः तत्र धातोर्थत्वविवक्षायां देवदत्तस्य कर्तृत्वं देवदत्तः पचतीति· संभवनं धारणं वाधिकरणस्य व्यापारः तस्य पुरस्कारे स्थाली
पचतीति· आर्द्रिक्तिनैर्ज्वलनं काष्ठानां तत्र काष्ठानि पचंतीति· एवं देवदत्तस्य कर्तृत्वं देवदत्तः पचतीति छिनत्तीत्यादौ योज्यं· नन्वेवं अपादा
ने ग्रामे ग्रामस्य आगच्छतीति प्रयोगाभावात्तत्र कर्तृत्वं नास्तीति चेत् वलाहकाद्विद्योतते वलाहको विद्योतते इति दर्शनात्· विद्युतो वलाहकस्य च

११

सि०धा भेदस्य विवक्षितत्वात् । तदुक्तं पर्यायेण करणाधिकरणयोः कर्तृत्वं निदर्शितं अपादानादीनां कर्तृत्वनिदर्शनायेति । अयमर्थः स्वव्या
पारे उच्छानमन्तरेण प्रधानक्रियायामुपयोगाभावात् करणादिन्यायेनापादानाविपि तदस्त्येव । ग्रामश्चोपातीति नु न प्रयोगः । अर्थात्
ग्रामादपादानव्यापारानवसायात् । एवं ब्राह्मणाय ददातीत्यर्थे ब्राह्मणो ददातीति न प्रयोगः । शब्दशक्तिस्वाभाव्याद्व्यापारानसंस्पर्शानयोर्व्यापारे धातोर्नवृ
त्तिः । वृक्षान्नेत्रपानदाम्यावधिभावेनावस्थानं व्यापारः संप्रदानस्याप्यनुमननादिलक्षणः प्रतीयमानोऽपि व्यापारः कारकव्यपदेशस्य निबंधनं । यथा प्रवि
मापिं ग्रामेति इति केपटः । अत्रायं सिद्धान्तः । यद्यपि स्वव्यापारे सर्वेषां स्वातंत्र्यं तथापि उद्भूतस्वातंत्र्यविवक्षायां षष्ठी लीयवर्ति उद्भूतपारतंत्र्यविवक्षायां तु अन्यथा
वा सत्यपि स्वातंत्र्ये स्वकार्येन प्रयुक्ते । यथा राजसित्रियो न दृतयो गिरवकार्यमस्मात् नारभेते । यद्यपि सामर्थ्यान्तः क्रियोत्पादः सर्वेषां साम्यं तथापि करणा
दीनां कर्त्रधीनप्रवृत्तिकत्वात् स्वच्छमागन्यतः । शक्तिलाभात् करणाद्यभावेऽप्यास्वेशोते इत्यादौ केवलस्य कर्तुर्दर्शनात् । कर्त्रादिनां च करणादीनामदर्शनात् क
र्तुः प्राधान्यं तस्मात्साध्यत्वे न सर्वकारकाणां साधारण्ये क्रियायां सर्वेषां कर्तृत्वं अवान्तरव्यापारविवक्षायां तु करणादित्वं । यथा मातापित्रोः पयोस्तारने कर्तृत्वं राम०
भेदविवक्षायां तु अयमस्यारयमस्माज्जनयतीति अधिकरणत्वमपादानत्वं च करणाद्यवस्थायां तु न कर्तृसंज्ञा । स्वतंत्रः कर्तेत्यत्र कारकत्वादेव स्वातंत्र्ये

लब्धे पुनः स्वातंत्र्ये कर्तृः स्वतः स्वातंत्र्यवत एव कर्तृसंज्ञा न तु पारतंत्र्ये स्वातंत्र्योपमवत इति नियमार्थत्वात्· कारकसंज्ञानुवृत्त्या स्थितत्वाविधमा
नमनुद्भूतत्वेनाविवक्षितमपि स्वातंत्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात् प्रवर्तते यत्र वश्यकर्तृणां निमित्तनिमित्तिभावेन युगपद्विव
क्षा तत्र संज्ञानां विप्रतिषेध उच्यते यथा धनुषा विध्यतीत्यत्र धनुषो यापविवक्षां विना साधकतमत्वाभावात् संज्ञाद्वयप्रसंगे परत्वात्करण
संज्ञा असिः छिनत्तीति स्वतो व साधकतमत्वे स्वातंत्र्यस्य विवक्षितत्वात्· परत्वात्कर्तृसंज्ञा तैक्ष्ण्यादीनां करणत्वे तेषां त्यक्त्वा विवक्षा
यामात्मनः करणत्वं विवक्षावशेन तैक्ष्ण्यादीनां कर्तृत्वकरणत्वयोर्व्यवस्थापनात्· तस्मात्कर्तृत्वादिकं विवक्षानिपतं इति सिद्धं तदुक्तं वाक्यपदी
ये वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति· गौः ४ स्वर्गं प्रति गोरेव न तु कं विप्रस्य गोरिति वदितव्ये सैं
व्रत्रप कर्त्रेव इति नियमो नास्तीत्यर्थः भाष्ये तु पक्षांतरमप्युक्तं कारकपदमत्र क्रियापरं करोतीति कर्तृकर्मव्यपदेशानिति व्युत्पत्तेः विषयत्वे
न वाक्यमधिकारः क्रियायां विषये पदं ध्रुवमित्यादिरर्थः अत एव कारके इति निर्देशोपि संगच्छते निर्धारणस्यानेकाश्रयत्वात्तदर्थत्वे वहु
वचनापत्तेः कारकादित्यस्य तयोरित्यादेस्तु कारकशब्दस्य स्वरितत्वात्तदधिकारो यान्ना नामपादानत्वादीनां ग्रहणमिति कैयटः॥ ॥ध्रुव

सि०धा० मपायेऽपादानं अपायो विश्लेषः तस्मिन्साध्ये यद्ध्रुवमवधिभूतं तत्तदपादानसंज्ञं ध्रुगतिस्थैर्ययोः कुटादिः अस्मात्पचाद्यच् ध्रुवः स्थैर्ये इति
पाठे तद्गुणपर्यालोचकः तथाच क्रियानाश्रयत्वं तदर्थः तथाच यन्निष्ठविभागजनकत्वेन यन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वेन चया
क्रियाविवक्षिता तत्त्वं तत्क्रियापादानत्वं पञ्चम्यर्थस्तदभिधेयपदं तेन वृक्षाद्वृक्षे पततीत्यत्र समभ्यन्तपदाभिधेयपत्रविशिष्टस्य तापाद
नत्वं वृक्षात्पर्णं पततीत्यत्र विभागोऽन्योन्याभावप्रतियोगितावच्छेदकत्वं च पञ्चम्यर्थः तिङर्थ आश्रयः तस्य पतनक्रियायां वृत्तित्वेनान्वयः
पञ्चम्यर्थयोश्च यथाक्रमं जनकत्वस्वरूपसंबन्धाभ्यां विभागजनकत्वं पञ्चम्यर्थ इति तार्किकरीत्या तु तेषामपि स्वरूपसंबन्धेनैवान्वयः पर्णस्या
मेदेनाश्रये विभागान्योन्याभावयोर्वृत्तित्वेन वृक्षस्यान्वयः वृक्षवृत्तिविभागजनकं वृक्षवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकं च पर्ण
स्वरूपाश्रयवृत्तिपतनमिति शाब्दधीः यथोक्तपतनाश्रयं पर्णमिति पर्णविशेष्यकबोधस्तार्किकाणां विशेषः केचित्तु विभागः परस
मवेतत्वं च पञ्चम्यास्त्वर्थः तथाच वृक्षवृत्तिविभागजनकं वृक्षभिन्नसमवेतं च यत्पतनं तदाश्रयः पर्णमिति धीः वस्तुतस्तु पञ्चम्यर्थतावच्छे
दकमेदे वृक्षादेः प्रकृत्यर्थस्य प्रतियोगितासम्बन्धेनान्वयः उत प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगितायाः प्रकृत्यर्थतावच्छेदकाश्रयप्रयानं राम०

त्व क्रियात्वावच्छिन्नप्रतियोगितया वा नाद्यः पर्णात्पर्णं पततीत्यापत्तेः स्वस्मिन्नपि क्रियात्वावच्छिन्नप्रतियोगिताकभेदसत्त्वात् न द्वितीयः वृक्षात्पततीत्य
नापत्तेः द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदस्य पर्णादावसत्त्वात् अन्योन्यवृत्तिधर्मस्यैव भेदप्रतियोगितावच्छेदकत्वात् न तृतीयः वृक्षात्पतति
पर्णे पर्णात्पर्णं पततीति प्रसङ्गात् पतनस्य तत्पर्णवृत्तिविभागजनकत्वात् प्रकृत्यर्थतावच्छेदकपर्णत्वाश्रयपतदन्यपर्णं घटक्रियात्वावच्छिन्न
प्रतियोगिताकभेदवत्पतनाश्रयपर्णे हानित्वाद्वेति चेत् सत्यं याप्यक्रियाविभागेनान्वेति तथा क्रियात्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रकृ
त्यर्थस्य भेदान्वयात् इत्याहुः पञ्चम्या हानत्वादिकमर्थः एवेति तन्न तद्रूपेण बोधाभावात् अखण्डोपाधेरनङ्गीकाराच्च प्रकृतमनुसरामः धा
वतोऽश्वात्पततीत्यादौ अश्वादेः क्रियावत्त्वेपि प्रकृतिपञ्चम्यर्थविभागजनकत्वान्वयिनी या क्रिया पातरूपा तद्वत्त्वमेवेत्येव एवं परस्परस्मान्मेषावपसरत
इत्यादौ तदुक्तं वाक्यपदीये अपाये यदुदासीनं चलं वा यदि वाचलं ध्रुवमेवातदावेशात्तदपादानमुच्यते पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ त
स्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते मेषान्तरक्रियापेक्षमव
धित्वं पृथक्पृथक् मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् स्पन्दजन्यविभागाश्रयत्वेन वृक्षात्पर्णं स्पन्दत इति वारणाय क्रियेति सकर्मकधातूप

सि० धा० रं संबंधात्वर्थतानवच्छेदकत्वेन विभागविशेषणात्वक्षेत्रजतीत्यादौ नातिव्याप्तिः ननु विभागाविशिष्टक्रियायास्त्यजत्यर्थतया विभागे विभागविशि
ष्टक्रियाजनकत्वाभावान्न दोष इति चेत् न अथ संयोगावच्छिन्नक्रियायाः पतत्यर्थतया वृक्षात्पततीत्यादेरप्यसिद्धेः तदुपलक्षितव्यापारजनकत्वस्य विभा
गे उभयत्र साम्यादिति वृक्षाद्विभजते इत्यादौ स्वरूपसंबंधरूपमवधित्वं पंचम्यर्थः अपाये विभागे ध्रुवमवधिभूतमित्यपि सूत्रार्थः वृक्षनिष्ठावधिता
निरूपकविभागाश्रयः पर्णमिति धीर्न च स्वस्माद्विभजते इत्यस्यापत्तिः स्वत्वनियोगिकत्वविशिष्टसंयोगस्यैव स्वावधिकत्वविशिष्टविभागस्यापि स्वा
वृत्तित्वादिति तार्किकाः इदं च त्रिविधं तदुक्तं निर्दिष्टविषयं किंचिदुपात्तविषयं तथा अपेक्षितक्रियं चेति त्रिधापादानमुच्यते यत्र धातुना साक्षा
दुक्तिर्निर्दिश्यते· तदाद्यं यथाश्वात्पततीत्यादि· यत्र क्रिया धात्वंतरार्थविशिष्टं स्वार्थमाह तद्द्वितीयं वलाहकाद्विद्योतत इति· अत्र निःसरण
विशिष्टद्योतनं द्युतेरर्थः वलाहकान्निःसृत्य द्योतत इत्यर्थः एतेन कुसूलात्पचतीति व्याख्यातं आदाय पचतीत्यर्थात्· तृतीयं तु यत्रत्यक्षसिद्धमा
गमनं इति धात्वपत्ते पृच्छति कुतो भवानिति· पाटलिपुत्रादिति चोत्तरयति· अत्र केचित् परोः सत्यपि तच्चरणात्स्य साकांक्षत्वेन पाटलिपुत्रादागमित्येव त
दाद इति तत्तीयोदाहरणं अत्र हि क्रियावाचिपदं न श्रूयते केवलं प्रतीयते यद्यप्यत्र पंचमी विभक्ते इति सूत्रेण विभक्तेः वेति निर्धारणात्र येपंचमी एन०

तथापि भाष्ये पचेः साम्यं गतत्वान्स एतस्य प्रयुक्तोऽस्मुक्तं अस्यार्थः तैः सौकौमार्यकैः पाटलिपुत्रकाणां समगुणत्वात्तया साम्यं ज्ञातवान्सप्रकर्षी
प्रयोगणवतः पृथक्कृत्वोदाहृतं प्रयुक्त इति · तथा च ग्रन्थे मया पौरस्त्येव सिद्धमित्याहुः तेषामयमाशयः कुशलात्संचेतीत्यस्मात्कुतो भवानित्यस्यैवैषमे
मानाभावः कुशलाद्दायद्ववति कुतो भवानागत इति चोभयत्रापि क्रियाप्रयोगस्यापि संभवाच्च · न हि तत्रादानविशिष्टः पाको धात्वर्थः किंतु आ
संपादेवादानं गम्यते पाकस्तावत्सेकमात्रं तस्मादपेक्षितक्रियापदत्रक्रियापदप्रयोगाभावः सार्वत्रिकः किंतु गम्यमानैव क्रियातेद्दि इति प्रक्तं स्याद्
तत्साधीतत्रैवमित्यत्र कथमपादानत्वं परत्वात्स्वार्थस्य कर्तृत्वप्रसंगात् · तदुक्तं अपादानमुत्तराणि इति · अन्यथास्पज्यमानस्य कर्मसंज्ञान
स्यात् · कर्तृव्यापारव्याप्यत्वाभावात् · ततश्च हीयते हीन इति कर्मणि लकारो निष्ठा च न स्यात् · न च कर्मकर्तर्ययं लकारः जहातेः कर्तृस्थक्रियत्वा
त् · अत्राहुः कर्मकर्तर्येवायं जहातेरपगमनार्थत्वात् · सा च वस्तु उपघातादिना देवदत्तस्य तत्सामर्थ्याचरणं यदा तु वस्तु उपघातादिना स्वयमेवा
पगच्छति तदा कर्मकर्तृत्वमिति · नन्वत्र क्वचिदग्रहणसामर्थ्यं न चेय ग्रामादागच्छतीत्यादावेत्यत्र कारणावारणार्थं ध्रुवमपायेऽपादानमित्यत्र क्रियापि ध्रु
वग्रहणोपरत्वात्करस्यासंज्ञाप्रवृत्तिवद्क्रियमाणोपि प्रवृत्तिसंभवात् · नापि ग्रामादागच्छत्के सर्पात्पतति नोदकं भक्ते इत्यत्र कं स्वघात्रीवारणार्थं

सि॰धा॰ अधिकरणसंज्ञपातत्वाभावात्· यद्यपि कंसपाश्वागमनसाधनत्वं नास्ति भुजौ तु साधनं भवत्येव तत्र परत्वादधिकरणसंज्ञेत्याकरादिस्तत्रोक्तं
तथापि वक्तृविवक्षया त्रागमनं प्रधानं न तु दंगं तु भोजनं शब्दानुविपरीतगुणप्रधानभावश्रयः तदुक्तं चंक्रमणमानो धीच्छात्रजपंस्थ्यं क्रमणं कुह्रा नादर्थ
स्याविशेषे विशब्दो दूरः प्रतीपत इति तत्रभुजेः साधनत्वात्तद्द्वारेणागमनस्यापि साधनमिति शकोध्वपतिः शाहं प्राधान्यमादाय तत्रापुकैः वृसंज्ञेति परिस
रमाख्यार्थ इति कैयटः अत्र भाष्यं वृक्षस्य पर्णं पतीत्यत्र वृक्षस्वासत्यार्थत इति· नन्वत्र कारकत्वं नास्ति अपायाभावाच्च· सत्येवावधावपायो भवतीत्युः
क्तत्वात्· गतिर्विनात्वदधिनानापायः तिकथ्यत इति स्वीकारात्· अत्र केचित्· सुखानत्वात् पूर्वस्त्रस्वगोक्तत्वाद्यापमर्थो भाष्यकारेणोक्त इति· अ
न्येतु सतीह ध्रुवग्रहणो विशिष्टोपायो लभ्यते· असति तु तस्मिन्नपातमात्रस्य लोकेऽपायत्वेन प्रसिद्धत्वात्· कारकाधिकारानपेक्षयापायस्य सङ्ग्रह
णमिति कैयटः जुगुप्साविरामप्रमादार्थानामुपसंख्यानं अधर्माज्जुगुप्सते विषयत्वं पंचम्यानिन्दा धातोरर्थः अधर्मं निन्दतीत्यर्थः अधर्माद्वि एम॰
रमति पंचम्याविषयत्वं धातोः करणं न तत्तं ज्ञावृजीवमकरणं अर्थः विषयत्वस्य करणेन करणेनान्वयः अधर्मविबोधक कर्तृपदाभावेपि न स
तिरित्याह्नः वक्तृ तत्वकृतिर्धेसस्य धात्वर्थ कृतेश्च सावच्छिन्नप्रतियोगितासमानाधिकरण्यकालिको भपसंबंधाप्रतियोगितावच्छेदकः

कमेरः प्रतियोगित्वं चेत्युभयसंबंधेन ध्वंसेऽन्वयः तथा च सामानाधिकरण्यं कालिकविशेषणतात्वेत्युभयसंबंधेन कृतिमात्रस्यैव द्वितीयोऽर्थः धर्म
विषयककृतिध्वंसवदाचानित्यादिधीः अधर्मविषयककृत्यंतरप्रागभावसमानकालीनतादृशध्वंसवारणाय भिन्नांतं तत्रापि अधिकरणकृते·
कालिकेन तन्निष्ठितध्वंसे सत्त्वात्सामानाधिकरण्येति अतीतकृतिसामानाधिकरण्यस्य तादृशकृतिध्वंसेपि सत्त्वात्कालिकेति बोध्यं ध
र्मात्प्रमाद्यति· पंचम्या विषयत्वे· धातोरनवधानेत्यिः· आश्रयत्वमर्थः धर्मविषयकावधानाभावाश्रय इत्यर्थः अत्र भाष्ये गुरुस्मादपो
त्रगुरुस्मात्पूर्विकां निवृत्तौ वर्त्तते अगोविन्दकलितमपादानत्वमस्त्येव· अनिष्टसाधनताज्ञानेन बुद्ध्यंतं प्राप्य निवृत्तेः अनिष्टसाधनत्वप्र
कारतानिरूपितविशेष्यतासंबंधेन ज्ञानवत्त्वरूपापादानस्याश्वादेः सत्त्वात्· न चैवं गौणत्वापत्तिः कारकप्रकरणे गौणस्यापि ग्रह
णात्· अपायादिपदानां स्वरितत्वात्तेन गौणमुख्यन्यायाभावादिति॥ ॥ भीत्रार्थानां भयहेतुः भयार्थानां त्राणार्थानां च प्रयोगे भ
यहेतुरपादानं चोराद्बिभेति उद्विजते त्रायते रक्षति इत्यादि· जन्यत्वं पंचम्यर्थः वीरजन्यभयाश्रय इति धीः त्राणं भयाभावो धात्वर्थः व्या
पार आरब्धानार्थः शत्रुजन्यभयाभावानुकूलव्यापारवानित्यर्थः हेतुपंचम्या सिद्धौ इदं अपंचार्थं भयहेतुग्रहणमस्य स्पष्टार्थं चैत्रादेः परत्वात्के

१५

सि०धा० त्रेसंज्ञाप्रवृत्तेः ४ कस्माद्बिभेति देवाश्च जातरोषस्य संयुगे इति रामायणे कस्य संयुगे इत्यन्वयः ॥ ॥पराजेरसोढः ॥ अध्ययनात्पराजयते अत्र धा
तोरसहिष्णुत्वं नेह द्वेषविशेषोऽभिभवाश्रयत्वेनानेन अध्ययनं न सहत इति विवरणात् अध्ययनविषयकाभिभवाश्रयत्वज्ञानवानित्यर्थः श
त्रून्पराजयते इत्यत्र परत्वात्कर्मसंज्ञा अभिभवतीत्यर्थः ५ तेनासोढग्रहणं स्पष्टार्थं ॥ ॥वारणार्थानामीप्सितः वारणार्थानां प्रयोगे क्रियया प्राप्तुमि
ष्टोऽर्थोऽपादानं स्यात् कूपादन्धं वारयति ननु कूपस्यानिवार्यत्वे निवारकाभ्यामभ्यामप्यनीप्सितत्वात्कथमपादानसंज्ञेति चेत् आहुः प्रवृत्तिविघा
तो वारणमिति पक्षे वारकनिष्ठव्यापारजन्यप्रवृत्तिघातरूपफलशालित्वेनान्धादेरेवेप्सितत्वेऽपि संकोचे मानाभावेन वारणशब्दवाच्यकोटौ
प्रवृत्तेरपि प्रवेशात् वार्यमाणनिष्ठगमनव्यापारजन्यसंयोगरूपफलशालित्वेन कूपादेरपीप्सितत्वं विभागानुकूलव्यापारो वारणमिति पक्षे
तु विभागस्योभयनिष्ठत्वेन तच्छालित्वान्निवार्यनिवारकयोर्द्वयोरपि स्पष्टमेवेप्सितत्वमिति तद्धि संयोगवारणस्थले कूपे यः संयोगस्तेनानुत्पत्त्या
तच्छालित्वस्य वक्तुमशक्यत्वात् एतेन विभागोऽपि व्याख्यातः अंधात्कूपं वारयतीत्यस्यापि प्रसंगाच्च यत्तु संयोगस्यैवाभावात्सिद्धविभागप्रतिपाल एम०
नमात्रेण फलत्वमिति तदपि न संयोगाभावे गुणविशेषात्मकविभागस्याप्यनुत्पत्तेः पूर्वसिद्धविभागान्तरस्य फलत्वोक्तौ तु यत्र तेषुक्तौ पूर्व

कूपविभागोपि न ज्ञातस्तत्रोक्तप्रयोगानापत्तेश्च नचसंयोगात्यंताभावरूप एवात्र विभागो विवक्षणीयः सत्यपि कूपपाते उक्तप्रयोगादर्शनात्. ना
वेसंयोगस्याव्याप्यवृत्तितया कूपसंयोगसत्वेपि तदत्यंताभावसत्वान्न विरोध इतिवाच्यं प्रतियोगिसमानाधिकरणसंयोगात्यंताभावोद्देशेन वा
रणानुकूलव्यापारस्य केनाप्यनवच्छेदनात्. तस्य सत्वत एव सत्वात्. अन्यथांधकूपसंयोगानुकूलव्यापारवत्यपि कूपादंधं वारयतीति प्रयोगप्र
संगादिति दिक्. तस्मादंधस्य कूपाधःसंयोगाभाव इतीच्छापूर्वकत्वाधारणस्यांधप्रतियोगिककूपाधोदेशसंयोगाभावविषयकत्वादिच्छायाः
सीयाः भावनिष्ठविशेष्यतानिरूपितप्रतियोगित्वसंसर्गावच्छिन्नसंयोगनिष्ठप्रकारतानिरूपितानुयोगित्वसंसर्गावच्छिन्नप्रकारताशालित्वेनरूप
मेवेप्सितत्वमाद्यं अतोंधकूपसंयोगाप्रसिद्धावपि न क्षतिः उक्तेच्छायास्तत्रापि सत्वात्. अत्रयं चेम्यान्धः संयोगानुकूलक्रियानुपं पतनं द्वि
तीयायाधात्वर्थव्यापारान्वितं पतनं यातोर्विरोधिव्यापारोर्थः तथा चांधवृत्तिकूपनिष्ठाधःसंयोगानुकूलक्रियाविरोधिव्यापारविषयककृतिमानि
तिबोधः एवं पत्रे कूपे पतनमप्रसिद्धं तत्रोक्तप्रयोगः साधुरेवेत्येके अन्ये तु धातोरभावानुकूलव्यापारोर्थः पंचम्याहृतित्वं द्वितीयाया धात्वर्थतावच्छेदकाभा
वान्वितं प्रतियोगित्वमनुयोगित्वं वा अभावश्च कूपादिपदसमभिव्याहारात् पतनादिजन्याधःसंयोगादिनासंबंधेन कूपहेत्वंधप्रतियोगिकाभावः

सि० धा० नुकूलव्यापारविषयकफलवानिति धीः एवं सविषान्नमित्रैवारयतीत्यादौ यत्र मित्रस्य विषान्नभोजनमप्रसिद्धं तत्र भोजनादिसंबंधेन सविषा
न्नवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयकफलवानिति धीरित्याहुः केचित्तु पतनाभावप्रकारकेच्छापूर्वकपतनाभावानुकूलो व्यापारः प्र
कृते वारणं पंचम्यर्थः कर्मत्वं द्वितीयार्थः कर्तृत्वं पतनविशेषणतानिरूपितप्रकारतासंबंधेन इच्छायामन्वेति कूपपतनादेः क्वचिदप्रसिद्धत्वेपि तादृशे
च्छासत्त्वान्न दोषः कूपकर्मकत्वेनांधकर्तृकत्वेन च पतनाभावेच्छा तत्पूर्वकपतनाभावानुकूलो यो व्यापारस्तद्विषयकं कृतिमानिति वाक्यार्थः ए
वं सविषान्नादित्यादौ भोजनाभावेच्छापूर्वकभोजनाभावानुकूलो व्यापारो वारणं अन्यत्सर्वं पूर्ववदित्याहुः अर्थं तु क्रमभयत्रार्थधातोः पतने द्विती
ये भोजने उभयत्राभावानुकूलव्यापारस्त्वार्थः पंचम्याः आद्येऽवच्छिन्नत्वं द्वितीये कर्मत्वं उभयत्रैव द्वितीयार्थः द्वितीयायाः कर्तृत्वमर्थः धात्वर्थपत
नादेरधिकरणत्वेन धात्वर्थतावच्छेदकेऽभावेन्वयः द्वितीयावच्छिन्नस्य पंचम्यर्थद्वितीयार्थोभयस्याभावप्रतियोगित्वेनान्वयोऽत्र्यन्वयित्वे वैचित्र्यात्
तथा च पतनसामान्ये यः कूपावच्छिन्नत्वांधकर्तृकत्वोभयाभाववस्तदनुकूलव्यापारविषयकफलवान् द्वितीये भोजनसामान्ये यः सविषान्नक राम०
र्मकत्व मित्रकर्तृकत्वोभयाभाववस्तदनुकूलव्यापारविषयकफलवानिति धीः अत्राकांशं न परस्परतिघटत्वैत्रौवेत्यादौ द्वितीयया विषयित्वेन सत्याया

घटादिवृत्तित्वं धित्वं च गृह्यते धातुना लौकिकविषयित्वावच्छिन्नप्रत्यक्षं तथा च लौकिकप्रत्यक्षसामान्ये य आकाशविषयकत्वघटवृत्ति
त्वोभयाभाववत्त्वनिरूपको घटः इत्यर्थः आकाशविषयकचाक्षुषोपनीतभानेऽपि लौकिकविषयित्वावच्छेदेन आकाशविषयकत्वे वृत्तित्वोभ
याभावोऽस्त्येव स्वरूपसम्बन्धस्थलेऽन्यत्रापीत्याहुः ॥ ॥ अन्तर्द्धौ येनादर्शनमिच्छति यत्समवेतप्रत्यक्षविषयत्वाभावमात्मन इष्यते तदपादानं उ
पाध्यायादन्तर्धत्ते शिष्यः अत्र स्वप्रत्यक्षाभावेच्छापूर्वकतदनुकूलसन्निकर्षाभावानुकूलव्यापारो धात्वर्थः पञ्चम्यर्थो वृत्तित्वं तस्य स्वप्रत्य
क्षाभावेऽन्वयः उपाध्यायवृत्तिर्यः स्वप्रत्यक्षाभावस्तदिच्छापूर्वकः प्रत्यक्षानुकूलसन्निकर्षाभावानुकूलव्यापारे धात्वर्थः पञ्चम्यर्थो वृत्तित्वं तस्य
स्वप्रत्यक्षाभावेऽन्वयः उपाध्यायवृत्तिर्यः स्वप्रत्यक्षाभावस्तदिच्छापूर्वकः प्रत्यक्षानुकूलसन्निकर्षाभावानुकूलव्यापारः शिष्यवृत्तिरिति धीः इच्छा
निवेशात्सत्यपि चाक्षुषे न क्षतिः ॥ ॥ आख्यातोपयोगे उपयोगो नियमपूर्वकमध्ययनं तत्रैव कर्तापादानं उपाध्यायादधीते अध्ययनं तदुच्चा
रितशब्दप्रयोज्यशब्दानुसंधानं पञ्चम्यर्थो वृत्तित्वं उपाध्यायवृत्तिपदुच्चारणजन्यशब्दप्रयोज्यशब्दानुसंधानं इति धीः इदमपि भाष्ये प्रत्या
ख्यातं कर्मणापादानत्वेनैव सिद्धेः तदुक्तं यद्यपक्रामति किं नात्यन्तमपक्रामति संततत्वात् अथवा ज्योतिर्वज्ज्ञानानि भवन्तीति आख्या

सि० धा० तं च कैयटेन संततत्वादिति । शब्दस्य व्यंजकाध्वनयस्तूपाध्यायेनोत्पाद्यमाना भिन्ना अपि सादृश्यात्तत्वेनाध्यवसीयमानाः श्रोतुः पुनः पु
नः श्रोत्रपथं गच्छंतो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यंजयंतीत्यर्थः । अथवेति यथा ज्वालारूपं ज्योतिरविच्छेदेनोत्पद्यमानं सा
दृश्यात्तत्वेनाध्यवसीयमानं संततं तथैवोपाध्यायज्ञानानि भिन्नानि शब्दरूपतामापाद्यमानानि संततानीत्युच्यते ज्ञानस्य शब्दरूपापत्ति
र्निदर्शनमत्र भाष्यकारस्य । तथा चोक्तं वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थित इतीति ॥ ॥ जनि
कर्तुः प्रकृतिः । जायमानस्य हेतुरपादानसंज्ञः । पुत्रात्प्रमोदो जायते । ब्रह्मणः प्रजाः प्रजायंते । जनीत्यर्थग्रहणं । अंगादंगात्संभवसि । जनेरि
जनिधीसम्पाभिराणा जनिवध्योश्चेति न वृद्धिः । शेषषष्ठ्या समासः । यद्यकर्तरि चेति निषेधस्यास्तस्यैव ज्ञापकादनित्यत्वं इदमपि प्रत्याख्यातं
तथा हि गोमयाद्वृश्चिको जायते गोलोमाविलोमभ्यो दूर्वा जायंते अत्र अपक्रमणं गोरणं लोके हि यद्यस्मादुत्पद्यते तत्तस्मान्निर्गच्छतीत्युच्यते
वैशेषिकादिमते तु परमाण्वादिसमवेतं कारणेभ्यः पृथग्देशं कार्यमुत्पद्यत इति नास्त्यपक्रमः । सांख्यमते त्वाविर्भावितरोभावलक्षणजन्मना एम०
शस्य परिणामाभ्युपगमात्तथा । संततत्वोत्पादितमपक्रामतीति भाष्यं अविच्छेदादित्यर्थः । यथा विलाद्दीर्घभोगो भोगी निःक्रामत्रप्यविच्छेद

तत्रोपलम्भते तथाहर्त्ता अपि तत्स्यर्थे इति केचित्। अत्रा वैतत्वंदिकाकारः विभागजनपापक्रमतास्यावधावे वा पक्रामतो न प्रतीतिः इहतु
प्रकृतत्वे रूपमपक्रमणां तद्वधौ प्रकृतस्य प्रतीतिरङ्गीक्रियत एव तत्र्थे वानुभवात्। ननु प्रकृतत्वं कथं अपादानपंचम्यर्थ इति चेत् न वक्ता
त्यतीत्यादौ वृक्षाद्यवधिकविभागप्रतीत्या विभागस्यैव कपालाद्घटइत्यादौ कपालाद्यवधिकप्रकृततोत्पत्त्या प्रकृतत्वे स्याप्यपादानश
हेन वक्तुं शक्यत्वात्। तथा चेदं भाष्यतात्पर्यं अव्यवहितोत्तरक्षणसंबंधोप्यपादानपशाहार्थः तदेकदेशोऽव्यवहितोत्तरत्वेन निरूपकरूपक
रूपस्याप्यवधेर्ध्रुवपदेन वाच्यत्वात्। कारणसमूहस्य तदवधित्वेपि समूहसमूहिनोरभेदोपचारात्कारणमात्रेपि तत्संभवः यद्यप्यन्यथासिद्ध
स्याप्युक्तावधित्वमस्ति तथाप्यनन्यथासिद्धत्वस्यापि निवेशात् दण्डरूपाद्घटइत्यादेर्नोपपत्तिः दण्डाद्घटो जायते इत्यादौ घटप्रागन्यथासिद्धदण्डघटि
तोपः समूहस्याव्यवहितोत्तरक्षणसंबंधाभिन्नापाठत्वात्तित्वान्यघटः दण्डाद्घट इत्यादौ जायत इत्यादिक्रियाध्याहारावश्यकत्वे तु तादृशाव्यव
हितोत्तरत्वमेव पंचम्यर्थः तस्यैव धात्वर्थघटकेऽत्पत्त्यादिपदार्थलाभसंभवात्। वस्तुतः प्रकृतत्वमेव पंचम्यर्थः तस्यैवापादानपदेन तन्निरूपकस्य ध्रुव
पदेन चोक्तिसंभवात्। अस्ति च घटादावपि वनदुःसत्ताद्यवधि दण्डादिप्रकृतत्वमिति दण्डाद्घट उत्पद्यते दण्डाद्घटइत्यस्य च प्रामाण्यं कपटादिवाक्यं

सि०धा० तुसमाधानांतरामिप्रायं निःक्रामणविभागानुकूलव्यापारो सित्तिकालावच्छिन्नः विभागपूर्वं स्थूलकालव्यापिव्यापारोत्पत्तिकालप्र
दर्शनापदीर्घमोगइति· तथाच विभागोत्पत्तेः अपक्रमणस्य स्वरूपक्रमणस्योत्तरकालमेव लोमादेर्दृढादेः अत्यपूर्वं उत्पत्त्यादिकाले तु तत्क्षा
स्त्येव· वस्तुगध संयोगात्· उत्पत्तिक्षणे च लोमादेर्दृढघस्तीति परोक्षधीस्तु पूर्वोक्तरीत्यैव समाधेया यत्तु भोगिनोऽवच्छेदेन विलास
योगरूपापक्रमणस्य सत्त्वेपि मूलावच्छेदेन विलसंयोगाद्यथा विले उपलब्धिस्तथा दृढादेः स्वपरिणामिलोमादिभागस्वेव स्यान्ते या
प्रतीयमानस्यापि लोमादिभागांतरावच्छेदेन लोमादिसंबंधाभावरूपापक्रमणमिति कश्चित् वाक्यार्थ इति तत्र वृक्षावस्थितिकाले
चलत्त्वपि पत्रादौ वृक्षाद्वलती त्याद्यप्रयोगाद् वृक्षादिसंयोगाद्यसमानकालीनस्यैव वृक्षादिसंयोगाभावादेरपायपदार्थत्वमाविलादि
संयोगाद्यसमानकालीनस्य विलादिसंयोगाभावादेरपायपदार्थत्वमावादित्याहुः॥ ॥भुवःप्रभवः॥ भूकर्तुः प्रभवः प्राश्वते हिमवतो गंगा प्रभवति
भवनमत्र वहिःसंयोगः वहिःपदार्थो हिमवद्वृत्तिजंबूद्वीपभूमिः संयोगार्धसकालीनत्वं पंचम्यर्थः स च वहिःसंयोगत्वव्यापकविशेषणतासंबंधे ८०
न वहिःसंयोगे न्वेति· आश्रयत्वं तिङर्थः हिमवत्संयोगध्वंसकालीनहिमवद्वृत्तिजंबूद्वीपभूमिसंयोगाश्रयो गंगेति धीः अपायात्प्रभवति गंगेत्य

प्रयोगात् बहिः संयोगत्वव्यापकसंबंधनिवेशः प्रयागमित्यत्र जंबूद्वीपभूमिगंगासंयोगत्वे गंगाद्वारादिभूमिगंगासंयोगे कल्पादिकालव्याप्तिः। न तु प्रयागगंगासंयोगध्वंसकालीनत्वमिति तद्वारणे हिमवद्भिन्नभूमिगंगासंयोगतावच्छेदेन तु हिमवद्गंगासंयोगध्वंसकालीनत्वमस्त्येवेति न दोषः। अस्येतत्कं प्रयोगवारणाय प्राथमिकबहिःसंयोगः। पंचम्यर्थः बहिःपदार्थेऽन्वयेऽ प्राथम्यं संयोगध्वंसाव्यवहितोत्तरक्षणावच्छिन्नत्वं हिमवत्संयोगध्वं-सांव्यवहितोत्तरक्षणावच्छिन्नपृथिवीसंयोगाश्रयत्ववती गंगेति धीरित्याहुः। इदमपि प्रमत्ताख्यानं आ मानाः प्रादुर्भवंतीति भगवद्भक्तो ४ एतेनान्यान्य-याप्याख्यानायत्तेनेत्यादिश्रीहर्षादिप्रयोगा व्याख्याताः ॥ अत्र वदंति। कथंचिदुक्तप्रयोगाणां समर्थनेऽपि मुख्यार्थपुरस्कारेण षष्ठी स्यात्। न ट-स्यप्रगतोऽतीतिवत्। क्रियानुकूलव्यापारांशेन येयाध्याययोरविशेषात्। अनभिधानं च वेलास्वेमाश्रित्य प्रत्याख्यानं तु न मनोरमं सत्त्वात्र भाष्यादि-उक्तं च एवं जुगुप्सेति वार्त्तिकमप्यावश्यकं एवं च अकथं भयहेतुरसोऽहमित्यादिसंज्ञिनिर्देशोऽपि सार्थकः परत्वात्तत्र संज्ञाप्रवृत्तावपि शेषत्वविवक्षायां न मा-पाणामश्रीपादित्यादिवत्षष्ठ्याद्यैतेयात्रापादानसंज्ञावारणार्थत्वात्। इति। अत्र भाष्यार्थविरोधः उपाध्यायेष्वधीनेष्वाते भयहेतावित्यादिष्य-तद्दत्प्रयत्नक्रमशक्यत्वादिति बहुश्रुतैर्विचारणीयं तदेतत्सर्वमभिसंधायास्मत्पितृचरणैरुक्तं अवधित्ववदपादानं अवधित्वं च प्रकृतधात्व

सि०धा० र्थप्रयुक्तकर्तृकर्मोभयगतसंबंधनिवृत्तिमात्रं अश्वात्पततीति देवदत्त इत्यत्र प्रकृतधात्वर्थः पतनं तत्प्रयुक्ता देवदत्तरूपस्य कर्तुः संयोगनिवृत्तिस्त्वेन ता
दानेऽश्वोऽपादानं परस्परस्मान्मेषावपसरत इत्यत्रापि अपसरणप्रयुक्ता मेषयोः संयोगस्य निवृत्तिः वृकाद्बिभेतीत्यत्र वृकप्रयुक्ता देवदत्ते संबंध
स्य निवृत्तिर्हि वृके चौरेभ्यस्त्रायते देवदत्तं इत्यत्र त्राणप्रयुक्ता कर्मसंज्ञक देवदत्ते संबंधस्य निवृत्तिश्चौरेषु उपाध्यायादधीत इत्यत्रापि कर्मणः शब्दस
ध्वन्यात्मकस्य निवृत्तिरुपाध्याये वर्त्तते कैयटोक्तविधात्र बोध्या उपाध्यायेनोत्पादितो ध्वनिरनित्यत्वान्निवर्त्तत इति कैयटाशयः माषेभ्यो गा वारय
तीत्यत्र वारणक्रियाप्रयुक्ता कर्मभूतानां गवां संबंधस्य निवृत्तिर्माषेषु गोमयाद्वृश्चिको जायत इत्यादावपि कर्तृभूतवृश्चिकताद्रूप्यसंबंधनिवृत्ति
र्गोमयादौ हिमवतो गंगा प्रभवतीत्यादावपि प्रभवनक्रियाकर्तृगंगाजलसंबंधस्य निवृत्तिर्हिमवति यतः काश्चिदापो हिमवतो निर्गच्छंति
काश्चिदन्यास्तत्रैव तिष्ठंति समुद्रः कुंडिकेत्यत्र कुंडिकायाः पानीयबाहुल्यात्समुद्रत्वं समुद्रस्य वा सुतरत्वात्कुंडिकात्वं अत्र सदपि विवक्षावशाश्रीयते
तथा गौणमुख्यसाधारणमेवापादानत्वं सर्वत्र संभवतीति दिक्॥ ॥कर्मणा यमभिप्रैति स संप्रदानं॥ तेन क्रियाकर्मणा करणभूतेन यत्क्रिया एभ०
कर्त्तीयमभिप्रैति स संप्रदानसंज्ञः करणीभूतकर्मतयेत्युक्ते मा विप्रेभ्यो देशपत्वं संप्रदानत्वमिति पोवत् उपाध्यायाय गां ददाति यो मं गच्छती

त्यत्र गमनकर्मग्रामजन्यसुखादिमन्नयोद्देश्यस्य चैत्रादेर्गीरणायः करणीभूतेति॰ ग्रामो हि न गमनेन कारणं धनं तु दानेन तथैव परस्वत्वहेतुत्याग
विशेषात्मकदानघटकस्वत्वहेतुत्वात्॰ पितृस्वर्गोद्देशेन ब्राह्मणायगोदानस्थले दानजन्यफलशालित्वेनैव पिताभिप्रेतो न तु गोजन्यफलशालित्वेनेति
न व्यभिचारः न चादृष्टद्वारा स्वर्गादिफलस्यापि गोजन्यत्वे दत्तागौः पितृस्वर्गं जनयिष्यतीत्यभिसंधानादिति वाच्यं अदृष्टद्वारकत्वेन धात्वर्थतावच्छेद
कत्वेनैव वा फलस्य विशेषणात्॰ उक्तस्थले विप्रस्वत्वोद्देश्यकत्वं तदिच्छाजन्यत्वं पदानान्वितं चतुर्थ्या द्वितीयाया स्वत्वमर्थः विप्रस्वत्वोद्देश्यकधनो
पस्वत्वजनकदानानुकूलकृतिमान् इति धीः एवं च दानक्रियामात्रनिरूपितसंप्रदानत्वं इत्यनेनांगीकारात्॰ वृक्षायोदकं सिंचतीत्यादावपि उदकजन्य
फलभागित्वेनोद्देश्यत्वाद्वृक्षस्य संप्रदानत्वं वृक्षीयपत्राद्युद्देश्यकसेचनविषयककृतिमानिति धीः न चाजां ग्रामं नयतीतिवद्वृक्षमुदकं सिंचतीति स्या
त्॰ संयोगवत्वं पात्रस्य स्यवद्द्रव्यक्रियाविनेयावेउदकस्य कर्मत्वसंभवादिति वाच्यं अनभिधानात्॰ मीमांसकास्तु॰ अन्यार्थसंज्ञाविज्ञानात् त्यज्य
मानस्योद्देश्यत्वे सति स्वीकारपरत्वे संप्रदानत्वं स्वीकारो यथेष्टविनियोगयोग्यतोपधायकः प्रतिग्रहः उद्देश्यत्वं चतुर्थ्यंतपदोच्चारणजन्यज्ञान
विषयत्वं नामगोत्रे समुच्चार्य सम्यक्श्रद्धान्वितो ददेत्॰ संकीर्त्य देशकालादि तुभ्यं संप्रददे इति नममेति सत्योपानिष्क्रिमपि कीर्तयेत् दानहोमादिकं

सिं०धा० कुर्यादेवं श्राद्धसमन्वितमिति वृद्धवशिष्ठवचनात् देवतायामतिव्याप्तिवारणाय विशेष्यं त्यज्यमानद्रव्योद्देश्यत्वमिदं द्रव्ये त्यागकालीनचतुर्थ्यंत[illegible]
दोच्चार्यत्वं शाद्वे देवतात्वं तद्धितवाच्यं वृद्धव्यवहारात्· अत एव तद्धितापेक्षया देवतात्वाभिधेचतुर्थ्या दौर्बल्यं सौकाख्यकोशस्यागेनैव त्यज्यमानद्रव्योद्देश्यत्वनू
पदेवतात्वस्य चतुर्थीतो लाभात् न तु केवमदे तद्धितेन च चतुर्थ्या वामंत्रवशेन वा पुनः देवतात्वगतिस्तत्र दौर्बल्यं तु परंपरं तत्र त्यागाद्धिकमन्यलभ्यं उद्देश्यत्व
मात्रं चतुर्थ्यर्थः रजकाय वस्त्रं ददातीत्यादौ चलक्षणेति वृत्तिकारस्याप्ययमेवाभिप्रायः केयदात्पयक्तिन शूद्राय मतिं दद्यादिति दर्शनात् खंडिकोपा
ध्यायस्तस्मै चपेटां ददाति इति भाष्यकारोदाहरणाच्च परस्वत्वापत्तिपर्यंतस्वत्वनिवृत्तेर्दानत्वं· ददातिविषयेवचसंप्रदानसंज्ञेत्युभयमप्युक्तं अत एव कि
याय हरणां करोतीत्यर्थमिति वार्त्तिकमपि प्रत्याख्यातमित्याहुः· ननु तन्मते तद्धितापेक्षया चतुर्थ्या दुर्बलत्वं न स्यात्· इति चेन्मैवं तन्मात्रस्य दौर्बल्यानुपपादकत्वा
त्· तथाहि गुणाधिकारस्थो निरूपितं तत्रैवप्रसिद्धमानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतं तत्र वाजिनवाक्ये किं पूर्वयागानुवादेन द्रव्यदेवता
न्यतरविधिरथ कर्मांतरविधिरिति संदिह्य सिद्धांतितं स्ववाक्योपात्तयोर्द्रव्यदेवतयोर्वाक्यांतरोपात्तद्रव्यदेवतापेक्षया प्रथमोपस्थितिकत्वात्तद्वदुद्देश्यया ग राम०
निराकांक्षतया वाक्यांतरोपात्तयोर्न निवेश इति· वाजिनवाक्यस्थस्य पजेरधिकारस्य प्रकरणसापेक्षस्य प्रकृतयागोपस्थापकत्वेऽप्यामिक्षावाक्यस्थस्य तु तद

नपेक्ष्यस्यैवेति पजे द्रव्यदेवतपदान्वयेसन्निकर्षाभावे· पजिकल्पकस्य द्रव्यदेवतासंबंधस्यात्रामिक्षापां वैश्वदेवीत्येकपदोपादानात्प्रतीतेर्वाजिनेतुपदां
तरोपादानादितिविप्रकर्षात्तु वैश्वदेवीत्यत्रसास्यदेवतेत्यनुशासनाद्देवतात्वविशिष्टद्रव्यविशेषस्यतद्धितार्थत्वात् द्रव्यानभिधानेत्रामिक्षापदसामानाधि
करण्यानुपपत्तेश्च नचतस्यव्यक्तिन्यायेनधीः संप्रदानेचतुर्थीतिवद्देवतापांतद्धितद्वैवानुशासनप्रसंगात्· नचद्रव्यमात्रेतद्धितार्थेदेवतात्वेनुसंसर्गाद
तिवाच्यं पदार्थानुशासनेनैवनेसंसर्गस्यानुशासनानर्हत्वात्· तस्यापदस्यमित्यादौ अप्रत्यत्वस्यापिप्रत्ययार्थत्वानापत्तेश्च नचतद्धितस्यद्रव्यविशेषवाचके
नेत्रामिक्षापदैवैयर्थ्यं भुक्तिस्यप्रकारवाचिनस्तद्धितस्यपदांतरस्यसमभिव्याहारविरहेत्रामिक्षात्वादिविशेषरूपेणानुपस्थापकत्वात्· तात्पर्यग्राहकत
यातत्स्यार्थक्यात्· यदिचतद्धितांतपदमात्रश्रवणोपि द्रव्यविशेषसंशयोत्पादात्सामान्यरूपेण [illegible] द्रव्योपस्थितिस्तद्धितात्· तथापिविशेषस्या
मिक्षापदेनसमर्पणतोपिअनिर्धारितद्रव्यविशेषदेवतासंबंधस्यपदश्रुतिमात्रप्रमाणकत्वेमस्त्वेतं वाह्निम्पदइतिचतुर्थी नुस्वरूपतएवसंदिग्धा· पंच
मीसाधारण्यात्· चतुर्थ्यापिसंप्रदानत्वमात्रवाचिनोप्रतिग्रहीतत्वांशत्यागेनलक्षणायैवदेवतात्वेवेदेत· ननुद्रव्यसंबंधदेवतयापिप्रतिसंबंधितया
द्रव्यस्यार्थापत्तिविधयापेक्षेपि नअस्यशाब्दं नचाक्षेपोपिसंभवति· प्रमाणांतराभावेतस्यावश्यकत्वात्· अत्रचवाजिनपदस्यसत्वात्· ततश्चवाजि

सि·धा· भ्यहृतिपरस्य द्व्यसाकांक्षत्वेपि द्रव्यसंबंधस्य पदांतरगम्यत्वादामिक्षासंबंधमपेक्ष्य वाजिनसंबंधो विप्रकृष्टः न च संख्यावद्व्यासायादनेन निवेशः कर्म
स्वरूपे स्वेकत्वावच्छिन्ने सति अन्यस्मिन्नेकादशत्वनिवेशः द्वित्वादिसंख्यायाः पूर्वविधाने एकत्वसामानाधिकरण्यनियतत्वात् · वाजिनस्य त्वामि
क्षासामानाधिकरण्येनानिवेशात् · अन्यस्य त्वस्यापि पूर्वकर्मणामिक्षामित्यावरोधनादवस्थोननिवेशासंभवात् तस्माद्द्रव्यदेवतासंबंधकल्पितं सान्नाय
प्रकृतिकं यागांतरमेव आमिक्षानुनिः पादि वाजिनेषु तिषत्पर्थतयामिक्षायागमात्रं गतत्वेन विधीयते तस्मात्पूर्वकर्मण्य निविशमानो गुणो भेदकः · अ
निवेशश्च प्रकृते सन्निकर्षविप्रकर्षादिभिरुक्तो न्यायेष्वेकविधाकर्मभेदापत्तेः सिद्धिनेत्यपस्मत्रे निरूपितं · अत्र च लक्षणाया दैवमात्व इतीति रितिवीजाभावपि
न्यायो तरेणापथोक्तेनैवचतुर्थ्यादो वैकल्पसिद्धेरिति · प्रकृतमनुसराम · क्रियाग्रहणं कर्तव्यमपेक्ष्यते शते शपनक्रियया ईप्सितस्यपत्पुरुक्तेः संज्ञाभा
व्यकारणत्वं संदर्शनाध्यवसायप्रार्थनादिभिरर्थ्यमानत्वात् क्रियापि कृत्रिमं कर्म तथाच सूत्रे गोवत्सिं प्रयुज्यमानाः अपि · संदर्शनादिक्रियायाः स्वो
मीमृत्यापशापनक्रियया ग्रन्थुरभिप्रेयमाणत्वात् · एवं दिशापनक्रियायाः ज्ञानं ततः इच्छा ततः प्रवृत्तिरिति क्रमः ज्ञानादिक्रियानिरूपितं च कर्म ८८·
त्वं शपनादेः स्वरूपमिति · अतीपमानक्रियामपेक्ष्य कारकत्व स्याप्य विशषिं दोमिप्यादोदर्शनात् · क्रियार्थोपपदस्येति सूत्रे स्यात्स्याच्च नन्वेवं क

दंकरोतीत्यादावपि संप्रदानत्वापत्तिः अत्राहुः पदार्थदर्शनादयो यथा त्वर्थाभेदेन विवक्ष्यंते तदा संप्रदानसंज्ञा सा च विधत्ताप्रयोगदर्शनवशान्नियतविषये वाश्री
यते अतो नातिप्रसंगः तत्राभेदस्याविवक्षितत्वात् अत एव गत्यर्थकर्मणीति द्वितीया व्याख्यायते उक्तं च वाक्यपदीये भेदस्य चाविवक्षायां पूर्वं पूर्वां क्रियां प्रति परस्या
गस्य कर्तृत्वात् क्रियाग्रहणं कृतं। क्रियाणां समुदाये तु यदैकत्वं विवक्षितं तदा कर्म क्रियायोगात् स्यादप्यपेवोपचर्यते भेदाभेदविवक्षा च स्वभावेन व्य
वस्थिता तस्माद्गत्यर्थकर्मत्वे व्यभिचारो न दृश्यते विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि आरंभेणानयोगस्य प्राप्ता स्यान्नसमंभवेत् स्यादस्याः क्रियेप्सि
तत्वरूपकर्मसंज्ञया उपचर्यते व्यवच्छिद्यते न तु संप्रदानसंज्ञया। गत्यर्थकर्मणि तु भेदाभेदो भयपर्यायेणाविवक्ष्यत इति संज्ञाद्वयाद्विभक्तिद्वयसि
द्धं स्पष्टमन्यत् मीमांसकास्तु नियमेन ज्ञानिदर्शनीत्यभावान्नेदं युक्तं अत एव गत्यर्थकर्मणीति सूत्रे क्रियाग्रहणमपि तत्रैवोद्यत इति भाष्यकृतो
क्तं वार्तिकं विधितत्वेनाश्रितं इत्याहुः तत्रैव स्फुटीकरिष्यामः इदं च त्रिविधं अनिराकरणात्तु त्यागांगकर्मणोप्सितं प्रेरणानुमतिभ्यां च ल
भ्यते संप्रदानतामिति वाक्यपदीयात् सूर्यायार्घ्यं ददाति। विप्राय गां ददाति। उपाध्यायाय गां ददाति। इति क्रमादुदाहरणं न च तादर्थ्यचतुर्थ्यैव सि
द्धे एतत्सूत्रवैयर्थ्यं दानक्रियायाः फलसंबंधितया प्राधान्यात् संप्रदानस्यैव तादर्थ्यत्वं न तु दानक्रियायाः संप्रदानार्थत्वमिति तदप्रसक्तेरिति दिक्॥

सि० धा० राज्ञः अतएवत्यागांगं कर्मणोप्सितं इत्युक्तं कर्मसंप्रदानयोः करणाकर्मत्वेवाच्ये पशुनारुद्रंयजते पशुंरुद्राय ददातीत्यर्थः इदं च प्रयोगदर्शनसमुच्चयात्
यास्तिकं लोके तु पत्रैः पूजार्थत्वात् पशोः करणात्वं ॥ ॥रुच्यर्थानांप्रीयमाणः उक्तसंज्ञं स्यात् देवदत्ताय रोचते स्वदते वा मोदकः पथ्यि प्री
यमाणः किं पथीत्यधिकरणे मा भूत् आदित्यो रोचते इत्यत्र दीप्त्यर्थे न संज्ञा अत्र वाक्यपदीयं हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारके रु
च्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते अस्यार्थः अन्यस्य मनेनाभिलाषोरुच्यर्थः अभिलाषविषयो भवतीत्यवगमात् तादृशं मोदकं देवद
त्तं प्रयुंक्ते लौल्यात्तदनुगुण्यमाचरतीति देवदत्तस्य हेतुसंज्ञायां रोचते प्रीणातीत्यर्थे तु कर्मसंज्ञायां देवदत्तस्याभिलाषविषयो भवतीत्यवगमात् तादृशं मो
दकं देवदत्तं प्रयुंक्ते लौल्यात्तदानुगुण्यमाचरतीति देवदत्तस्य हेतुसंज्ञायां रोचते प्रीणातीत्यर्थे तु कर्मसंज्ञाभिलाषविषयो भवतीत्यर्थे तु शेषष
ष्ठ्यां प्राप्तायां संप्रदानसंज्ञारंभः ॥ ॥श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः एषां प्रयोगे बोधयितुमिष्टः संप्रदानं देवदत्ताय श्लाघते तं स्तौतीत्यर्थः एम०
एवं हि देवदत्तः शक्यते ज्ञापयितुं देवदत्ताय स्वपरं वा श्लाघ्यं कथयतीति केचित् श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपइति भट्टिप्रयोगात् आ
त्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः श्लाघपदे कर्मत्वे हि द्वितीयेव शेषषष्ठ्यां प्राप्तायां प्रारंभः ह्नुङ् अपनयने स्वार्थविशिष्टज्ञापनार्थत्वात्सकर्मकाऽयं

याचज्ञीप्स्यमान इति संज्ञिविशेषणं देवदत्ताय ह्नुते देवदत्तमपलपन् तदपलापं देवदत्तं बोधयति संनिहितमपि तं धनिकादेरपलपतीत्यर्थः पद्माङ्को
त्वं देवदत्तं बोधयतीत्यर्थः देवदत्ताय तिष्ठते ईदृशोऽहमित्यवस्था तेन बोधयति कस्मै स्मेरमरां गणाग्रणायपिनेति छेतकः अन्नलदं मौलिद्युतिमंडलो
ज्ज्वलभुजत्वमापन्नं मा रयेऽस्मि मुरारिः देवदत्ताय शपते शपथेन किंचित्प्रकाशयतीत्यर्थः ज्ञीप्स्यमान इति किं नैरहः देवदत्तं श्लाघते गार्गिकया श्लाघ
ते पथीत्यादौ कर्त्रादिविषयेन संज्ञा ॥ ॥धारेरुत्तमर्णः उत्तमर्णो धनस्वामी उत्कृष्टार्थपरादुच्छब्दात्तेमरः ऋणप्रकर्षत्वात्तात्प्रभृ अन्तैः कृतः ऋ
णमाधमरेऽपि इत्यत्र विनिमयनिरूपकत्वमात्रस्य विवक्षितत्वात् उत्तमर्णोपि नत्वं एतन्निपातादेवंवद्बहुव्रीहौ निष्ठान्तस्यापि परनिपातः देवदत्ता
य शतं धारयति पुनर्दानमंगीकृत्य देवदत्ताद्गृहीतं धारयति षष्ठ्यापवादः आद्यमात्रं अः उत्तमर्णे किं उक्तवाक्ये ग्रामेऽस्मादिप्रयोगे ग्रामादेमी भूते नचपात्त्यादेव
सिद्धिः अधमर्णेऽपि हेतुसंज्ञापत्तेः ॥ ॥स्पृहेरीप्सितः स्पृहर्देस्यादौ चुरादिरदन्तः अस्य प्रयोगे ईप्सितोर्थः संज्ञः पुष्पेभ्यः स्पृहयति ईप्सिततमत्वे
तु परत्वात्कर्मत्वम् पुष्पाणि स्पृहयति शेषत्वविवक्षायां षष्ठ्येव कुमार्यद्वकांत स्पत्रस्पंति स्पृहयंतिवेति ऋद्भ्रदन्तादयः कर्मसंज्ञायाः शेषषष्ठ्याश्च
बाधिके यं संज्ञेति हेलाराजः एतेन स्पृहेः अप्रयोगे कांतायेति विभक्तिविपरिणामः पादस्यं पदेरणा स्पृहणी यशो भंगेऽस्यत्र हानीयो विग्रहः इति वत्संग्र

सिं० धा० दानसंज्ञानीयरिति कल्प्यं॥ ॥क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। क्रोधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपस्तत्कारकमुक्तसंज्ञं देवदत्ताय क्रुध्य
तीत्यादि। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या परगुणासहनं असूया परगुणविध्वंसनं यद्यप्येते चित्तदोषा एवेति चित्तदोषार्थानामित्येव वक्तुं युक्तं। त
थापि योऽस्मान्द्वेष्टीत्यादौ द्विषेरनभिमतं दनार्थत्वे न क्रोधाद्यर्थत्वात्तत्रातिप्रसंगः स्यात्। क्रोधार्थं द्वेष्टि इत्यादावनभिमतं दत्ते विदितैः प्रयोगात्। यं प्रतीति किं
भार्यामीर्ष्यति। परैरीक्ष्यमाणां न सहत इत्यर्थः। क्रुधद्रुहोरकर्मकत्वात्तयोः शेषषष्ठ्यां इतरयोस्तु सकर्मकत्वाद्द्वितीयायां प्राप्तायामारंभः॥ ॥क्रुधद्रुहो
रुपसृष्टयोः कर्म। सोपसर्गयोरनयोः पूर्वोक्तं कर्मसंज्ञं पूर्वोपवादः। देवदत्तमभिक्रुध्यति अभिद्रुह्यति॥ ॥राधीक्ष्योर्यस्य विप्रश्नः॥ एतयोर्विविधप्रश्नः संबंधिकार
कं संप्रदानसंज्ञं कृष्णाय राध्यति ईक्षते वा पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः। शुभाशुभरूपयोः कर्म राधोर्धात्वर्थान्तर्भावादकर्मकत्वं षष्ठीप्राप्तौ
वचनं राध्यतीति अकर्मकत्वात् श्यन्। तथा च दिवादिगणे तत्र गणसूत्रं राधोऽकर्मकाद्वृद्धावेवेति। राधोऽकर्मकादेव श्यन्। एवकारस्याभिन्नक्रमत्वात्। य एम०
थावद्धाविति अत एव कर्मवत्कर्मणेति सूत्रे राध्यत्योदन इति भाष्यं सिध्यतीत्यर्थकत्वात्। एतेन एतयोः कर्मकारकं संप्रदानमिति प्रत्युक्तं यस्येत्येन
र्थकं यं प्रतीत्यनुवर्त्यासिद्धेरिति केचित्। तन्न तत्र यं प्रतीत्यस्य प्रद्वेषयत्योरर्थकत्वात् अत्र च पर्यालोचनेन शुभाशुभयोरेव विषयत्वाच्छुभाशुभयोश्च निर्विषयक

त्वात् शब्दाधिकारमाश्रित्यार्थान्तरकल्पने गौरवात्॥ ॥प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता॥ प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमार्थः त
स्य पूर्वो व्यापारः प्रवर्तनं क्रियायास्तस्याः कर्ता संप्रदानं विप्राय गां प्रतिशृणोति आशृणोति वा विप्रेण मह्यं गां देहीति प्रवर्तितः प्रतिजानीत
इत्यर्थः हेतुसंज्ञायां प्राप्तायां विप्रेण प्रतिशृणोतीति प्रयोगवारणाय वचनं विवक्षाभेदेन देवदत्तो गां प्रतिश्रावयतीति केचित् एवं देवदत्तो
रोचयति मोदकमित्यपि स्यात् न चेष्टापत्तिः तत्रत्यस्वपरग्रन्थविरोधात् हेतुत्वबाधास्मिन् [illegible]भावस्य प्रकृतेऽपि तुल्यत्वादित्यन्ये॥ ॥अनुप्रतिगृणश्च॥
अनुप्रति इत्येतत्पूर्वस्मात्परस्य गृणातेः प्रागुक्तं कारकं तथा गृणा इति आतस्यान्तकसां अनुप्रतिभ्यां गृणा इति समासः ४ आतो धातोरित्याल्लोपः
केचित्तु अनुप्रतीति भिन्नं पदं प्रकृतिवदिति अव्ययत्वात्सुपो लोप इत्याहुः शंसितुः प्रोत्साहनं तदर्थः पूर्वो व्यापारः शंसनं होत्रे अनुगृणाति प्रति
गृणाति वा होता प्रथमं शंसति तमध्वर्युः आयामो दैवेत्यादिभिः शब्दैः प्रोत्साहयतीत्यर्थः॥ ॥साधकतमं करणं॥ [illegible] क्रियायां प्रकृ
ष्टोपकारकं कारकं करणसंज्ञं न च कारकाधिकारादेव लब्धस्य साधकत्वस्य पुनः [illegible] तमपो वैयर्थ्यमिति वाच्यं सामर्थ्यात्प्रकर्षप्रक
र्षोऽन गृह्यते इत्यस्य ज्ञापकत्वात् तेन गङ्गायां घोष इत्यादि सिद्धं तीरनिष्ठाधारत्वस्य प्रवाहे उपचारात् गङ्गापदस्य तीरलक्षकत्वे तु नेदं प्रयोजनं रामेण

सि०धा० वारोन हतो वाली अत्र प्रांचः कारकांतरेऽचरितार्थत्वे सति क्रियानिमित्तत्वं कारणत्वं कारकांतरनिष्ठव्यापारद्वारा क्रियाहेतुत्वाभावो विशेषणार्थः
कर्तृकर्मणोः करणनिष्ठव्यापारद्वारा क्रियाहेतुत्वान्न व्यभिचारः अधिकरणस्यापि कर्तृकर्मान्यतरव्यापारद्वारा तथात्वं चैत्रो गेहे स्थाल्यामोदनं
पचतीत्यादौ गेहस्य कर्तृव्यापारद्वारा स्थाल्याः कर्मव्यापारद्वारा उपयोगात् संप्रदानस्याप्यनुमतिप्रकाशनद्वारा कर्तुरिच्छोत्पादनद्वारा वा अ
पादानस्य पतनप्रतिबंधकसंयोगनाशकविभागद्वारा तथात्वं न च कुठारादिसंयोगस्यापि कर्तृकर्मव्यापारे चरितार्थत्वाद्व्याप्तिः चरमकारणस्यै
व लक्ष्यत्वात् अत एव फलायोगव्यवच्छिन्नं कारणं करणमित्याहुः अन्ये तु व्यापारवत्त्वे सति कारणत्वं करणत्वं न च कार्यमात्रे ज्ञानादेश्चाऽदृष्टस्य म
नोयोगस्य च व्यापारत्वादात्मनः करणत्वापत्तिः इष्टत्वात् अत एवात्मानमात्मना वेत्तीत्यादिप्रयोगः कर्तृत्वकरणत्वोपाधिभेदेनैकस्योभयात्मक
त्वेऽप्यदोषात् श्रावणप्रत्यक्षे श्रोत्रमनःसंयोगो व्यापारस्तेन शब्दः शब्दत्वं नाभावप्रत्यक्षे व्यभिचारात् चाक्षुषादौ चक्षुरादेस्तत्संयोगः अनुमितौ व्याप्ति
ज्ञानस्य परामर्शो व्यापार इत्याहुः अन्ये तु कर्तृव्यापारविषयत्वं करणत्वं तच्चैकत्वानुकूलकर्तृव्यापारवत्त्वं अस्ति हि कुठारादेश्छिदानुकूलकर्तृनिष्ठ ९०
संयोगादिमत्त्वं न चाधिकरणस्यापि कर्तृनिष्ठव्यापारविषयत्वाद्व्यभिचारः तत्करणत्वस्येष्टत्वात् स्थाल्यान्नं साधयतीत्यादिप्रयोगात् तदुक्तं क्रि

मायाः परिनिःपत्तिर्व्यापारादनन्तरं विवक्ष्यते तत्र करणं तत्र दारुस्थं वलितत्तदनिर्देशं न हि वस्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विव
क्षा दृश्यते पतेऽ एतेन गवादीनं साधयति शालेतेन साधयतीत्यादिव्याख्यातं चैत्रश्चात्मना चैत्रेण वा पचतीत्यत्र योगादन्यत्रावपवित सतपदं वच्छेदकत
या कृतिभेत्ते द्विन्नत्वेन व्यापाराश्रयत्वेन विशेष्यः अत्रैव पचतीत्युपादानात् हस्तेन पचतीत्यादेः संग्रहः इदं च करणत्वं नानुमानादिसाधारणमिति तत्र भिन्नमेव
तत्र करणशब्दस्य नानार्थ इत्याहुः ॥ ॥दिवः कर्म च ॥ दीव्यतेः साधकतमं कर्मसंज्ञं चात्करणसंज्ञं करणाशब्दानेहत्रि वेश्यमाणान्यतरस्यांग्रहणा
कर्षयोर्न ता पर्यायलाभात्समावेशार्थश्चकारः तत्फलं तु अक्षान्दीव्यति इति सूत्रे व्याख्यातं ॥ ॥परिक्रयणे संप्रदानमन्यतरस्यां ॥ समयविशेषावच्छेदेन वे
तनादिना स्वीकरणं परिक्रयणं तस्मिन्साधकतमं संप्रदानसंज्ञं वा शताय शतेन वा परिक्रीतः ॥ ॥आधारोऽधिकरणं ॥ आध्रियतेऽस्मिन् क्रियाश्रयेनेने
त्याधारः अध्यायन्यायेत्यादिना करणे घञ् क्रियाधारत्वं च कर्तृकर्मणोर्धारणात् साक्षात्क्रियाश्रययोः कर्तृकर्मणोः प्राप्त्यां कर्तृकर्म
संज्ञाभ्यां वाधात् कर्तृकर्मान्यतरव्यवधानेन क्रियाश्रयः कारकमधिकरणसंज्ञं स्यात् हरिः कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियां ॥
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतं कटे आस्ते स्थाल्यां पचति नन्वेवमप्योपश्लेषिकादिप्रयोगानुपपत्तिः कर्तृकर्मान्यतरद्वारकसंक्रि

सि·मु·धा

यावत्त्वस्यविरहात्·नचापंसंयोगोनास्येवेतिकल्प्यं पस्मिन्नसंयोपचेद्दत्वंतस्मिन्होमोविधीयतइत्यादिस्मात्संप्रयोगदर्शनात्·नापिअस्मादिपदस्यस्व
त्वादेर्लक्षणयाउक्तोन्यतरद्वारकत्वसंभवद्भूतिकेषांचित्कल्पनेपदं पच्छ्वस्यापितस्यापत्वात्तस्मिन्होयोविधीयतइत्यस्यानन्वितत्वापत्तेर्संग
त्·इतिचेत् सत्यं छान्दसत्वेनतदुपपत्तेः नन्वधिकरणत्वंनधर्मसंबंधित्वसंयोगादेर्दिष्टत्वयावद्द्रादेःकुंडादिनिरूपिताधारत्वापत्तेः नचस्वधर्मसं
बंधस्तत्कुंडादिकंचनवदनादिधर्मइतिवाच्यं धर्मत्वस्याधेयात्वरूपत्वात् स्वचत्वनि ष्ठाधिकरणतानिरूपकत्वरूपतयान्योन्याश्रयप्रसंगात्·नचउ
त्पत्तिस्थितिनाशीनांअन्यतमेनापेक्षणीयमधिकरणंसमवायिकारणं घटादेर्भूतलादिजातयादेः समवायिसमवायादेःस्वरूपसंबंधिवेतिक्रमा
दुदाहरणमितिवाच्यं अपेक्षणीयपदेनकारणोक्तौअसमवाय्याद्यावृत्तिप्राप्तेः घटत्वादिजातेर्घटादेः समवायित्वानुपपत्तेश्च अत्रप्राञ्चः तद्भिन्नत्वे
सतितत्प्रतियोगिबंधकसंयोगवत्त्वंतत्त्वेदधिकरणत्वं त्रसरेण्वाधारकसंयोगाश्रयेषुअवारणपरमतैति·जातिगुणादीनांतत्समवायित्वमेव
तत्·समवायादेस्तत्स्वरूपसंबंधित्वमितिनानैवाधिकरणत्वमित्याहुः नव्यास्तु एवमननुगमात्समेप्यानानार्थत्वापत्त्यातिरिक्तमेवाधिक राम०
रणत्वं नचाधेयत्वमेवातिरिक्तं तन्निरूपकत्वेनाधारत्वमितिवाच्यं विनिगमकाभावात्·अतोद्वयमप्यतिरिक्तमित्याहुः अत्रप्राचीनानुसा

रिणाष्ठन्तसंयोगसमवायादिरेवाधारता आधारतात्वंचातिरिक्तं तत्सावधारणं अतोगगनेऽगमः इदमाधारस्तुते आधारतात्वेन संयोग
आदेरपि संयोगत्वेनतदग्रहात् इदं संयोगीनवेति संशयसंभवः संयोगत्वाद्यवच्छिन्नप्रकारताकधियएव तद्विरोधित्वादित्याहुः भूतले घट इ
त्याधारत्वं सप्तम्यर्थः तस्य निरूपकत्वेन घटेऽन्वयः भूतलनिष्ठाधिकरणत्वनिरूपको घट इति बोधो निष्ठत्वनिरूपकत्वे संसर्गाविति तार्किका
प्रावः नव्यास्तु भूतले न घट इत्यादौ बोधो न स्यात् निरूपकत्वसंबंधस्य वृत्त्यनियामकत्वेन अभावप्रतियोगितानवच्छेदकतया नञर्था
न्वयासंभवात् अतआधेयत्वं सप्तम्यर्थः तत्र निरूपितत्वसंबंधेन प्रकृत्यर्थस्यान्वयः सप्तम्यर्थस्य चाश्रयत्वसंबंधेन घटादाविति भू
तलनिरूपिताधेयत्वाश्रयो घट इति धीरित्याहुः ------- अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामाधारः कर्म
संज्ञः अधिशेतेऽधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः ॥ ॥अभिनिविशश्च एतत्पूर्वस्य विशतेराधारः कर्म अभिनिविशते अभिनि
वेशः आयहुः तदा अपवाद्यार्थमकर्मकोयं तत्राधिकरणस्य कर्मसंज्ञाविधिरयं प्रवेशनार्थतायां तस्याः सिद्धत्वात् परिक्रयणे संप्रदान
मितिसूत्रान्मण्डूकप्लुतिन्यायेन विकल्पानुवृत्तेर्व्यवस्थितविभाषात्वस्वीकारात् पापेभिनिवेश इत्यादौ सप्तमी अतएव समर्थसूत्रेएष्वर्थे

सि॰ धा॰ ष्ठामि निविष्टानामिति भाष्यं उपसर्गेण पदस्य पर्योत्कान्तस्य व्यवच्छिन्नत्वेन प्रयोगश्चायं नेः परनिपातकरणाद्विंगात् तेनैव हन्ते निविशते
पदिष्ठक शिक्षापदे कर्मत्वविवक्षायां तु तत्रापि द्वितीयैव॥ ॥उपान्वध्याङ्वसः॥ उपवसत्यनुवसति अधिवसत्यावसति वा ग्रामं सेना॥ व
श्य ३ सेरश्यर्थस्य प्रतिषेधो वक्तव्यः अर्थशब्दो निवृत्तिवाची अधिकरणे षष्ठी अश्यर्थस्य भोजननिवृत्तेर्वाचकोपोपावसिस्तस्येत्यर्थः पक्षे शी
क्त्यर्थः श्यर्थः न श्यर्थोऽश्यर्थः अस्थानार्थस्येत्यर्थः जलाशय इत्यादौ शेतेः स्थित्यर्थत्वदर्शनात् ग्रामे उपवसति ग्रामे तिष्ठतीत्यर्थे तु
ग्राममुपवसतीति उपोष्य रजनीमेकामिति कालाध्वनोरिति द्वितीया एकादश्यां न भुञ्जीतेति कालिकाधिकरणत्वे सप्तमी कारकविभ
क्तेर्बलवत्त्वात्॥ ॥कर्तुरीप्सिततमं कर्म कर्तुरीप्सिततमं कर्म कर्तृनिष्ठाया आप्तेरीप्साया इच्छाया विषयः कारकं कर्मसंज्ञं यद्यपाप्यवल्ले
प्रयुक्तं कर्तृत्वं तेनैव ग्राममुपैष्यमिति सन्निधिनप्यं तेन क्रियाजन्यफलशालित्वलाभः फलेच्छायां उपायेच्छाविधया क्रियेच्छाज
नकत्वात् फलस्यैवेप्सिततमत्वात् न च चैत्रो ग्रामं गच्छतीत्यादौ संयोगशालिनश्चैत्रस्यापि कर्मत्वापत्तिः परसमवेतत्वेन क्रियाप्र ए॰
विशेषणात् अत एव न कृतः वृक्षात्पर्णं पततीत्यादावपादानेतिव्याप्तिः पर्णसमवेतपतनक्रियाजन्यविभागरूपफलशालित्वात्

स्त इति वाच्यं तथात्वे संख्योपस्थापकपदाभावात् । नैवं संख्यासामान्यमपि न प्रतीयेतेति वाच्यं संख्याविशेषानवच्छिन्नस्यैव राजादिपदा
र्थो भासते तद्रूपस्य विवक्षितत्वात् । एतेन राज्ञो राज्ञोर्वेत्यादिजिज्ञासानुरोधात्संख्यात्वसामान्यप्रतीतिः कल्प्येति निरस्तं मानसात्संख्यात्वज्ञा
नादेव तदुपपत्तेः तस्य संख्यासंशयहेतुत्वे मानाभावाच्च । अतो विभक्तिलोपादिविधानं प्रक्रियामात्रं राजपुरुषादिपदमखंडमेव । पदद्वयप्र
त्यभिज्ञानुरोधात्स्यपम् लिकाप्नोतिरिति निःकर्षः । स्यादेतत् । कर्मधारये नीलोत्पलमित्यादौ नीलस्याभेदसंसर्गेणोत्पलत्वपदार्थेऽन्वय इ
ति दर्शनात् तत्पुरुषेऽपि विशिष्ट एव शक्तिरिति वैयाकरणाः । एवं सति निषादस्थपतिं याजयेदित्यत्र षष्ठीसमासे पूर्वपदस्य संबंधिनि लक्षणा । कर्मधा
रये त्वभेदसंसर्ग एवेति लाघवात् कर्मधारय एव । अपूर्वविधौ कल्पनप्रयुक्तगौरवं तु फलमुखत्वाददोष इति सिद्धान्तरहस्यः । सर्ववैयाकरणमते न स्यात् । तैः ष
ष्ठीसमासेऽपि विशिष्टशक्तिस्वीकारेण लक्षणाप्रयुक्तगौरवाभावात् । अत्राहुः पदवृत्त्यस्य शाब्दबोधाविषयस्याकृष्यमाणस्थिते शक्तिग्रहे तदंगत्वमहिंग
त्वचिंतनं अपमर्थः निषादस्थपतिपदं समासशक्तिपरास्तं निषादरूपे स्थपतौ निषादानां स्थपतौ निषादस्वामिके पुरुषान्तरे वेति सर्वत्र शक्तत्वा
न्नानार्थं तत्र तात्पर्यविशेषावगतिरिति निषादरूपे स्थपतावेव तात्पर्यं कल्प्यते । उपस्थितत्वादिलाघवादिभिः । स्यादेतत् । उक्तलाघवं विग्रहे विवक्षि

सि॰ धा

तंसमासेवा ———नोघः तत्राभेदस्य विशेषणविभक्त्यर्थत्वात् षष्ठीसमासविग्रहापेक्षया लाघवाभावात् नच वाक्येप्यभेदः संसर्ग इति वाच्यं तत्र विभक्तेः
प्रयोगसाधुत्वमात्रापेक्षया अर्थे साधुत्वस्याभ्युपहितत्वेनस्यात्र भेदार्थकताया एव न्याय्यत्वात्· अत एव वाक्ये अभेदस्य प्रकारत्वेन समासे संसर्गत्वे
मानात् कथं तयोरेकार्थत्वमित्याशंक्य समानविषयकत्वमात्रेण समानार्थकत्वं न तु विशेषणसाम्येनापीति सप्रैंशब्दालोकादौ एवं चाभेदाभाव
रूपाभेदस्य विग्रहे प्रकारत्वेन भानात् कर्मधारयविग्रहस्यैव गुरुत्वाद्विपरीतापत्तिः न द्वितीयः विग्रहसमानार्थकत्वानुरोधेन कर्मधारयस्यापि निषा
दाभेदप्रकारकविशेषणताविशेष्यसंसर्गकस्थपतिविशेष्यकज्ञानजनकतायावाच्यत्वात्· तत्र च निषादसंबंधिप्रकारकाभेदसंसर्गकस्थपतिवि
शेष्यकधीजनकतारूपापेक्षया गौरवाभावादिति· अत्रोच्यते वाक्ये विभक्त्यर्थयभेदवद्द्विरपि षष्ठीसमासेऽभेदः संसर्ग एवेत्युच्यते उक्तं हि मि
श्रैः न चैवं कर्मधारयेपि विभक्त्यर्थाऽभेदे लक्षणा मन्तव्येति निषादस्थपत्यधिकरणविरोधः कर्मधारयेऽभेदस्य संसर्गमर्यादया भानाभ्युपग
मादिति· तथा अत्रापि निषादप्रकारकाभेदसंसर्गकस्थपतिविशेष्यकज्ञानजनकत्वमेव कर्मधारयस्य स्वीक्रियते· तथा च षष्ठीसमासे पू एम॰
र्वपदार्थसंबंधिनिष्ठप्रकारतायां कर्मधारये च पूर्वपदार्थनिष्ठप्रकारतायां अभेदस्य संसर्गतया प्रवेशेन तत्र संबंधिनोऽधिकस्य शक्यतावे

समुदायस्य परोगवडायो नस्यात्र त्वय ग्रहणपरिभाषायासु वं न तामा बाधिति चेत् सत्यमपी मेपी प्रमानकोग्य टनू इत्या दावति प्रसंगात्।
अस्तित्यत्र सामर्थ्यात् सं वोधन पदं क्रियान्वयीति वर्द्धमानात् लात्। नच सर्पिः कालकमित्यादौ रुसोः सामर्थ्य इति वाच्यं वानगाय समा
नाधिकरणमसमर्थमित्युक्तत्वात्करोष्यत्र नदोष इति वाच्यं सर्पिः पीयत इत्यादौ षत्वासिद्धये अत्र धात्वभिहितमित्यस्याप्युक्तत्वात्। नचेस
र्वं नामधातुजमिति दर्शने कालकादावपि तदापत्तिरिति वाच्यं क्रियायाः प्रतीत्या वेव पर्युदासात्। षष्ठ्यामंत्रिते त्वपेक्षयोश्च तन्निमित्त ग्रहणमेव प्रयो
गोषु स्वामित्रिस्तत्र परांगभावस्यानन्यथानुपपत्तेः न हि गोष्विति षष्ठ्यंते नापि [illegible]मंत्रितेधातुवाच्यापाक्रियातस्याः कारकं स्वामीश्वराधिपतीति
शेषविषये सप्तमी विधानात्। निमित्तत्वेन त्वेव। स्वामित्वस्य द्व्यसापेक्षतया गवां तन्निरूपकत्वात्। तेनक्षत्रेणाश्वेस्यापुः सामस्व मित्रेणायेमित्र
येपेयत स्वेत्यत्र नपरांगवद्भावः। एवं अतेनमित्राव रुणा वताव्रधावत स्पृशा ऋतं वृहंतमाशाथे इत्यत्र अतेनेत्यस्य अयमग्नेजरितेत्यत्र अयमि
त्यस्य चेत्यवधेयं स्यादेतत्। मित्रावरुणयोर्निमित्तत्वाभावात्। अतेनस्यवर्द्धयितानावित्यर्थे तर्भावितण्यर्थाद्वृधेः क्विपि स्त्रैषामपि दृश्यत इति दीर्घे च
अतावृधावित्यस्य प्रत्यतेः तत्र च मित्रावरुणयोर्निमित्तत्वाभावात्। न चैवापत्तिः अतावृधावित्यस्यनिघातानापत्तेः द्वितीयोदाहरणत्वेनानुदा

38

सि०धा० त्ते सर्वदा द्विपर्युदासवत्संगमात् अत एव इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमामिति मंत्रे पूर्वपूर्वामंत्रितानामविद्यमानवत्त्वादपि मे शा
दानत्वमादायकिंपमाणो निघातो गंगे इत्यादिष्वपस्यैव भवति नतु शुतुद्रि इत्यस्यापि इति स्थितिः ततश्च पादादित्वेपि परांगवद्भावाद्वा हामंत्रि
तस्य चेत्याद्युदात्तत्वमेव आत्तेनेत्यस्यस्यात् नच मित्रावरुणावित्यस्य कथं परांगवद्भावः आमंत्रितं पूर्वमविद्यमानवदिति तस्याविद्यमानव
न्द्रावो दिति वाच्यं पूर्वपदोपादानसामर्थ्यात्पूर्वस्य कार्ये एवाविद्यमानवन्द्रावातिदेशात्स्वकार्ये परांगवन्द्रावेतद्योगात् अत एवाग्ने नयेत्यादौ ति
ङ्ङतिङः इति निघातविरहे पि अग्ने आमंत्रिताद्युदात्तत्वप्रवर्त्तते एवं पदानामंत्रिते समानाधिकरणे सामान्यवचनमिति विवचनान्नदोषः मित्रावरुणाविति सामान्यव
चनं तद्विशेषवचनं न जायेतद्धाविति परांगवच्च भवतीत्यर्थः तथा च शृतेनेत्यस्यैव मित्रावरुणावित्यस्यापि परांगवन्द्रावो दुर्लभ इति अत्रैवेदमाल्पश
व्दकौस्तुभमाद्यः तन्निमित्ते ग्रहणं न कर्त्तव्यं तथाहि परस्यैवान्वयपद्यपेक्षालक्षणमत्र सामर्थ्यमाश्रीयं अत एवाग्ने तहरिंभः संगच्छते त
था च शृतेन मित्रावरुणा वृधाविति त्वचकारस्याणं कियापाणमेवान्वयात् शृतेनेत्यस्योत्तरेऽन्वयस्तेन शृतेन वृहतमाशाथे इत्यत्र त्वकेनाशाथे इत्यनेना
न्वयान्मित्रावरुणाभ्यामन्वयो नास्तीति सामर्थ्यविरहात्परांगवन्द्रावः मित्रावरुणावृतावृधावित्यनयोस्तु शोव्दे क्रियान्वयेपि पार्ष्ठिकपरस्परान्वयोऽस्ते नो एन०

मेदान्वयात्सामर्थ्यमस्तीति परां गवम्त्रावसिद्धिः समानाधिकरणमसमर्थमिति तत्वधात्वभिहितपरमित्युक्तमेवेति। नचैवं अश्रुतस्यापि निघातः
स्यात् सन्नस्वतिपदस्य परां गवम्त्रावेनापादादित्वादिति वाच्यं सवतेतिक्रियापाश्च पेवैषा मन्वयेपि परस्परमसामर्थ्यात्। नचैवमेकत्वावउक्तानां कथं
वहुव्वयनोतिक्रियापामन्वयः तथा चैकवाक्यत्वाभावेनिघातस्यापि दोर्लभ्यमिति वाच्यं प्रत्येकं तथात्वेपि मिलितेषु वृद्धत्वान्वयसंभवात्। अत्रं हंवा तं
त्ववन्नहत्सं पुत्रावसनिम्भज्ञा तैरानुगुंतपलीचश्रीत्याप्रतिनवंदतः इत्यादिषु लोकप्रयोगादर्शनाच्च त्याज्यः। नेत्रं हंवक्तव्यं अतेसवद्ध्रपितारावि
त्पेनेन अन्नेतवद्द नेमित्रावरुणयोर्निमित्तत्वस्यैषमेवत्वाभावात्स्यत तन्निमित्तत्वं नास्तीत्युक्तं तद्धर्मावच्छिन्नकार्यतानिरूपितयोगिककारणतावच्छेदकच
र्मवत्वस्यादिवत्तिनत्वात् द्विवोद्धिनरित्यादाववाप्तेः गोषु स्वामित्रिसादावव्याप्तेश्च नचतन्निमित्तत्वे नास्तीत्युक्तं तद्धर्मावच्छिन्नकार्यतामति
योगिककारणतावच्छेदकधर्मवत्वस्याविवक्षितत्वात् द्विगोद्गिनरित्यादावव्याप्तेः गोषु स्वामित्रिपादाववाप्तेश्च नचतन्निमित्तग्रहणं विनेवोक्तरी
त्यातान्वकनेष्यमित्यभिप्राय इति वाच्यं एकार्थीभावः सामर्थ्यमत्राधिकारश्च इति सिद्धांतात्। परां गवद्रा गेवेतन्निमित्तग्रहणान्नहोष इति भाष्यकैयप
टयोर्व्यवस्थापितत्वात्। व्यपेक्षासामर्थ्यस्यात्र ग्रहीतुमशक्यत्वात्। अंगोतिकिद्वयोः ष्यगाघुहानत्वमाभूत्। वादितिकिं साश्रयमपि यथा

सि०धा० स्यात्· आमकुंडेनाट आमस्कांतर मामंत्रितमिमिनिघातः स्वरइतिकिं कूपेसिंचन चर्मेनमनइत्यत्रेषत्वरात्वेप्रातिपरांगवद्भावोमाभूत· सतिशिष्टत्वमि
नैकपघातस्कारस्यपदादित्वाभावात्स्यात्पदाद्योरितिषत्वनिषेधोनस्यात्· समानपदस्थत्वाभावात्तेषस्यात् अत्रभाष्यं अतिदेशेनस्याश्रयंपदादित्व
ननिवर्त्यतेविरोधाभावात्· पूर्वपदात्संज्ञायामेवेष्टपरांगवद्भावइति· समानाधिकरणस्योपसंख्यानमनंतरत्वात् तीक्ष्णयाशस्त्रयासीवनतीक्ष्णे
नपरशुनावृश्चन् त·+तिनिपमाच्चनगात्वं पूर्वपदशब्दस्यसमासपूर्वावयवेरूढत्वेपिव्युत्पत्त्यायेनयौगिकस्यापिपूर्वपदस्यग्रहणात्· यद्वा आ
मंत्रितपदस्यग्रहणादामंत्रितत्वप्रयुक्तकार्यप्रत्येवपरांगवद्भावइतिः समानाधिकरणस्योपसंख्यानमनंतरत्वात तीक्ष्णयाशस्त्यासीवनतीक्ष्णेन
परशुनीवृश्चन् तामिन्निविनिर्दिष्टेपूर्वस्येतिपरिभाषोपस्थितत्वात्आमंत्रितेपरेविधीयमानस्यपरांगवद्भावस्याव्यवहितेप्रवृत्तिविरहादारंभः न
चपरस्यपरांगवद्भावेकृतेपूर्वस्यापिसमविष्यतीतिवाच्यं स्वाश्रयबाधात्वेनपरांगवद्भावेकर्त्तव्येपनोंगवद्भावस्यदुर्लभत्वात्· छंदसिपरेपि
पूर्वस्यांगवद्भवतीतिवक्तव्यं आतेपितर्मरुतांसुम्नमेतु· अतित्वा उदिताद्देवः इरणीत्वइहितदिवः· पितरित्यामंत्रितनिघातेनानुदात्तेनतस्मात्पनेम एम०
उतामित्येतदपि आनुदात्तमेव आष्टमिकनिषेधक्व उच्चैरधीयान नीचैरधीयान अनव्ययीभावस्येतिवक्तव्यं उपाग्न्यधीयान· यद्यपितु सुपुरस्य

प्रवाचः प्रयोजनमिति शर्ववर्मणोक्तं तथापि स्पष्टार्थमिदम्॥ ॥प्राक्तारात्समासः कडाराः कर्मधारये इत्यतः प्राक् समास इत्यधिक्रियते आवृत्ता
शर्ववर्मसमाससंज्ञा तेन अव्ययीभावादि संज्ञेति संज्ञान्तरव्यापकत्वसिद्धिः अन्यथा पर्याये सौ वसंज्ञाद्यं स्यात् उपसर्गकर्मप्रवचनीयसंज्ञावत् स्यादेतत्
समाससंज्ञाया अनवकाशत्वादेव समावेशो भविष्यति नैव विस्पष्टपटुरित्यादौ तत्र कः काश इति वाच्यं विस्पष्टादीनि गुणवचनेषु इति पूर्वपदप्रकृतिस्व
रविधानात् ज्ञापकाद् कुमारीवरन्यायेन समासास्तित्वे त्र सहस्त्युपेतस्य प्रवृत्त्यनुपयोगात् तत्रोक्त्वा पदार्थतावच्छेदकोपादेवमुक्तात् विस्पष्टत्व
स्यान्वयात् पूर्वपदार्थतावच्छेदकस्य अपदार्थतावच्छेदकस्य चैकधर्मिपरत्वाभावेन कर्मधारयत्वानुपपत्तेः अत एव पठति कः समास इति प्रश्ने
विस्पष्टपटुगोचरे समासमात्रे येषु पूर्वविस्पष्टपटवो हि ते नवकाकतालीयमजाकृपाणीयमित्यत्रावकाशः अत्रापि समासाचेतद्विषयादिती
वार्थविषयकसमासानुवादेन छप्रत्ययविधानबलादेव समासस्ति प्रासहस्त्युपेतस्यानुपपयोगात् नचेदं वृन्दीरिवकाकतालमित्यत्र इ
वपदार्थस्य प्राधान्यादिति वाच्यं मतव्यर्थ एव बहुव्रीहेर्विधानात् वस्तुत उपमानशब्दस्यैवोपमेयपदलक्षितत्वादिवार्थप्राधान्याभावात् काकता
लशब्दयोः समवेतक्रियापरत्वेन काकागमनसदृशं चैत्रागमनं तालपतनसदृशो दस्युनिपात इत्येकस्मिन्निवार्थसमासः पतत्तालो

सि०कौ० लेन यथाकामस्य वधात् यादस्तु नौचेत्र सेतिद्वितीयेत त्रछ्वन्त्यपः तदादप्यद्यौराणामस्य च समासामोयश्चैते वैधोस्यकृत्तः उपरतमेतदकस्मादा
सीदूत्तकोकतालीयं नचपुनारुत्तः पुनर्गच्छत्यत्राः जितियोगविभागेनतत्पुरुषसंज्ञां विनापि रूपसिद्धेः समाससंज्ञा सावकाशेति वाच्यं पुनर्गवीतिडी
वर्थं टचःश्च तत्रापेक्षितत्वे न तत्पुरुषसंज्ञाया अवश्यापेक्षणीयत्वयाः अयं प्रवच्याद्भिरितिवाम पूर्वस्य सेकादित्वाद्धातत्पुरुषस्येव वाच्यत्वात् नच पुन
राधेयमित्यत्र विशेषकार्यादर्शनात् सावकाशा समाससंज्ञेति वाच्यं गतिकारकोपपदात्कृदिति स्वरार्थं गतिसंज्ञावश्यकत्वे कुगतिप्रादय इति तत्पुरु
षस्येव चाच्यत्वात् प्रतोनावदृतिधेयशब्दस्याधुदात्तत्वात्पुनरोधेयशब्दे रेफकार उदात्तः अन्यथा समासान्तोदात्तत्वं स्यात् नचपुनरुत्स्यूतं वासो देयं पुन
र्निःकृतो रथ इत्यवकाशः पुनःशब्दस्य गतिसंज्ञायां थाथादिस्वरेणान्तोदात्तत्वं असत्यां तु समासस्वरेणेति विशेषाभावादिति वाच्यं गतिसंज्ञायां गति
रनन्तर इत्यनन्तरग्रहणसामर्थ्यात् थाथादिस्वरं बाधित्वा उच्छब्दस्य प्रकृतिस्वरत्वादुदात्तं पुनःशब्दस्यानुशेषनिघातं बाधित्वा परत्वात् तिङ्ङतिङ इति निघा
तो भवतीति विशेषसत्त्वात् नच पुनश्चनसोऽछंदसीति तेऽस्तिसिद्धिः माघायां स्वरसिद्धये गतिसंज्ञापेक्षायां आवश्यकत्वात् नच का ठके पुनरुत्स्यूतशब्दे तो राम०
दात्तस्वपत्तत इति वाच्यं यत्पयेन प्रवचादेराकृतिगणत्वात् तत्सिद्धेः नत्सिद्धं समास इत्येवाधिक्रियतो इत्ति वेत्सत्यं एकसंज्ञाधिकारे पर्यायापत्ते रेवा

सत्‌· घटो न घट इत्यस्याप्यापत्तेः घटत्वावच्छिन्नत्वमेव प्रतियोगित्वे घटस्य संबंध इति चेत्‌· न घटस्य पटान्यत्वसमत्वेऽन्योन्याभावप्रतियोगित्वं पटस्य
घटत्वान्यधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावाश्रयत्वमादायापि उक्तधीपर्यवसानसंभवात्‌· घटस्याश्रयत्वं तद्व्यतिरेकान्योन्याभावो बुध्यत इ
त्यादिनियमकल्पने पिशाचेन घटः पटो नवेति संशयनिरूपणादिकं न स्यात्‌· एकवाक्यत्वानभ्युपगमविरोधश्च एतेन प्रद्वेत्यपास्तं घटपटयोर्भेदानुभवस्य
शाब्दत्वाव्याप्तिविष्टतुल्यत्वात्‌· तार्किकैश्चोक्तं इतरकारकाप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वं स्वतंत्रं कुठारादिवारणाय पुरुषादि
जन्यसंयोगादिव्यापारविशिष्टत्वेन तत्प्रयोज्यत्वादित्याहुः तच्चिन्त्यं ईश्वरप्रयोज्यानां जीवानां कर्तृत्वानापत्तेः दण्डजन्यसंयोगादिविशिष्टत्वेन दण्डादि
प्रयोज्यत्वे कुलालादावव्याप्तेश्च नव्यास्तु तत्क्रियानुकूलकृतिमत्त्वं तत्क्रियाकर्तृत्वं कोष्ठपाकानुकूलव्यापारवत्त्वप्रतिसंधानेपि कर्तृपदाप्रयोगात्‌· कृ
ताकृते विभागे नैत्यो वा वायोः कृत्यापलेश किम्भनात्‌ जं ते न केचिन्नाव्युत्पन्नकर्तृपदस्य यत्नाश्रये बोधकत्वाच्च अचेतनेन तत्प्रयोगस्य गौणत्वात्‌ गुरु
तरभारोत्तोलनक्रियाविषयकयत्नसत्त्वेपि तदनिःपत्तेस्तत्क्रियाकर्तृत्वव्यवहारविरहात्‌ विषयकत्वं विहाय तदनुकूलत्वमुपात्तं यदित्वन्यविष
यां तदनुकूलाकृतिमादायापि न तत्कर्तृत्वं अत एवमत्तो भूत्वा ननु मया कृतमिति तत्र व्यवहार इति नान्तरीयककृतिसाध्यपिष्टमध्यस्थशर्करादि

सि० धा० भोजने चैत्रस्य न कर्तृत्वं तदाविषयत्वमपि निवेश्यं तच्च साध्यत्वेन तेन यागादिकृतेषु हेतुत्वात्तद्विषयत्वस्य स्वर्गादौ सत्त्वेपि न यागादिकर्तुः स्व
र्गादिकर्तृत्वं ईश्वरः पचतीति प्रयोगे· अन्यथानुकार्यत्वानवच्छिन्नजन्यतानिरूपितत्वमसाधारणमनुकूलत्वं निवेश्यमित्याहुः॥ ॥तत्प्रयोज
को हेतुश्च॥ तस्य कर्तुः प्रयोजको हेतुसंज्ञः चकारात्कर्तृसंज्ञश्च कुर्वन्तं प्रेरयति कारयति हरिः हेतुसंज्ञया तथापारे हेतुमति चेति णिच्· कर्तृत्वात्का
र्तरि लकारः न चैवं प्रयोज्यस्य स्वातंत्र्याभावात्कथं कर्तृत्वमिति वाच्यं प्रयोजकसन्निधानेपि स्वव्यापारे स्वातंत्र्यानपायात्· अत एव कुर्वन्तमपि प्रयोज
प्रयोजकः कारयतीति व्यपदेश इति भाष्यस्वरसः॥ श्री॥ ॥इति श्रीसिद्धान्ततत्त्वबोधिन्यां प्रथमस्य चतुर्थस्य तृतीयमाह्निकम्॥ ॥ॐ॥ प्राग्रीश्वरान्नि
पाताः॥ प्रागिति तत्राहेत्यनयोरेणाक्षिरन्वेति अधिरीश्वरे इत्यत्र रीश्वरशब्दात्प्राक् प्राग्रीश्वरान्निपाता इत्यधिकारः॥ तस्य च अवधित्वे पूर्वं निपातसंज्ञाः संतः पश्चादु
त्युपसर्गसंज्ञाः इति संज्ञासमावेशसिद्धिः अन्यथा पर्यायः स्यात्· तेनादौ ज्ञापकं तु प्राग्ग्रहणमेव पंचम्येव हि कृशब्दाश्लेषसंभवात् न च परशब्दाद्धेपा
प्तिः चादयोः सत्त्वे प्रादयः इतीपे त्योर्विधेयालाभेनानन्वयापत्तेः रेफविशिष्टग्रहणं तु व्याप्तिन्यायेन ईश्वरे तोसुन्कसुनौ इति सूत्रस्य देश नरेशेश्यो व एम०
धित्वासारणार्थं नं चेह न्नेजंत इति ज्ञापकाद्याभिन्यायबोधः तेन सेकृत्स्नमभ्जीनां रणमल्लत्वेनोश्च निपातत्वाद्वैरवायपसंज्ञासिद्धौ पुनस्तद्विधानम्

र्थस्यादिति चेन्न यं कृत्यार्थे तवैकेनित्यादेरजंतस्य खमुमादेश्च मांतस्य तत्संज्ञार्थत्वेनैतत्सार्थक्योपपत्तेः तस्य ईश्वरे तोसुन्कसुनावित्युत्तरं पदस्य मा
नत्वात् अथाव्ययीभावस्याव्ययसंज्ञाविधानं व्याप्तिन्यायबाधकं व्याप्त्याश्रयणे ऽव्ययीभावस्यापि निपातत्वादव्ययसंज्ञासिद्धेरिति चेन्न समा
सानां मध्ये ऽव्ययीभाव एवाव्ययसंज्ञ इति नियमार्थत्वेनोपपत्तेः ननु यस्यास्ति विशादधिरीश्वरे इत्यत्र तस्य एवेश्वरशब्दो ग्रहीष्यते अत एव कपिं
जलानालभेतेत्यत्र प्रथमोपस्थितत्वात्पक्षिवाचकं लभ्यते आवनांतादोदकांतात्प्रियं पान्थमनुव्रजेदित्यत्रापि प्रथमस्यैव वनांतादेर्ग्रहणा
मिति चेतन्न स्नेहादिना द्वितीयादेरपि वनांतादेर्ग्रहणात् कपिंजलस्थले तु चतुरादेन हिंस्यात्सर्वा भूतानीति निषेधस्य बाधकत्वात् अत्र च द्वि
तीयेश्वरस्य ग्रहणे बाधकाभावात् न चैवं न लोकाव्ययेति सूत्रे खलर्थानामव्ययत्वादेवोपसंग्रहेण पृथक्कृः पादानवैयर्थ्यं तावता तेषामव्ययसंज्ञा
विरहे एवंजातीयेन निपातसंज्ञात्वस्यैवेति संभवात् तस्मादेकविशिष्ट ईश्वरशब्दो निर्दिश्यत इति सिद्धं वस्तुतो ऽनभिमतपक्षस्य प्रसासत्त्वे लघीयसी क
पिंजलाधिकरणोक्तलाघवस्यैवान्यायबीजत्वात् अन्यथा ब्राह्मणान्भोजयेदित्यादौ त्रित्वानापत्तेः अत एव शंयुं तापशापाणीया संतितियेपत्नीः सं
याजयंतीति हृदंतातिथ्याः सतिष्ठते नानूयाजान्यजंती सत्र पत्नीसंयाजप्रवृत्तिरावर्त्तिशंयुपुरस्पस्यानूयाजप्रवृत्तिरावर्त्तिनहृदाद्यपसंचमध्ये प्रवृत्तिरे

सि०कौ०

वृक्षशाखयोरवधित्वं न तत्तद्रूपोपश्लिष्टतिसिद्धांतः । तस्मादीश्वरपदमात्रोपादानेऽपि न दोषः ॥ ॥ चादयोऽसत्वे ॥ चादयो निपातसंज्ञाः । ननु द्रव्ये
सत्वशब्दस्य द्रव्यपरत्वात् । न दुक्तं वक्ष्यमाणलक्षणं यत्र सर्वनाम प्रयुज्यते ॥ द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः । तदिदमादिशब्दैः परस्य देव
दत्तादेः परामर्शस्तत्र द्रव्यं क्रियानिपाताद्यर्थस्य तु तदादिभिरनिर्देशात् । घटश्चेत्यस्मादिव घटः सदित्यस्मात्तादृशार्थो न बोधात् । लिंगसंख्यान्व
यित्वाभिति वा चर्वादित्यादि । निपातत्वादव्ययत्वे ततः सुपो लुक् । असत्वे किं पशुना यजेत पशुशब्दस्यादिः । चः समुच्चये त्यादि कमपि प्रयु
दाहार्यं प्रकृतिवदनुकरणमित्यतिदेशस्यानित्यत्वात् प्रसज्यप्रतिषेधः । किं ग्रामीतिवा विग्रामीति विग्रः क्रियाविशिष्टद्रव्यवाचकतया
क्रियायाश्चासत्वरूपतया निपातसंज्ञामाभूत् । पर्युदासे तु । क्रियाकारकसमुदायस्य सत्वभेदाश्रयत्वादतिप्रसंगः स्यात् । अन्यथा प्रयोज
नं सर्वनामाव्ययसंज्ञायामित्यत्र ईत्यासत्र घंटे स्यपरमोच्चैरित्यादेरिव तदंतविधिना विप्रशब्दस्यापि अव्ययसंज्ञा स्यात् । अव्ययसंज्ञायां
निपातस्य विशेष्यतया तदंतविधेः सुलभत्वात् ततश्च सुपो लुक् स्यात् । विप्रकं वल इत्यत्र च निपातांतस्य पूर्वपदप्रकृतिस्वरः स्यात् । अथ पा राम०
दयः । च वा ह अह एव । एवं नूनं शश्वत् युगपत् । भूयस् । कूपत् । सूपत् इमौ प्रश्नवितर्कप्रशंसासु कुविदितिभ्र पर्यायो ग प्रशं

९८

साप्तिमावेषु नेदिति शंकायां नेज्जिलायंतोनरकं पताम निपातसमुदायश्चायं नेद्वमायुनजन्नेदेवाइतिपरच्छपाठात् निपातैर्यघदीति
निघातनिषेधः प्रतिषेधविचारसमुच्चयेष्वप्रमितिशाकटायनः चेत्इत्यापत्तौ चणा तदर्थे समुच्चयादौ त्वननुबंधः क्वचित् पत्र नरुनिश्चित निषेधे· हं
तहचेनुर्कपापांच हंत हंतमहतामुदाप्ता हंतस्नाः पथिकगेहिन्यः माकिर्माकीं स्मौ निषेधे माकिर्नेशन्माकीरिषत्· नकिं संभावितनिषेधे रे
कौतोपि सत्यमिश्चान किरन्यस्त्वाबाह् माङ् निषेधे माङि लुङि त्यत्र विशेषणार्थो ङकारः मामवतु माभविष्यतीत्यादौ निरनुबंधः नत्रतथा· ञ
कारो नलोपो न ञ इति विशेषणार्थः नस्यात्पुत्रकेपामनपुत्र इत्यादावतिप्रसंगात् नचस्त्रैणपुत्र इतिप्रसंगवारणाय· अलुगुत्तरपदे इति उत्तरपदाक्षि
प्तेन पूर्वपदेन ञो विशेषणस्यावश्यकत्वात्तेन एवपामनपुत्रेपिनातिप्रसंग इतिवाच्यं अनेनस्यार्थं जित्वस्य निपातस्यैवग्रहणान्ननुवक्ष्यथेत्वे नोपक्षीण
नकारस्यतद्भिन्नस्यापीतिसंभवादिति प्राञ्चः नैकनीदृत्तेत्यादौ नकारेणसह सहसुपेतिसमासे अतिप्रसंगवारणाय जित्वमावश्यकमितिनव्याः
यावत् तावत् त्वेन्वे एवौ वितर्के श्रौषट् वौषट् स्वाहा वषट् स्वधा ॐ तथा हिनुकु खलु किल अथ सुष्ठु आदह इति हिंसोपक्रमकुत्सनेषु
आदह स्वधाम नुइत्यत्र आदिति पृथक्पदपाठः उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि सुदत्तमनुदत्तं च निदत्तं

सि०ध्या० मितिचेष्यते उपसर्गत्वाभावादेवउपसर्गादिति णत्वाभावः अहं भुमं अंहुः भुमंपुः विरेण अन्तरेण चिरायविरात् अकस्मात् विरस्य मम म
मत्वंगतरास्यस्य वेलायां मात्रायां वामितिप्रवामित्यर्थे गेयेकेनविनीतोवां तेमेशब्दोलयामपेत्यर्थे इति वामनः निंङ्. तत्रनिरूपकाणि यथा
आरे आसहत्यादिस्वरस्य संबोधनमसंनानुकंपायां दूरेण प्रतिषेधेषु यथासंभवं बोध्याः अ अपेहि आ एवं मन्यसे इ इदं पश्य ई ईशाः उउ
त्तिष्ठ ऊ ऊषरे बीजं वपति ए इतो भव ऐ आवद ओ ऋ ऌ ऐ ओ एते मंत्रस्तोभाः प्रभु सम्यगर्थे लोधं नयति पशुमन्यमानाः भुक्तं शोभे यथा कथा वेत्य
नादरे पादस्पाद्रू अंगहे हेमों अपेहत्याद्याः संबोधने येति हिंसाप्राति लोम्यपादपूरणेषु विषुनानार्थे एकपदे अकस्मादर्थे अयमेकपदेतया
वियोगः क्विपया चोपनतः सुङःसहोमे नवकारिथरोदस्या देहोमिमर्दवितथं चविनीतपत्ररम्यैः पुत्रकुत्सायां कुत्सितमवपवं घ्याः इपतिपुच्छं उअप
यः लांतमितिशाकटायनः कुत्सितं कस्यति गच्छति पुल्कसः अस्मि इत्यहमर्थे अन्यत्रपूर्व कुसुमावचायं कुरु धमत्रा स्मि करोमि सखः आत इ
ति इतोपीत्यर्थे आत स्वामतिकोपनस्यतरलः शापोदकं दत्तिणः प्रागेवेति सुतरामित्यर्थे इति वर्द्धमानादयः आकृतिगणोयं ॥ ॥प्रादयः॥
निपातसंज्ञानतु द्वयो प्रपरा अपसं अनु अव निर् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप निसर्गप्रतावना सेवने इ एम०

तिनिर्देशात् निःकृतं दुःकृतमित्यत्र इदुदुपधस्य चाप्रत्ययस्य सकारस्येति भाष्याच्च निसदुसः इति सांज्ञौ इति वृत्तिः निरः कुषः दुरः नोऽधिकरणो इति
निर्देशाद्रेफान्तावपीति हरदत्तः अस्मिन् किं विः पत्री परः सेनाः योगविभागः किं निपातसंज्ञासमावेशार्थः प्रादय उपसर्गाः क्रियायोगे इति यो
गे को क्रियायोगाभावे निपातसंज्ञा न स्यात् ततः नश्च भगात् अव्ययार्थः प्राचार्य इत्यत्राव्ययपूर्वपदप्रकृतिस्वरो न स्यात् ॥ ॥ उपसर्गाः क्रिया
योगे प्रादय इत्यनुवर्तते उद्देश्यसमर्पकं ॥ ॥ गतिश्च प्रादयो गतिसंज्ञाः क्रियायोगे प्रत्येकं संज्ञाशङ्के गतिरनन्तर इति ज्ञापकात् अत एवाव
मनुत्सत्त्रः यथा क्रियान्तोपं निर्देशसामर्थ्यान्न कि विदी दीर्घ्याप्रत्ययस्य न भवतीति चकार उपसर्गसंज्ञासमुच्चयार्थः तेन प्रणेयमित्यादौ उपसर्गत्वात्
त्वे गतिकारकेति कृदुत्तरपदप्रकृतिस्वरश्च योगश्च हरणं यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इत्येतदर्थं तेन प्रवृद्धं कृतं प्रकृतं इत्या
न गतिरनन्तर इति स्वरो न कृतशब्दं प्रति गतित्वात् नेदर्थविशेषकत्वे तु मतमेव उपसर्गसंज्ञायां मरुद्वृधस्योपसंख्यानं मरुत्तः अर्जितत्वाभावेऽप्य
च उपसर्गादिति तत्वं न च किरद्भ्योऽनन्यादि निगद्यं अनभिधानाद् अत्तेरनुत्पत्तेः न च मरुत्वयती सूत्रगणवाप्रतिः तत्वप्रत्येव उपसर्गसं
ज्ञेत्यर्थात् निपातसंज्ञानुगास्यस्य मरुत्तशब्दस्याद्युदात्तत्वापत्तेः सिद्धान्ते तु तत्तीयाकर्मणीति पूर्वपदप्रकृतिस्वरे कृते मध्योदात्तत्व मरुद्वृध

सि०धा० स्यांतोदात्तत्वात् नचोपसर्गोऽभिवर्जमित्याद्युदात्तत्वतादवस्थ्यं निपातनादेव तत्सिद्धेरत्र मे: प्रतिषेधमात्रं तत्सूत्रार्थ इति हरदत्तादिभिरुक्त
त्वात् अत एव नाभेरित्येव वाच्यं पक्षा एवमादिभि: पठनीय: तथ्यर्वमरुध्या मितिप्रकारांतरेणापि मरुच्छब्दो व्युत्पादयिष्यते तत्र पित्वमेव
नित्यपाठस्तु ग्रामादिक: अतएव केयपादिविरोधात् नचैवं पर्वतादिष्वग्नेर्म्मरुद्वृधो विभाषेत्यत्र पर्वतशब्दस्याद्युदात्तत्वोपपत्ति: नचिषपस्येति
पर्वशब्दस्याद्युदात्तत्वात् · अच्छ्वदसादि धादुपसंख्यानं अन्ता भिदादेरन्ता शब्दोन पठनीय: ॥ गतिसंज्ञायां कारिकाशब्दस्योपसंख्यानं कारिका
कृत्य कृ गतीति समास: समासेऽनञ्पूर्वे क्त्वो ल्यबादेश: कारिका क्रियामर्यादास्थितिरित्यर्थ: यत्न इत्यन्ये श्लोकवाचिनो न ग्रहणं: क्रियायोग इति विशेष
णात् पुनश्चनसौ छंदसि गतिसंज्ञा विनिवृत्त्यर्थं पुनरर्धेयं गतित्वात्समासकृदुत्तरपदप्रकृतिस्वरेणायमंतोदात्त इति धशब्द इदानीं पुनरुत्स्यू
तं वा स: गतित्वात्समास: स्वरस्तु प्रवृद्धादेराकृतिगणत्वादन्तोदात्तत्वं काष्ठके न थ्रैव पाठादिति कैयटशोधनिघाते न पुनरशब्दो ऽनुदात्त: वृत्तिका
रस्तु गतिर्गताविति निघात इत्याह उशिग्रस्तत्पुनोहित: निपातनादाद्युदात्ते स्याद्वन: शब्दस्य गतिरनंतर इति प्रकृतिस्वर: ॥ ॥ अर्पादिषिगव एम०
श्चे गतिसंज्ञा: क्रियायोगे क्रियास्तिपेष एवैते प्रयुज्यंते धिडवे स्ततैवविधानात्तत्साहचर्यात् · अत्र सूत्रेऽनभिधानाच्च तत्रापि प्राहुरावि: श

द्यो स्त्रिमियोगः अन्येषांतुकृगैवेतिमाघवादयः संज्ञाविधौप्रत्ययग्रहणोत्तदंतग्रहणाभावेपि प्रत्ययमात्रस्यक्रियायोगाभावात् घेः सर्वलोपि
त्वाद्व सामर्थ्यात्तदंतग्रहणं ऊरीकृत्यशुक्लीकृत्य पटपटाकृत्य अयमत्रविवेकः औषदीगंस्वाहांतानां वादिष्वपिपाठात् क्रियायोगवि
निपातत्वं आविः शब्दस्यसाक्षात्प्रभृतिषु पाठात्कृञ्योगेविकल्पः भ्वस्तियोगेतुप्रकृतसूत्रेणानित्यंतदिति अथकथंवारुणीमदविशंकम
याविश्चकृषोभवदसाविवरागः इतिमाघः प्रमादएवायमितिहरदत्तः अन्येतुतेप्राग्धातोरितिसूत्रस्यप्रयोगनियमार्थत्वपक्षेदोषस
त्वेपिसंज्ञानियमार्थत्वपक्षेनायंदोषः प्रयोगःप्राक्पश्चाद्वा प्राक्प्रयोगेतुगत्युपसर्गसंज्ञेतितदर्थात् अतएवसुकंटकाणिवीरणानीतिभाष्य
स्वारस्यं भवमितिभाष्यवृत्तौ स्वार्थेनभूयतेइतिवृत्तिश्चसंगच्छते इत्थं पुरोणमस्यगुरुत्वाच्चेकारश्चेलनेवपुरितिभट्टिः तस्यच्छित्वाकथमपिपुरइति
मेघदूतः तुरासाहंपुरोधायेत्यादिप्रयोगात्पुरोव्ययमितस्यकृञ्मात्रविषयकत्वशंकानवकाशादित्याहुः एतेनअभ्रमवघुणपक्विलोलजिह्वापुगलीतभ
पस्त्वकंभागमाविरित्यपिव्याख्यातं ऊरीउररीउररी एतेगीकारविस्तारयोः वेतालीधूसी एतौविस्तारे शकलासंसकलाध्वंसकला अंसकला
एतेचत्वारोहिंसार्थाः शकलाकृत्येत्यादि गुलुगुधापीडायां सजूः सहार्थे फलफली विक्लीआक्ली एतेविकारे आलोष्ठी द्वाली सेवाली

सु०धा०

शेवाली चर्षाली मसमसा मस्मसा एते हिंसायां सर्वं तं मस्मसा कुरु इति मंत्रः वषट् वौषट् स्वाहा स्वधा व्याख्याताः पांषी करुणविलापे
पांपीकृत्य करुणं विलप्य इत्यर्थः प्रादुः प्राकट्ये आतन्वी धार्ष्ट्ये आतन्कृत्य आविः प्राकट्ये गणरत्ने त्वेतेपि संगृहीताः पांपाली संकला केवासी ए
ते हिंसायां वाहीली पार्दारी आलेवी एते प्राकाश्ये हिंसायां च इत्यूचिद्यः॥ ॥ अनुकरणं चानितिपरं गतिसंज्ञं क्रियायोगे खाट्कृत्य अनिति
परं किं खाडिति कृत्वा निरष्ठीवत् इतेः परमितिपरं नञोर्थाऽनितिपरमिति समासे इति खाट्कृत्येत्यत्र संज्ञा न स्यात् तस्मादितिः परो यस्मात्तदिति
परं नञा इति समासः ननु श्रौषट् वौषडिति कृत्वा निरष्ठीवदित्यत्र वौषटा व्यवधानात् श्रौषटो नितिपरत्वादिमित्यापत्तिः अव्यवहितपरत्वस्यैव प
रशब्दमुख्यार्थत्वात् अन्यथा खाट्कृत्येति निरष्ठीवदित्यादौ गतित्वानुपपत्तिप्रसंगात्। मैवं अनुकरणत्वसामान्यस्य विवक्षितत्वात्तस्य च व्यक्ति
भेदेप्यभिन्नत्वाद्व्यवधानासंभवात्। गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इति प्रयोगनियमपक्षे इति खाट्कृत्येति प्रयोगवारणार्थमनिति
परमित्युक्तं संज्ञानियमपक्षे तु इतिशब्दव्यवधाने गतिसंज्ञाप्रसक्तिविरहान्नकार्यं॥ ॥ आदरानादरयोः सदसती क्रमाद्गतिसंज्ञके स्तः। एम०
सत्कृत्य असत्कृत्य प्राशस्त्यज्ञानेऽआदरः एतयोः किं सत्कृत्वा असत्कृत्वा शोभनमशोभनं च कृत्वेत्यर्थः नन्वादरे सदित्येवास्तु नचासत्ये

त्येति कथं नञ्समासे सति शिष्टत्वात्कृदुत्तरपदप्रकृतिस्वरं बाधित्वाऽव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वापत्तेः । न च सदसदिति समासे तु स-
दसच्छब्दस्य विहितायाः संज्ञायाः अत्र सम्बन्धे उपपन्नो रितिव्यापारं तदन्तविधिना तत्सम्भवात् न च विशेषणस्य विध्यभावात्तदयोगः संज्ञायाः कार्यार्थत्वात्
कार्यप्रदेशेषु प्रकृतस्य गतिना विशेषणात् । प्रकृते च समासविधौ सुविति गतिरनन्तर इत्यत्र पूर्वपदं गतिर्गताविन्यत्रपदस्येति अ-
त्रपदसंज्ञायां तु स्येव तदन्तविधिः । अत्र भाष्ये आदरानादरयोः सदसती एव वक्तव्ये सदसच्छब्दस्यानादरे वृत्त्यभावात्सामर्थ्यात्तदन्तविधिना
ऽसच्छब्दस्य गतिसंज्ञा यथा गोः पदं सेवितेऽसेवितेत्र गोः पदशब्दस्याभावाद्गोःपदार्थमसेवितेत्युदाहरणं ॥ ॥ भूषणेऽलं ॥ अलंकृत्य भू-
षणे किं अलं कृत्वोदनं गतः पर्याप्तमित्यर्थः अनुकरणमित्यादियोगविभागात्कृञ्विषयमिति सम्प्रदायः ॥ ॥ अन्तरपरिग्रहे ॥ अन्त-
र्हत्य मध्ये हत्वेत्यर्थः । अपरिग्रहे किं अन्तर्हत्वा मूषिकां श्येनो गतः हतं परिगृह्य गत इत्यर्थः । हतपरिकागमने उदाहरणं परिगृह्यागम-
ने तु प्रत्युदाहरणं । अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं समासो गतिसंज्ञाप्रयुक्तः । अन्ते उपसर्गसंज्ञाप्रयुक्तौ गतिसंज्ञा च
प्रकृतरूपेरो वासिद्धेति विभागः । अन्तर्धा अन्तर्धोपसर्गे इति अङ् । अन्तर्द्धिः उपसर्गे घोः किरिति किः । समासस्तूक्तः । अन्तर्णयति । हतेरस-

सि० धा० वैरूप्येति गतत्वं अन्तरदेशे इति नारम्भं देशेष्वभावादित्वात्समत्वाभावः अपनं चेत्यपि नकर्तव्यं कृत्य च इति सिद्धेः इति कैयटः देशे निषेधार्थं सूत्रद्वय
मिति हारदत्तः पक्षद्वयेप्यंतर्शापति अंतर्भवाणीत्याहोणत्वं॥ ॥कणेमनसी श्रद्धाप्रतीघाते कणे इति सप्तमीप्रतिरूपको मनः शब्दश्च इच्छा
तिशयार्थौ निपातौ कणेहत्य पयः पिबति उत्कटेच्छापूर्वकं तन्निवृत्तिपर्यंतं पिबतीत्यर्थः मनोहत्येत्यप्येवं कांताभिः सहता क्षिपाविनिमयान्न
कं चरः को स्फुतामां जिघ्रत्तमसं जिज्ञप्तिकणेहत्यप्रतीमपः स्मरणादिति मदीयप्रयोगः श्रद्धेति किं कणे हत्वा गतः मनो हत्वा सूक्ष्मतंडुलावे
पवः कणः॥ ॥पुरोऽव्ययं पूर्वाधरावराणामिति व्युत्पादितोः सिप्रत्ययांतः पुरः शब्दो गतिसंज्ञः पुरस्कृत्य नमस्तुः सोगीत्योरिति सत्वं अव्ययं किं पुरः कृ
त्वा पूः शब्दस्य बहुवचनं॥ ॥अस्तं च॥ अव्ययमित्येव अस्तंगत्य अव्ययं किं अस्तं कांडं क्षिप्रमित्यर्थः॥ ॥अच्छ गत्यर्थवदेषु अव्ययमित्येव अच्छग
त्य अच्छोद्य अभिगत्य अभिमुखमुक्त्वा चेत्यर्थः अव्ययं किं जलमच्छं गच्छति॥ ॥अदोऽनुपदेशे त्यदादेः अदः शब्दोऽनुपदेशे गतिसंज्ञः अदःकृत्य अदःकृ
तं स्वयमेव पर्यालोचनेनेदं अनुपदेशे किं परप्रेरणो माभूत् अदः कृत्वा अदः कुरु॥ तिरोऽन्तर्धौ तिरोभूय अंतर्धौ किं तिरो भूत्वा स्थितः पार्श्वतो गत्वे एम०
त्यर्थः॥ ॥विभाषा कृञि पूर्वमनुवर्तते तः प्राप्तविभाषेयं तिरस्कृत्य तिरः कृत्यः तिरसोऽन्यतरस्यामिति वा सत्वं प्रत्युदाहरणेतु न सत्वं तद्विधौ गति

अस्तानुवृत्तेः तिरःकृत्वा काष्ठं गतः । लावण्यप्रसरतिरस्कृतांगलेखामित्यादौ समस्तं व्याप्तेरेवांतर्द्धिपदार्थत्वात् । तिरस्कृत इति परिभूतं तत्र तर्ह्यपवारणीद
ति वामनः । तद्वन्वे धात्साच्च विधौ गतिग्रहणाननुवृत्तिरिति माधवः ॥ ॥ उपाजेऽन्वाजे ॥ दुर्बलस्य बलाधानमनयोरर्थः । एतौ कृञि वा गतिसंज्ञौ । उपाजे
कृत्य उपाजे कृत्वा अन्वाजेकृत्य अन्वाजे कृत्वा उपष्टभ्येत्यर्थः ॥ ॥ साक्षात्प्रभृतीनि च ॥ कृञि वा गतिसंज्ञानि । च्व्यर्थ इत्येषां कर्त्तव्यं अभूत
तद्भावविषयाणामेवेष्यमस्मात् । यदा तु साक्षाद्भूतो रूपांतरेण क्रियं ते तदा मा भूत् । ध्वंते षुत पूर्वविप्रतिषेधाद्रूपादीनि नित्यमेव गतिसंज्ञा । तेन ह
वणीकृतेत्यत्र न मांतत्वं विकल्पसंनियोगेन गणेन निपातनात् । यद्वा लवणशब्दस्य लवणमिति मांतो देशः । तथा च पूर्वविप्रतिषेधं विनापि वैशद्य
सिद्धिः लवणंकृत्य लवणंकृत्वा लवणीकृत्येति । ध्वंतावंतयोः पाक्षिके मांतादेशे तु ध्वंरूपं विकल्पस्य परत्वेपि तन्निर्मुक्तो ध्वं मस्य नित्यसंज्ञाप्रवृत्तेः सा
क्षात् मिथ्या चिंतेति मनोव्यापारे चिंताकृत्य । भद्राहस्या लोचनप्रशंसा मंगलेषु । रोचने तिम्रक्षोत्पादने प्रशंसयोः अस्तीति रहः । साहित्ययोः अ
दृष्टा अक्षा । प्राजर्या बीजर्पाजरणक्रियायां प्राजरुहा बीजेन्तु जेतिहृहिक्रियायां लवणं उष्णं शीतं उदकं आर्द्रं पंचानां संज्ञासन्नियोगेन मांतत्व
निपातः मांतादेशो वा अग्नौ वशो विकंपने विकसने प्रहसने संतपने इति सप्तमीप्रतिरूपकाः प्रादुःसननमस् अविसप्रादुसाविसोः ऊर्यादि

सि०कौ० न्वात्प्रामे विभाषा आकृतिगणोऽयं॥ ॥अनत्याधान उरसिमनसी एतौ निपातौ कृञि वा गतिसंज्ञौ उरसिकृत्वा अभ्युपगम्येत्यर्थः मनसिकृत्य
मनसिकृत्वा निश्चित्येत्यर्थः अत्याधानं उपश्लेषः तत्र न उरसि कृत्वा पाणिं शेते॥ ॥मध्ये पदे निवचने च कृञि वा गतिसंज्ञानि अनत्याधाने मध्ये
कृत्य मध्ये कृत्वा स्वैरंध्रीमिमां दृष्टीमिति मुनिः मध्ये कृत्वा पदे कृत्य पदे कृत्वा एवं तौ निपातौ निवचनं वचनाभावः संज्ञाविरहपक्षे पि
अस्य एतत्वं निपातत्वं इति व्याख्यातारः निवचने कृत्य निवचने कृत्वा वाचं नियम्येत्यर्थः अनत्याधाने किं हस्तिनः पदे कृत्वा शिरः शेते॥ ॥नि
त्यं हस्ते पाणावुपयमने उपयमनं दारकर्मेति केचित् स्वीकारमात्रमित्यन्ये हस्ते कृत्य पाणौ कृत्य उपयमने किं हस्ते कृत्वा स्वर्णं गतोऽस्य ४ प्राध्वं बं
धने चादौ प्राध्वमिति आनुकूल्ये वर्तते निपातः अयं कृञि नित्यं गतिसंज्ञो बंधनमपत्र कंधे दानुकूल्यं प्राध्वं कृत्य बंधने नानुकूलं कृत्वेत्यर्थः॥
प्रार्थनादिना तत्कर्त्तेरणोऽप्राध्वं कृत्वा॥ ॥जीविकोपनिषदावौपम्ये॥ जीविकामिव कृत्वा जीविकाकृत्य उपनिषदमिव कृत्वा उपनिषत्कृत्य समा
सस्य नित्यत्वे विसादृश्य परत्वाभावे गतिसंज्ञाविरहात् जीविकादेर्विग्रहे प्रवेशः अत एव तत्र इव पदप्रयोगोऽपि औपम्ये किं जीविकां कृत्वा एम०
गतः ४॥ ॥ते प्राग्धातोः तेगत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोज्याः छंदसि परेऽपि व्यवहिताश्चेति कर्मव्यं हरिभ्यां याह्योक आ आ मंद्रैरिंद्र हरि

मिर्यादिः इहसंज्ञानियमपक्षोपि भाष्ये उक्तः तथाह्येतेनप्रादीनुपनिबद्धपर्यन्तान्स्वरूपेण प्रसिद्धधातोः पूर्वं प्रयोज्यमानानामेषां पूर्वसूत्रैकवाक्यात् ।
पागतिसंज्ञायाश्चानेन विधानात् अत्र छंदसि परेपि व्यवहिताश्चेति सूत्रद्वयं अनितिपरश्छंदसि चेति न कर्तव्यमिति लाघवं परव्यवहितानां गत्युपसर्गसं
ज्ञाविरहेपि प्रयोगस्यानिवारितत्वात् ननु संकीर्णप्रयोगादर्शनादेतत्सूत्रमेव नारम्भ्यं भाषायां प्रयोगस्य व्यवस्थितत्वात् छंदसि तु परव्यवहितप्रयोगे
पि प्रयोगस्येष्टत्वात् अत्र वार्त्तिकं उपसर्जनसन्निपाते तु पूर्ववचनं व्याख्यार्थं ह्यषभं कूलमुद्रुजं ऋषभं कूलमुद्रुजः अत्र द्वयोरप्युपपदत्वात् समासे
उपसर्जनं पूर्वमिति पर्यायेण पूर्वनिपातः स्यात् कूलमुद्रुजं उत्कूलंरुजमिति भ्रमनिवारणाय सूत्रारंभात् ननु एवं सुखेन कृतः क्रियन्ते इति कर्त्री
कर्मणोश्च भूकृञोरिति खल् सुकरं कराणि वीरणानीत्यत्रास्मान्नियमात् कटं सुकराणीत्येव स्यात् न च खलः खित्करणसामर्थ्यादनव्ययस्य प्राक्
योगे निर्णीते परिशेषात् सोऽव पूर्वं प्रयोगार्थं कर्तृशाद्रस्य पूर्वयोगे तस्य खित्परत्वाभावात् सुशब्दे चानव्ययस्येति पर्युदासात् मुमभावात् खित्त्ववैयर्थ्यादि
ति वाच्यं तत्सामर्थ्याद्व्यवहितेपि मुम्संभवात् आढ्यंकरणेनगतिकारकपूर्वस्यापि ग्रहणात् ईषदाढ्यस्य गतित्वाभावेन ईषदाढ्यंभवः अत्र सामर्थ्यं तथापि खित्त्व
स्यान्यथासिद्धत्वाच्च अत्राहुः प्रयोगनियमस्यान्यत्र सावकाशत्वात् बाधो विनष्टिः न च खित्त्वसामर्थ्याद्व्यवस्यापि मुम् प्रतिषेधस्य प्राप्तत्वात् धा

सि०धा० तोः किं शाच्छिकीर्षतीत्यत्रैसनः प्राकुप्रयोगो माभूत् ॥ ॥ कर्मप्रवचनीयाः ॥ रीश्वरात्प्रागयमधिकारः महासंज्ञाकरणमन्वर्थत्वविज्ञा-
नार्थं। अर्थमनुगतार्थेनानुगतावोः न्वर्थाः अन्विगवयमार्थेतियावत्। रूढिरप्यवयवापेक्षा अन्यथातिप्रसंगात्। कर्म क्रियां प्रोक्तवन्तः क-
र्मप्रवचनीयाः। भूते बाहुलकात्कर्तर्यनीयर् तेन संप्रति क्रियां न द्योतयन्तीत्युच्यते तदुक्तं हरिणा क्रियाया द्योतको नायं संबंधस्य न वाचकः। ना-
पि क्रियापदाक्षेपी संबंधस्य तु भेदकः। तथा हि शाकल्यस्य संहितामनु प्रावर्षत्। अत्र न तावदनुर्भवते तदुक्तं हरिणा क्रियाया द्योतको नायं संबंधस्य न वा-
चकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदकः। तथा हि शाकल्यस्य संहितामनु प्रावर्षत्। अत्र न तावदनुर्भूयते सुखमित्यादिवत्। क्रियाविशेषद्योतकः
तदननुभवात्। क्रियापदसन्निधानविरहात्। नापि षष्ठीव संबंधवाचकः। तस्य द्वितीययैवोक्तत्वात्। नापि प्रादेशं विपरिलिखतीत्यत्र विपरिमायलिख-
तीत्यर्थाध्याविशिष्टेमानक्रियाक्षेपत्वद्वत् क्रियाक्षेपकः। कारकविभक्तिप्रसंगात्। किं तु संहिताशब्दोत्तरद्वितीयया सामान्यरूपेणानुगम्यमानं संबंधं ते-
नाक्षेप्रयुज्यमानस्यानिशमेर्याः क्रियाया हेतोः तत्तस्यैव हेतो बोधाद्धेतद्धेतुभूतभावलक्षणविशेषरूपेणावछिनत्ति विशिष्टक्रियाभिजनितत्वेन हेतुभू- ल०
तलक्षणविशेषरूपतया वा संबंधस्य तद्दशेन संप्रत्ययात्। यत्र येत्र प्रयुज्यमानस्य क्रियामाहुरितिभाष्यं तत्र क्रियाशब्देन तदुपजनितसंबंधविशेष

उपचाराद्युच्यते आहुरिन्यस्य द्योतयंती तार्थ इति केचित् । कश्चित् : उक्तप्रवृत्तिनिमित्ताभावेपि वचनसामर्थ्यादियं संज्ञा । यथा सुः पूजायामित्यादौ सोः षत्वादिनिव
तये शत्रुपसर्गसंज्ञाबाधनार्थी ॥ ॥अनुर्लक्षणे लक्षणे द्योत्ये ऽनुः कर्मप्रवचनीयः संज्ञः स्यात् । संहितामनुप्रावर्षत् । यद्यपि लक्षणेस्य भूतेत्यादिना संज्ञा सि
द्धा तथापि वृक्षमनु विद्योतते विद्युदिति हेतुभिन्ने लक्षणे सावकाशा तत्र पुनः क्रियादिनीयाधनेन कुलमित्यादौ सावकाशपा हेनाविति तृतीयापापरत्वाद्
द्योतहेतुभूतसंहितोपलक्षितं वर्षणमिति बोधाद्धेतुहेतुमद्भावसत्वात् । अतः पुनः संज्ञाविधानं तत्सामर्थ्याद्बाधितीयपेव । तदुक्तं हेतुहेतुमतोर्योगपरि
च्छेदेनुना कृते । आरंभाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणेति । नचात्र तृतीयार्थ इति सूत्रेण गतार्थत्वं परस्तादपकर्षन्यायेन तस्य सहयुक्ते प्रधाने इत्येत
स्मात्रबाधकत्वात् ॥ ॥तृतीयार्थे अनुर्द्योत्ये ऽनुः उक्तसंज्ञः । नदीमन्ववसिता सेना । नद्या सह संबद्धेत्यर्थः ॥ ॥हीने प्राग्वत् । अनु हरिं सुराः । हरि
मपेक्ष्याप्यकृष्टा इत्यर्थः । उत्कृष्टादेव द्वितीया न त्वपकृष्टात् । शक्तस्वभावात् ॥ ॥उपोधिके च चकाराद्धीने उपशब्दः प्राग्वत् । उपखार्यां द्रोणः । खारीतोधिको
द्रोणः । उपशमशीति यावत् । यस्मादधिकमिति सप्तमी । उपहरिं सुराः । एवं स्त्र्यौक्त्येवेत्यर्थः ॥ ॥अपपरी वर्जने स्पष्टं । अपविष्णोः परिविष्णोः सं
सारः । पंचम्यपाङ्परिभिरिति पंचमी । परेर्वर्जन इति द्विर्वचनं । पंचमी कर्मप्रवचनीयाभ्यां द्योतितेपि वर्जने वचनसामर्थ्याज्जायते । वर्जने किं परिषिंचति सर्व

सि०धा० तदित्यर्थे ऽपसर्गत्वाभावात्।। ।।आङ् मर्यादावचने यद्यपि अन्यत्र मर्यादाभिविध्योर्भेदस्तथाप्यत्र वचनग्रहणसामर्थ्यात् परिच्छेदहेतुरुभयमपि गृह्यते
आभुक्तेः संसारः आकुमारं यशः पाणिनेः कुमारेणापि श्राममित्यर्थः।। ।।लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः एष्वर्थेषु विषयेषु प्र
त्यादय उक्तसंज्ञाः यथाविभक्तिसमीपादयोऽव्ययानां गार्यास्तथा लक्षणादयो न प्रत्यादीनां किंतु पदान्तरवाच्याः संतः प्रत्यादीनां उक्तसंज्ञायां
विषयत्वेन निर्दिष्टाः वृक्षं प्रति परि अनु वा विद्योतते विद्युत् अत्र वृक्षो विद्योतनस्य लक्षणं अत्रासाद्यस्कन्धाधिक्रियाजनितसंबंधविशेषस्यत्वष्ठेद्
काः केचित्प्रकारं प्राप्त इत्थंभूतः तदाख्याने यथा साधुर्देवदत्तो मातरं प्रति इत्यादि भागो यदत्र मां प्रति स्यादित्यादियोऽत्र मम भागः स्यात्तद्दीयतामित्यर्थः
स्वस्वामिभावो द्वितीयार्थः वीप्सा व्याप्तुमिच्छा साकल्यप्रतिपिपादयिषेति यावत् भूतं भूतं प्रति पर्यनु वा प्रभुः सकलभूतानामित्यर्थः इहेत्थंभूता
ख्यानेनैव सिद्धेत् वृक्षं वृक्षं प्रति सिंचतीत्यादि इह परिशेषः क्रियासंबद्धः वीप्सा तु द्विर्वचनद्योत्या द्वितीयातु कर्मणि कर्मप्रवचनीयसंज्ञा पुनरु
पसर्गत्वनिवृत्त्यर्था तेनोपसर्गात्सुनोतीति षत्वं न ननु परिशब्दयोगे पंचम्यापत्तिः न वर्जनार्थपरिशब्दसाहचर्यात्।। ।।अभिरभागे भागभि राम०
न्ने लक्षणार्थत्रये अभिरुक्तसंज्ञः वृक्षमभिविद्योतते साधुर्मातरमभि वृक्षमभि सिंचति अभागे किं यदत्र ममाभिष्यात्तद्दीयतां उपसर्गत्वा

र्म्यामिति षत्वं ॥ ॥ प्रतिः प्रतिनिधिप्रतिदानयोः । स्पष्टं अभिमन्युरर्जुनात्प्रति तस्य प्रतिनिधिरित्यर्थः मूल्यात्किंचिन्न्यूनः प्रतिनिधिः तिलेभ्यः प्र
तियच्छति माषान् प्रतिनिधिप्रतिदाने च यस्मादिति पंचमी ॥ ॥ अधिपरी अनर्थकौ ॥ उक्तधात्वर्थातिरिक्तार्थविरह एवानर्थकत्वं सर्वथानर्थ
कस्य प्रयोगायोगात् धात्वर्थमात्रानुवर्तित्वान्न गतिसंज्ञाप्राप्ताः तदा धायोक्ते संज्ञाविधानं तेन कुतो ध्यागच्छति कुतः पर्यागच्छती त्यत्र गतिर्ग
तीति निघातो न ॥ ॥ सुः पूजायां सुस्तुतं अनुपसर्गत्वान्न षत्वं पूजायां किं सुषिक्तं किं तवात्र अनेनायं सुष्टु तिरस्कृता विशेषमात्रं विवक्षि
तं न पूजेत्याहुः प्रशंसा तु मते पूजा न शक्यं स्तु एव तु सुरिति पाठात ॥ ॥ अतिरतिक्रमणे च ॥ चकारात्पूजायां अतिक्रमणं उचितादधिका
नुष्ठानं अतिसिक्तं अतिस्तुतं बहुतरं समीचीनमिति क्रमेणार्थः ॥ ॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु एषु द्योत्येष्वपिरुक्तसं
ज्ञः स्यात् अपि शब्दार्थो निर्दिश्यते तत्र पदार्थस्योपादानमनर्थकत्व पदार्थाः अमि चाहात् संभावनाद्युपादानमप्येवं तेषामपि पदार्थत्वात् त
था च सर्पिषोऽपि स्यादित्यत्र स्यादिति पदं कर्तृसामान्यवाच्यपि पदासामर्थ्यात् बिन्दुरूपकर्तृविशेषपरं तदानन्त्यमिति अपिः कर्मप्रवचनीयः षष्ठ सर्पिषः श
ब्दस्य समुदाय एव वर्तते नावयवे अत एवावयवोपजनितव्यतिरेके षष्ठी प्रार्थनायां लिङ् तस्या एव विषयभूते प्रकृतस्यार्थे भवेनेकर्त्तृ दौर्लभ्यम

सि०सु० युक्तं दोर्लभ्यं द्योतयन्नपि शब्दः स्यादित्यनेन संबध्यते इहैवापि शब्दस्य पदार्थद्योतकत्वं तदुक्तं पदांतरस्याप्रयुज्यमानस्यार्थः पदार्थ इति एवं चात्र नक
र्मप्रवचनीयत्वे षष्ठ्याः प्रसङ्गो द्वितीया सर्पिषो बिन्दुनान्वयो न त्वपिनेत्युक्तत्वात् संज्ञाफलं तु उपसर्गप्रादुर्भ्यामिति षत्वाभावः अथ पदार्थगतार्थो विवि
दुर्बहुः स्यष्टार्थप्रयुज्यते तदापि द्वितीया स्त्रक् पदांतरव्यतिरेकेपि यः पदार्थः प्रतीयते तस्यैव पदार्थपदार्थतया विवक्षितत्वात् तथा चैकपदं भावनि
यमस्यानभिमतत्वात् नैवं उपपदविभक्तितः कारकविभक्तेर्बलवत्त्वात् शत्रुमुत्सर्षप्रकाशनार्थमत्युक्तिः संभावने अपि सिंचेन्मूलसहस्रं अपि स्तु
याद्विष्णुं अन्ववसर्गः कामचारानुज्ञा अपिसिंच अपिस्तुहि अन्यत्र स्वेच्छया कुर्वित्यर्थः गर्हायां धिग्देवदत्तं अपिस्तुयाद्वृषलं समुच्चये अपि
सिंच अपिस्तुहि उभयं कुर्वित्यर्थः उपसर्गसंज्ञाबाधादुपसर्गात्सुनोतीति षत्वाभावः॥ ॥अधिरीश्वरे॥ स्वस्वामिभावे द्योत्ये अधिरुक्तसंज्ञः अधिब्र
ह्मदत्ते पंचालाः अधिपंचालेषु ब्रह्मदत्तः यस्य चेश्वरवचनमिति स्वस्वामिनोः पर्यायेण सप्तमी वक्ष्यते॥ ॥विभाषा कृञि॥ अधिः कृञि योक्तसंज्ञः
ईश्वर इत्यनुवर्तते इवैतत्प्राग्विभाषेयं यदत्र मामधिकरिष्यति विनियोक्ष्यत इत्यर्थः विनियोक्तुः ईश्वरत्वावगमात्कर्मत्वाद्द्वितीया इह गति राम०
संज्ञापाक्षिकत्वात् तिङि चोदात्तवतीति निघातो न मामधिकृत्येत्यत्र प्रादिसमासो न कर्मप्रवचनीयानां प्रतिषेध इति वक्तव्यमानाच्चात् पक्षे

मानाधिकरणेऽप्रयुज्यमानेऽपि प्रयुक्तेऽप्रयुक्तेऽपि मध्यमः स्यात्. त्वं पचसि त्वं दृश्यसे कर्तृकर्मणोः क्रमेण लकारः तद्विशेषबोधकत्वात् लंशब्दस्य तत्सामानाधिकर-
ण्यं नैयायिकास्तु कर्तृकर्मणोराख्यातार्थत्वाभावात् युष्मदर्थधर्मिभ्यां स्वधर्मिबोधकत्वेन रूपं तु अग्रे हेतोः सामानाधिकरण्यं न लोपघटादिवत्. किंतु तिङर्थ-
संख्याविशेष्यबोधकत्वरूपमेव स्यादुः समानाधिकरणे किं त्वां पश्यति त्वया दृश्यते आद्ये कर्तरि लकारः त्वामिति कर्म अन्त्ये कर्मणि लकारः त्वया इति कर्तेति
सामानाधिकरण्याभावः उक्तं त्वं भवति त्वं भवतीत्यत्र तु न मध्यमः प्रकृतिविकृत्योरभेदविवक्षायामपि प्रकृतेरेव विकारान्तरूपेण संपन्नो कर्तृत्वात् प्रकृ-
त्याश्च युष्मदर्थाभावात् प्रथम एव भवति एवं पदमेस्यामहं त्वं वा अत्र हंस्या इति मत्वे प्रयोगात्. भवान्करोतीत्यत्रापि न मध्यमः अलिंगः संबोधनैः कविषयकत्व प्रयुष्मदर्थः
सलिंगः संबोध्यासंबोध्यसाधारणाश्च भवदर्थ इति वैषम्यात्. न च युष्मदः संबोधने कविषयत्वे तस्मात्संबोधन एव प्रथमापत्त्या आमंत्रितायुष्मत्त्वं पदात्परं वे
निधानस्य स्यादिति वाच्यं संबोधनस्यामंत्रितपदकार्थ एव तात्पर्यात्. संबोधने चेति सूत्रेण तदधिकार्थमिति न च समानाधिकरणात्. केचित्तु तत्रैव प्रायेणमाहुः. पठंति
च संबोधनार्थः सर्वत्र मध्यमे केश्चिदिष्यते तथा संबोधने सर्वं प्रथमं युष्मदे विदुः युष्मदर्थस्य सिद्धत्वान्निपातत्वाद्युदाहृता युष्मदः प्रथमो नस्य परश्चेन्ते प
दादसाविति तत्र उक्तायुक्तिविरोधात्. युवं हि गर्भं जगती सुधस्यः स्थूणे पातमस्त्रिभिः इत्यादौ पादादावेव च तो दानोत्वस्य यद्वेवा पूर्वमिदापन्नस्य छत्वा

सि॰ सु॰ दोपदात्परत्वेप्यनिघातस्य चेद्दर्शनाच्चेत्यन्ये ॥ ॥प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ मन्यधातुरुपपदं यस्य तस्मिन्धातौ प्रहासिते मध्य
मः स्यात्परिहासे गम्ये मन्यतेस्तूत्तमः स्यात् स चैकवत्स्यात् । मंतव्यर्थे देपि एकवचनमेव स्यादिति यावत् । अन्वाचये चकारः । तेनैकवचनेपि प्रधानशि
ष्टो मध्यमोत्तमौ प्रवर्तेते । एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः । स्तस्यापोदनेपरिहासार्थं प्रनारणां । किं मन्ये विहरिष्यसे वनं हन्ता सुवांतराशामि
मं विहरिष्ये इति मन्यसे इत्यर्थः । एहि मन्ये राजपुत्रं जामदग्न्यं विजेष्यसे इति भवभूतिः । एते एतं गामन्ये ओदनं भोक्ष्येथे भोक्ष्ये इत्यादि भोक्ष्यावहे इति म
न्येथे भोक्ष्यामहे इति मन्यध्वे इत्यर्थः । प्रभृतीश्रुतवन्नेनेह । एतु भवान्मन्यते ओदनं भोक्ष्य इति । शपनानिर्देशान्नेह । एहि मन्ये रथेन यास्यामीति प्रहासे किं
तत्कथने माभूत् । एहि मन्यसे ओदनं भोक्ष्ये इति सुक्तः सोऽतिथिभिरिति ॥ ॥अस्मद्युत्तमः स्यात् । अहं पश्यामि । इत्येवा युष्मदस्मद्भ्यां समानाधि
करणत्वे परत्वादुत्तम एव । अहं च त्वं च वदथ इह संयुज्यावस्मिन्पक्षा ॥ ॥शेषे प्रथमः ॥ मध्यमोत्तमविषयादन्यत्र प्रथमपुरुषः स्यात् । देवदत्तः पच
ति ॥ ॥परः सन्निकर्षः संहिता ॥ वर्णानामतिशयितः सन्निधिः संहितासंज्ञः प्रदेशाः संहितायामित्यादयः । यावता समयेनोच्चारितो वर्णो नश्यापि एल॰
तेनाधिककालव्यवधानाभावः स्यादतिशयः । नचैवं मध्यमायां विलम्बितायां च वृत्तौ संहितासंज्ञा न स्यादिति वाच्यं वृत्तिमात्रे सन्निकर्षसाम्यापि नैरन्तर्या

च्चारणात् । द्रुतायां स्वल्पतरोपलब्धिकालो मध्यमायामधिको विलंबितायामधिकतर इत्येतावता विशेषात् । आकृतवैकृतभेदेन ध्वनीनां भिन्नत्वात् । वैकृत
ध्वनिवशात्तस्यैव वर्णस्य पुनः पुनरुपलब्धिरिति ध्वनिभेदे न हति भेदात् । हस्तिद्वयस्य मशकद्वयस्य च संयोगसाम्येपि हस्तिनोर्बहुदेशव्यापकत्वम
शकयोरल्पदेशव्यापकत्वमिति विवेकः । अथवाशब्दो विरामः संहिता पदापेक्षयोच्चारणान्न विरमतीति तदानीं तस्योपपत्तेः । एवं न मध्यमादावपि
न दोषः । न चैवं वर्णानां भिन्नप्रयत्नजनितध्वनिवैरूप्यात्प्रतिवर्णं प्रयत्नभेदादेकप्रयत्नेस्मादिति वर्णान्तरोत्पन्नप्रयत्नान्तरेणावर्णान्तरोच्चार
णादेकैकस्य वर्णस्य विरामसद्भावादवसानसंज्ञया संहितासंज्ञाया बाधप्रसंगः । वर्णान्तरानुच्चारणेवस्थद्धतया दोसावकाशत्वादवसानसंज्ञया निरवका
शया संहितासंज्ञाया बाधानुत्पत्तेः । अथवा सर्वत्र विरामसद्भावात् अवसानसंज्ञायां विशेषज्ञापरागीयः । शब्दार्थयोर्यत्र विरामस्तत्रावसानसं
ज्ञा । अत्र तु सत्यपि शब्दविरामे पदार्थस्य वाक्यार्थस्य वा विरामान्नतथा पदान्तादिविरामः संहिता प्रयत्नविशेषजन्यो विरतेपि वर्णोच्चारणान्नरूपोस्य
वर्णोच्चारणेप्यनुवर्तमानो घोषो ऽन्तः ॥२४॥ अथ वर्गाणां प्रथमद्वितीयानां शषसानां च संयोगे घोषविच्छेदात्सन्निधानात्संज्ञानस्याते । तनोष्य
कुष्टुं रथ्याय मितिकनोत्तुवमनुष्या इति लुप्यते संज्ञाया भवमानमित्याद्युदात्तत्वं शिष्टमनुदात्तं तत्र संहिताधिकारीयमुदात्तादनुदात्ते

सोऽतिस्वरितत्वं न स्यात्। पचतीत्यत्र चकारस्याघोषत्वाद्दकारोच्चारणतो घोषविच्छेदात्स्वरितत्वानुपपत्तिः। द्वयोरकारयोर्घोषवतोर्मध्यवर्तिनोऽका
रस्यापि घोषवत्त्वादोपलंभात्। एकजवाकुसुमरूपेण स्फटिकद्वयस्याप्युपरागदर्शनात्। सन्निधिसत्वेऽकस्यैवानेकस्यापि शब्देन प्रच्छादनसंभव
त्। यद्वा वर्णद्वयोच्चारणकालमध्ये अन्येन वर्णाभावेन कालेनाव्यवहितत्वं पौर्वापर्यं संहिता। तेन मध्यमायां विलंबितायां च परसन्निकर्षाभावेऽपि संज्ञा
यद्यपि युगपदुत्थितानां पौर्वापर्यं वर्णानां च यौगपद्यं तथापि बुद्धिनिबंधन एव सन्निकर्षादिव्यवहारः। तदुक्तं बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीर
स्तन्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यं। तनुतेस्तनत् साऽस्ति यस्याः सा तन्वती सकलविषयव्यापिनी बुद्धिर्यस्य तन्वन्नीतिरिति पाठे श
त्रन्तस्य तनोतेः प्रयोगः। अर्थः पूर्ववत्॥ ॥विरामोऽवसानं॥ वर्णानामभावोऽवसानसंज्ञः प्रदेशाश्चावसानेत्यादयः। इहाभावोऽवसानमिति केचित्त्व
ठंति। न चाभावस्य पूर्वपरभावानुपपत्तिः वर्णान्तापेक्षबुद्धिकल्पितस्य तस्योपपत्तेः। यद्वा विरम्यतेऽनेनेति करणे घञ् इति चरमवर्णः संज्ञी। खरव
सानयोरित्येकापि सप्तमी विषयभेदाद्भिद्यते खरि परे नेकस्य विसर्गः। अवसाने चरेके स्थानिनीति। वार्त्तिककारस्त्वाह। संहितावसानयोर्लोक
विदितत्वात्सिद्धमिति। उक्तसूत्रद्वयं नारम्भणीयमित्यर्थः॥ ॥ इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य चतुर्थे पादे चतुर्थमाह्निकम्। पादः ९८०